# CHAPTER : IV

## METHODOLOGY OF RECONSTRUCTION

MEANING OF THE TERM 'RECONSTRUCTION' IN THE PRESENT CONTEXT :

The original texts of numerous smṛtis have been completely or partially lost. But the works on Dharmaśāstra, i.e. the digests & commentaries contain numerous quotations from the extinct smṛtis. The earlier commentators & digest-makers had before them the original texts of such smṛtis. The quotations, occurring in the later works, (that might not have the original texts of some smṛtis), are also authentic & reliable, as they have quoted the sūtras & the verses from the extinct smṛtis, on the basis of the earlier works, the digests & commentaries, on Dharmaśāstra.

The collection of such quotations of a lost smṛti from those works, & classification & arrangement of them, in accordance with the smṛti-topics, dealt with in them, - is meant by the term 'Reconstruction' in the present context.

PROCEDURE OF RECONSTRUCTION :

The original & complete text of Devalasmṛti, is no longer existing. The printed Devalasmṛti, of about 90 verses, is also a fragmentary & later work, ascribed to Devala. It deals mainly with the problem of re-admittance by purification of persons, associated with the Mlecchas. But the digests & commentaries on Dharmaśāstra, contain hundreds of quotations, pertaining to the varied topics of Dharma, from the lost original text of Devala.

DATA-COLLECTION :

(1) Hence the work of reconstructing the lost text of Devala, was undertaken by the researcher. The first necessary task was of collecting the quotations of Devala, quoted in the various works-the digests & commentaries on Dharmaśāstra. Hundreds of quotations, found in the works, right from the Mitākṣarā upto the Bālambhaṭṭī were collected & noted down on the slips, with proper reference to the page-numbers & works, consulted. It was found that the two earliest commentators, namely Viśvarūpa & Medhātithi, do not mention or quote Devala. The variant readings, in case of the identical quotations, were also noted down on those slips of quotations. These slips, containing quotations, were alphabetically arranged to avoid repetition. About 2500 prose & verse quotations, of the present Reconstructed text were thus collected, from numerous printed & manuscript works on Dharmaśāstra. A list of such published & unpublished works, consulted for the purpose of the reconstruction of the present text, is given in the Appendix (Part IV, App.IV).

CLASSIFICATION & ARRANGEMENT :

(2) The next step was of classification & arrangement of the collected quotations. The alphabetically arranged slips of Devala-quotations, were then separated & classified first into three main divisions of ācāra, vyavahāra & prāyaścitta . After minute & repeated study of topics, treated in the collected quotations, they were classified even into the following twenty-two different prakaraṇas (divisions), of the three main adhyāyas (chapters).

## TABLE No.1

### NAMES OF PRAKARAṆAS OF R.T.

(1) Ācārādhyāyaḥ–

1. Dharmasvarūpam –
2. Varṇāśramajātidharmāḥ –
3. Saṁskārāḥ –
4. Paribhāṣā –
5. Āhnikam –
6. Bhakṣyābhakṣyam –
7. Deśadharmāḥ kāladharmāśca –
8. Dānam –
9. Dravyaśuddhiḥ –
10. Āśaucam –
11. Antyeṣṭiḥ –
12. Śrāddham –

(2) Vyavahārādhyāyaḥ –

1. Rājadharmāḥ –
2. Ātatāyinaḥ –
3. Śrīpuṁdharmaḥ –
4. Dāyavibhāgaḥ –

(3) Prāyaścittādhyāyaḥ –

1. Prāyaścittam –
2. Mlecchitaśuddhiḥ
3. Anugrahaprāyaścittam

4. Vratāni -

5. Tīrthayātrā -

6. Niḥśreyasam -

(In a separate appendix (pariśiṣṭam - Devaloktam Jyotiṣam), the quotations of Devala, found in the digests & commentaries on Dharmaśāstra & Jyotiṣa, dealing with some topics of Jyotiṣa, are incorporated. They are sub-divided into the four prakaraṇas - namely (1) Saṁskārāḥ (2) Kṛṣiḥ (3) Grahacārāḥ (4) Ariṣṭāni in accordance with the subject matter treated in them).

The standard smṛtis - those of Manu & Yājñavalkya & the digests & commentaries (that incorporated these quotations) were helpful in classifying & arranging the quotations into these various prakaraṇas. While arranging the quotations, even in a particular prakaraṇa, attempt was made to maintain proper order and sequence in the treatment of topics.

The Mlecchitaśuddhi prakaraṇa of the third adhyāya, contains verses, dealing with the problem of readmittance of persons associated with Mlecchas. These are taken from the printed Devalasmṛti. Some of them are also found quoted in the Dharmaśāstra-works. The printed text does not seem to have proper arrangement. Attempt is made to present the verses with a proper order & a systematic arrangement in the present text. Some verses from the printed text, are also added at proper places in the Reconstructed Text.

FINALIZING OF READINGS :

(3) When the classification & arrangement of the quotations into the various prakaraṇas, were complete, the readings of the text

kalpana's

were to be finalized. The quotations were taken from numerous works on Dharmaśāstra & hence they were having variations in readings. The following three points were taken into consideration, while determining the readings of the text.

(1) The readings, that are grammatically correct are maintained, wherever they were found convincing.

(2) The readings from the earlier works, that quoted sūtras & verses, directly from the original smṛti, were retained, as far as possible, as such readings are more authentic, than the readings of the later works.

(3) The readings, followed by the majority of works, were also mostly accepted.

The scribal errors have been instantly corrected. Our suggestions for some readings of the text, are given in the brackets, while writing the reconstructed text. In the Part II-B, a table, containing (1) śloka numbers (2) sources (from where the quotations were taken) & (3) variants (in case of readings), is given. While mentioning the sources, the use of abbreviations (as explained in the Part II(A)), is made, for the sake of convenience & brevity.

Thus the lost text of Devalasmṛti is reconstructed as described above.

## SECTION II

## TEXT IN ITS RECONSTRUCTED FORM

# ॥देवलस्मृतिः॥

## ॥अनुक्रमणिका॥

| | पृष्ठम्। |
|---|---|
| १ आचाराध्यायः। | १-१३८ |
| १ धर्मस्वरूपम्। | १ |
| २ वर्णाश्रमजातिधर्माः। | ६ |
| ३ संस्काराः। | २५ |
| ४ परिभाषा। | ३८ |
| ५ आह्निकम्। | ४२ |
| ६ भक्ष्याभक्ष्यम्। | ६० |
| ७ देशधर्माः कालधर्माश्च। | ७१ |
| ८ दानम्। | ७८ |
| ९ द्रव्यशुद्धिः। | ९४ |
| १० आशौचम्। | १०३ |
| ११ अन्त्येष्टिः। | १०७ |
| १२ श्राद्धम्। | ११९ |
| २ व्यवहाराध्यायः। | १३९-१४८ |
| १ राजधर्माः। | १३९ |
| २ आततायिनः। | १४० |
| ३ स्त्रीपुंधर्माः। | १४१ |
| ४ दायविभागः। | १४४ |

| | पृष्ठम्। |
|---|---|
| 3 प्रायश्चित्ताध्यायः। | १४९-२२५ |
| १ प्रायश्चित्तम्। | १४९ |
| २ म्लेच्छितशुद्धिः। | १६८ |
| 3 अनुग्रहप्रायश्चित्तम्। | १७५ |
| ४ व्रतानि। | १७७ |
| ५ तीर्थयात्रा। | २०3 |
| ६ निःश्रेयसम्। | २०८ |
| ४ परिशिष्टम्। देवलोक्तं ज्योतिषम्। | २२६-२3६ |
| १ संस्काराः। | २२६ |
| २ कृषिः। | २२९ |
| 3 ग्रहचारः। | २3२ |
| ४ अरिष्टानि। | २3६ |

॥ श्रीः ॥



# ॥ देवलस्मृतिः ॥

# ॥ आचाराध्यायः १ ॥

॥ श्रीः ॥



# ॥ प्रथमं प्रकरणम् ॥

## ॥ धर्मस्वरूपम् ॥

१ ऋग्यजुःसामाथर्वणो वेदाः॥

२ शिक्षाव्याकरणनिरुक्तच्छन्दःकल्पज्योतिषाणीति वेदाङ्गानि॥

३ मन्वादयः प्रयोक्तारो धर्मशास्त्रस्य कीर्तिताः।
तत्प्रयुक्तप्रयोक्तारो गृह्यकाराः स्वमन्त्रतः॥

४ मनुर्यमो वसिष्ठोऽत्रिर्दक्षो विष्णुस्तथाङ्गिराः।
उशना वाक्पतिर्व्यास आपस्तम्बोऽथ गौतमः॥

५ कात्यायनो नारदश्च याज्ञवल्क्यः पराशरः।
संवर्तश्चैव शङ्खश्च हारीतो लिखितस्तथा॥

६ आर्षाः पूर्ववृत्तान्ताश्रयाः प्रतिपत्तिफला इतिहासाः॥

७ शौचं दानं तपः श्रद्धा गुरुसेवा क्षमा दया।
विज्ञानं विनयः सत्यमिति धर्मसमुच्चयः॥

८ व्रतोपवासनियमैः शरीरोत्तापनं तपः॥

९ प्रत्ययो धर्मकार्येषु तथा श्रद्धेत्युदाहृता।
नास्ति ह्यश्रद्दधानस्य धर्मकार्यप्रयोजनम्॥

१० उपाध्यायः पिता ज्येष्ठो भ्राता चैव महीपतिः।
मातुलः श्वशुरस्त्राता मातामहपितामहौ॥
वर्णज्येष्ठः पितृव्यश्च पुंस्येते गुरवः स्मृताः॥

११ माता मातामही गुर्वी पितुर्मातुश्च सोदराः।
श्वश्रूः पितामही ज्येष्ठा धात्री च गुरवः स्त्रियाम्॥
१२ पितुर्भगिन्यां मातुश्च ज्येष्ठायां च स्वसर्यपि।
अपि मातरि लोकेऽस्मिन्नुपकाराद्धि गौरवम्॥
१३ इत्युक्तो गुरुवर्गोऽयं मातृतः पितृतो द्विधा।
अनुवर्तनमेतेषां मनोवाक्कायकर्मभिः॥

१४ गुरुं दृष्ट्वा समुत्तिष्ठेदभिवाद्य कृताञ्जलिः।
नैतैरुपविशेत् सार्धं विवदेन्नार्थकारणात्॥
१५ उद्दिष्टं साधयेदर्थं प्रतिषिद्धं च वर्जयेत्।
तत्पूज्यान् पूजयेन्नित्यं व्यसने न परित्यजेत्॥
१६ क्रोधं वाग्दण्डपारुष्ये उत्सेकं वैकृतान् स्वरान्।
नर्म हासं विलासं च वर्जयेद् गुरुसन्निधौ॥
१७ जीवितार्थमपि द्वेषं गुरुभिर्नैव भावयेत्।
उदितोऽपि गुणैरन्यैर्गुरुद्वेषी पतत्यधः॥

१८ गुरूणामपि सर्वेषां पूज्याः पञ्च विशेषतः॥

१९ यो भावयति या सूते येन विद्योपदिश्यते।
ज्येष्ठो भ्राता च भर्ता च पञ्चैते गुरवः स्मृताः॥

२० तेषामाद्यास्त्रयः श्रेष्ठास्तेषां माता सुपूजिता॥
२१ आत्मनः सर्वयत्नेन प्राणत्यागेन वा पुनः॥
पूजितव्या विशेषेण पञ्चैते भूतिमिच्छता॥

२२ माता मासदशावस्थां धृत्वा शूलैः समाकुला।
वेदनाविविधैर्दुःखैः प्रसूयेत विमूर्च्छिता॥
२३ प्राणैरपि प्रियान् पुत्रान् मन्यते सुतवत्सला।
कस्तस्या निष्कृतिं कर्तुं शक्तो वर्षशतैरपि॥

२४ यावत् पिता च माता च द्वावेतौ निर्विकारिणौ।
तावत् सर्वं परित्यज्य पुत्रः स्यात् तत्परायणः॥
२५ माता पिता च सुप्रीतौ स्यातां पुत्रगुणैर्यदि।
स पुत्रः सकलं धर्मं प्राप्नुयान्नात्र संशयः॥
२६ नास्ति मातृसमं दैवं नास्ति पितृसमो गुरुः।
तयोः प्रत्युपकारो हि न कथञ्चन विद्यते॥
२७ सर्वार्थसम्भवो देहो जनितः पोषितो यतः।
न तयोर्याति निर्वेशं पित्रोर्मर्त्यः शतायुषा॥

२८ ब्रह्मोपदेशमारभ्य यावद् वेदान्तदर्शनम्।
एकेन वक्ष्यते येन स महागुरुरुच्यते॥
२९ ब्रह्मोपदेशमेकत्र वेदशास्त्राण्यथैकतः।
आचार्यः स तु विज्ञेयस्तयोरेकैकशस्तु (कं तु) देशिकाः (कः)॥
३० सम्यगाराध्य वक्तारं विसृष्टस्तदनुज्ञया।
शिष्यो विद्याफलं भुङ्क्ते प्रेत्य चापद्यते दिवम्॥

३१ यथा खनन् खनित्रेण नरो वार्यधिगच्छति।
एवं गुरुगतां विद्यां शुश्रूषुरधिगच्छति॥
३२ यथान्नं विषसंयुक्तं विषं वान्नेन संयुतम्।
तादृशं स्यादशुश्रूषोर्ब्रह्माधीतं न संशयः॥

३३ अस्वाधीनं कथं दैवं प्रकारैरभिराध्यते।
स्वाधीनं समतिक्रम्य पितरं मातरं गुरुम्॥
३४ यं मातापितरौ क्लेशं सहेते सम्भवे नृणाम्।
न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि॥
३५ योन्त(तयो)र्नित्यं प्रियं कुर्यादाचार्यस्य च सर्वदा।
तेषु हि त्रिषु तुष्टेषु तपः सर्वं समाप्यते॥
३६ तेषां त्रयाणां शुश्रूषा परमं तप उच्यते।
नैतैरनभ्यनुज्ञातो धर्ममन्यं समाचरेत्॥
३७ सर्वे तस्यादृता धर्मा यस्यैते त्रय आदृताः।
अनादृतास्तु यस्यैते सर्वास्तस्याफलाः क्रियाः।
३८ यावत् त्रयस्ते जीवेरन् (युस्) तावन्नान्यत् समाचरेत्।
तेषां नित्यं तु शुश्रूषां कुर्यात् प्रियहिते रतः
३९ तेषामनुपरोधेन पारत्र्यं यद्यदाचरेत्।
तत् तन्निवेदयेत् तेभ्यो मनोवाक्कायकर्मभिः॥
४० त्रिष्वेतेष्वितिकृत्यं हि पुरुषस्य समाप्यते।
एष धर्मः परः साक्षादुपधर्मोऽन्य उच्यते॥
४१ इमं लोकं मातृभक्त्या पितृभक्त्या तु मध्यमम्।
गुरुशुश्रूषया त्वेव ब्रह्मलोकं समश्नुते॥

४२ यो भ्रातरं पितृसमं ज्येष्ठं मूढोऽवमन्यते।
तेन दोषेण स प्रेत्य निरयं घोरमृच्छति॥
४३ तस्मात् पितृवदाराध्यो ज्येष्ठो भ्राता च सर्वदा।
तस्य प्रसादान्मर्त्यो हि प्रेत्य चेह च नन्दति॥

४४ पुंसा धर्मनिविष्टेन पूज्यो भर्ता हि सर्वदा॥

४५ ये नरा भर्तृपिण्डार्थे स्वान् प्राणान् सन्त्यजन्ति हि।
तेषामथाक्षयान् लोकान् प्रोवाच भगवान् मनुः॥

४६ विगर्हातिक्रमाक्षेपहिंसाबाधवधात्मनाम्।
अन्यमन्युसमुत्थानां दोषाणां मर्षणं क्षमा॥

४७ स्वदुःखेष्विव कारुण्यं परदुःखेषु सौहृदात्।
दयेति मुनयः प्राहुरनुक्रोशं च जन्तुषु॥

४८ यत् पुनर्वैदिकीनां च लौकिकीनां च सर्वशः।
धारणा सर्वविद्यानां विज्ञानमिति कीर्त्यते॥

४९ विनयं द्विविधं प्राहुः शास्त्रदमशमाविति।
शारीरोपरतिः शान्तिर्ज्ञानं प्रज्ञाप्रसादजम्॥

५० श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम्।
आत्मनः प्रतिकूलानि परेषां न समाचरेत्॥

# ॥ द्वितीयं प्रकरणम् ॥

## ॥ वर्णाश्रमजातिधर्माः ॥

५१ चत्वारो वर्णाः ॥
५२ ब्राह्मणक्षत्रियवैश्यशूद्रा इति ॥
५३ अनुलोमाश्चत्वारः ॥
५४ सवर्णाम्बष्ठपाराशवोग्रा इति ॥
५५ प्रतिलोमाः षट् ॥
५६ आयोगवक्षत्त(तृ)चण्डालमागधवैदेहकसूता इति ॥
५७ अन्तरालाः षट् ॥
५८ कुक्कुटपुल्कसवेनकुशीलववरुडश्वपाका इति ॥
५९ सर्वेषां लक्षणानि विधानानुपूर्व्यं व्याख्यास्यामः ॥

(ब्राह्मणधर्मः ।)

६० आचार्याद् व्रतनियमशुश्रूषादिभिस्त्रयीविद्योपादानमध्ययनम् ॥
६१ तस्याचारान्वयोपक्रमसामर्थ्यभक्तिशीलशुश्रूषोपनताय शिष्याय प्रदानमध्यापनम् ॥
६२ पयःक्षीराज्यपुरोडाशसोमौषधिचरुप्रभृतिभिर्हविर्भिः खादिरपलाशाश्वत्थन्यग्रोधोदुम्बरप्रभृतिभिः समिद्भिः स्रुक्स्रुवोदूखलमुसलकुठारखनित्रयूपदारुचर्मदर्भग्रावपवित्रभाजनादिभिर्द्रव्योपकरणैरुद्गातृहोत्रध्वर्युब्रह्मादिभिर्ऋत्विग्भिः काम्यनैमित्तिकानां पक्षादिपूर्वकाणां

यथोक्तदक्षिणानां यज्ञानां समापनं यजनम्॥
६३ एतेन याजनं व्याख्यातम्॥

६४ विद्या वित्तं तपश्चेति त्रीणि तेजांसि देहिनः।
इह चामुत्र च श्रेयस्तदेतैः साध्यते त्रिभिः॥
६५ विद्यया निर्मलं ज्योतिर्वित्तत्यागात् सुखोदयम्।
तपसा विमलां भूतिं प्राप्नुयान् मानवस्त्रिभिः॥
६६ रत्नान्यापः स्त्रियो विद्या धर्मः शौचं सुभाषितम्।
विविधानि च शिल्पानि समादेयानि सर्वतः॥
६७ स्थून(नं)शीर्णमनुज्ञातं शिलम्॥

६८ क्षत्रधर्मः॥
६९ अध्ययनेज्यादानैर्देवपितृपूजनम्॥
७० ब्राह्मणशुश्रूषणम्॥
७१ वैश्यशूद्रपरिपालनम्॥
७२ बलिकरशुल्कषड्भागोपजीवनम्॥
७३ वर्णाश्रमसंस्थापनम्॥
७४ पापनिग्रहः॥
७५ गुणवत्परिग्रहः॥
७६ व्यवहारवर्जनम्॥
७७ धर्मचरित्रानुपालनम्॥
७८ हस्त्यश्वरथप्रहरणशिक्षाभ्यासः॥
७९ शास्त्रोपायाश्रयणम्॥
८० कोशदण्डावेक्षणम्॥
८१ परचक्रापणाटवीतस्करदुष्टमान्याप्तकुलीनाध्यक्षप्रतिषेधलब्धशूर-

निजैश्वर्यदण्डप्रणयनम्॥

८२ धर्मविशुध्यै च॥

८३ धैर्यमुत्साहः शौर्यं शक्तत्वमयाचनमिति॥

८४ शौर्यं तेजो धृतिर्धार्ष्ट्यं युद्धे चाप्यपलायनम्।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्॥

८५ यागाध्ययनदानास्त्रप्रजारक्षाभयादि च।
दण्डनीतिर्धनुर्वेदः क्षत्रियस्यानुवृत्तये(यः)॥

८६ वैश्यधर्मः॥

८७ अध्ययनयजनप्रदानैर्धर्मानुष्ठानम्॥

८८ ब्राह्मणक्षत्रियशुश्रूषा॥

८९ पापवर्जनम्॥

९० कलत्रपोषणम्॥

९१ कर्षणं पशुपालनम्॥

९२ भारोद्वाहनपण्यव्यवहारजर्तनगायनतालावतरणरङ्गोपजीवनं चेति॥

९३ स्वाध्यायादीनि कर्माणि कुसीदं पशुपालनम्।
कृषिक्रिया च वाणिज्यं वैश्यकर्माण्यमूनि च॥

९४ शूद्रधर्मः॥

९५ द्विजातिशुश्रूषा॥

९६ पापवर्जनम्॥

९७ कलत्रादिपोषणम्॥

९८ कर्षणं पशुपालनम्॥

९९ भारोद्वहनपण्यव्यवहारचित्रकर्मनृत्यगीतवेणुवीणामुरजमृदङ्ग-
वादनानि॥

१०० चिकित्सां ज्योतिषं रूपं शकटं तिलपीडनम्।
सुरां तुलां च नाजीवेत् पुत्राचार्यत्वमेव च॥
१०१ लाक्षामाञ्जिष्ठमांसानि मधुलोहविषाणि च।
अजीवन् वृषलोऽप्यार्यः कर्मणा तेन वर्जितः॥

[स्त्रीधर्मः]

१०२ अस्वातन्त्र्यम्॥

१०३ पतिशुश्रूषा॥

१०४ सहधर्मचर्या॥

१०५ तत्पूज्यपूजनम्॥

१०६ परवेश्मागमनम्॥

१०७ तद्द्वेष्यद्वेषणम्॥

१०८ अदुष्टभावता॥

१०९ नित्यानुकूल्यम्॥

११० तत्कार्यपरत्वम्॥

१११ इति स्त्रीधर्मः॥

११२ पतिप्रियहिते युक्ता स्वाचारा विजितेन्द्रिया।
इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमां गतिम्॥

११३ ब्रह्मचारिधर्मः॥

११४ ब्रह्मचर्यम्॥

११५ स्वाध्यायावश्यकब्रह्मसूत्राक्षमालादण्डकौपीनकुण्डिकामौञ्जी-
मेखलाधारणम्॥

११६ सकृद्भोजनम्॥

११७ असकृदवगाहनम्॥

११८ उभयकालमग्निहोत्रम्॥

११९ सन्ध्योपासनम्॥

१२० अलुप्तलोमकेशनखत्वम्॥

१२१ गन्धमाल्यस्नेहाभ्यञ्जनवेषालङ्कारच्छत्रोपानद्वाहनलङ्घन-
प्लवनधावनचिकित्साज्योतिषलक्षणवास्तुविद्यामङ्गलपौष्टिकशान्ति-
कर्मगान्धर्वसङ्घसमयबन्धनशिल्पलेखनकारुकर्मवेश्मक्षेत्रद्रव्यधन-
धान्यपरिच्छदशास्त्रद्यूतव्यवहाराज्ञाभावलीलापरिहासप्रणयकुहक-
विस्मापनविडम्बनविवादोत्सेकपरिदेवनरोदनबास्तिन्यस्तपादोद्-
वर्तनवर्जनम्॥

१२२ गुरोः पूर्वोत्थानम्॥

१२३ जघन्यसंवेशनम्॥

१२४ प्रमाणसन्दिष्टकरणम्॥

१२५ इष्टशुश्रूषा॥

१२६ नित्योपासनम्॥

१२७ अपचितिः॥

१२८ तदभावे तत्पुत्रेऽस्य दारेषु चानुवृत्तिरामरणात्॥ इति॥

१२९ अजिनं मेखलां दण्डं व्रती नित्यं भजेत् तदा।
यावत् पाणिग्रहस्तस्य तावद् वर्णी न सन्त्यजेत्॥

१३० अशुचित्वं दिवास्वापं तथा ताम्बूलभक्षणम्।
नृत्यं गीतं तथा वाद्यं द्यूतं स्त्रीव्यसनं तथा॥

१३१ गन्धं पुष्पं तथा क्षौद्रं छत्रं वा पादुकाद्वयम्।
पाषण्डजनसंसर्गं तथा पाषण्डभाषणम्॥

१३२ तथा वेदपरित्यागं गुर्वशुश्रूषणं तथा।
ग्रामचाण्डालसम्भाषां ब्रह्मचाण्डालभाषणम्॥

१३३ दर्पणं दन्तकाष्ठं च परनिन्दात्मकत्थनम्।
एतानि सन्त्यजेन् नित्यं ब्रह्मचारी जितेन्द्रियः॥
१३४ एतेषां स परित्यागात् व्रती ब्रह्मपदं व्रजेत्।
एतेषां च परिग्राही एकस्याऽपि यदा व्रती॥
प्रायश्चित्ती भवेत् सोऽपि ब्रह्मचारी न संशयः॥
१३५ एतांश्च नियमांस्त्यक्त्वा ब्रह्मचारी गुरौ वसन्।
चान्द्रायणं व्रतं कृत्वा शुद्धिमाप्नोति निश्चितम्॥
१३६ महापातकयुक्तो वा युक्तो वा सर्वपातकैः।
ब्रह्मचर्यपरो यस्तु स गच्छेद् ब्रह्मणः पदम्॥
१३७ अग्निकार्यं ब्रह्मयज्ञं देवर्षिपितृतर्पणम्।
ब्रह्मचारी परित्यज्य भुक्त्वा चान्द्रायणं चरेत्॥
१३८ ब्रह्मचारी यदाऽश्नीयात् मधुमांसमकामतः।
त्रिरात्रोपोषितः सम्यग् रात्रिमेकां जले वसेत्॥
१३९ मौञ्जीव्रतमुपक्रम्य परं श्रावणकर्मणः।
ब्रह्मचारी वृथा कुर्वन् वेदाभ्यासं विना दिनम्।
वेदघाती स विज्ञेयः सर्वकर्मस्वनर्हितः॥

[अनध्यायाः।]

१४० मासे मासे तु पर्वादिस्तथा मन्वादयः परम्।
युगादयस्तथा शुक्ला अष्टमीञ्च चतुर्दशी॥
१४१ शयनोत्थानद्वादश्यौ महाभरणी तथैव च।
सन्ध्यायां गर्जिते मेघे तथा भूकम्पनेऽपि च॥
१४२ ग्रामदाहे राजनाशे तथा स्वर्भानुदर्शने।
मातापित्रोर्मृताहे च श्रोत्रिये मरणं गते॥
१४३ जाताशौचे च ज्ञातीनां गजच्छाया द्वये तथा।
महापातकिनो दृष्ट्वा चाण्डालान् बहिरासितान्॥

१४४ एतेषूक्तेषु राजेन्द्र वेदं वेदान्तमेव वा।
योऽधीते मूढधीः पापी मृत्वा नरकमश्नुते॥

१४५ [स्नातकधर्माः]
कुण्डिकां मण्डलीं शाटीं प्रसाधनमुपानहौ।
वर्जयेत् परभुक्तानि अनिर्णिक्तानि वै बुधः॥

[गृहस्थधर्माः]

१४६ ब्रह्मचर्यं समाप्य गृही भवेत्, गृही भूत्वा वनी भवेत्, वनी भूत्वा प्रव्रजेत्।

१४७ वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम्।
अविप्लुतब्रह्मचर्यो गृहस्थाश्रममाविशेत्॥

१४८ तदनन्तरमग्नीनादधीत॥

१४९ गृहीताग्निहोत्रो देव-पितृ-ऋषि-अतिथि-अभ्यागत-भृत्य-आत्म-पूजनं सुचरित्रानुष्ठानं च कुर्वीत॥

१५० अत्र हव्यकव्यस्वाध्यायैर्देव-पितृ-ऋषीन् पृथक् पृथक् पूजयेत्॥

१५१ स्वाहेत्यग्निहोत्रप्रवृत्ति (त्तिः)॥

१५२ हव्यं तद् देवान् प्रसादयति॥

१५३ स्वधेति पैतृकप्रवृत्ति(त्तिः)॥

१५४ कव्यं तत् पितॄन् प्रीणयति॥

१५५ ॐ इत्यध्ययनप्रवृत्तिः॥

१५६ स्वाध्यायः स मुनींस्तोषयति॥

१५७ द्विविधो गृहस्थः॥

१५८ यायावरः शालीनश्च॥

१५९ तयोर्यायावरः प्रवरः॥

१६० याजनाध्यापनप्रतिग्रहरिक्थचयवर्जनात्॥

१६१ षट्कर्माधिष्ठितः॥

१६२ प्रेष्यचतुष्पदगृहग्रामधनधान्ययुक्तो लोकानुवर्ती शालीनः॥

१६३ गृहस्थस्य सदाचारं वक्ष्यामि शृणु तत्त्वतः।
यं श्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः॥
१६४ विवाहादिषु विप्रस्य कर्तव्यं यत् शृणुष्व मे।
यज्ञोपवीतद्वितयं सोत्तरीयं च धारयेत्॥
१६५ सुवर्णकुण्डले चैव धौतवस्त्रद्वयं तथा।
अनुलेपनलिप्ताङ्गः कृत्तकेशनखः शुचिः॥
१६६ धारयन् वैणवं दण्डं सोदकं च कमण्डलुम्।
उष्णीषममलं छत्रं पादुके चाऽप्युपानहौ॥
१६७ धारयेत् पुष्पमालां च सुगन्धं प्रियदर्शनम्।
नित्यं स्वाध्यायशीलः स्याद् यथाचारं समारभेत्॥
१६८ दर्शं च पौर्णमास्यां च यागं कुर्याद् यथाविधि।
औपासनं च होतव्यं सायं प्रातर्द्विजातिभिः।
औपासनपरित्यागी सुरापीत्युच्यते बुधैः॥
१६९ अयने विषुवे चैव युगादिषु चतुर्ष्वपि।
दर्शे च प्रेतपक्षे च श्राद्धं कुर्याद् गृही द्विजः॥
१७० मन्वादिषु मृताहे च अष्टकादिषु सत्तमः।
नवधान्ये समायाते गृही श्राद्धं समाचरेत्॥
१७१ श्रोत्रिये गृहमायाते ग्रहणे चन्द्रसूर्ययोः।
पुण्यक्षेत्रे पुण्यतीर्थे गृही श्राद्धं समाचरेत्॥
१७२ यज्ञो दानं तथा होमः स्वाध्यायः पितृतर्पणम्।
मिथ्या भवति राजेन्द्र ऊर्ध्वपुण्ड्रं विना कृतम्॥
१७३ कुलवृद्धा वयोवृद्धा ज्ञानवृद्धाश्च मानवाः।
शीलवृद्धाश्च सम्पूज्या तथा स्वगुणगौरवात्॥
१७४ जीवेति ब्रुवतो ब्रूयात् जीवेत्युक्तः सेति च॥

१७५ परान्नं नैव भुञ्जीत परवादं च वर्जयेत्।
न दुर्जनैः सह वसेत् नाऽशास्त्रं शृणुयात् तथा।
१७६ अन्यस्त्रियं न गच्छेत (नोपगच्छेत्) पैशुन्यं च परित्यजेत्॥
१७७ नापसव्यं व्रजेत् विप्रः अश्वत्थं च चतुष्पथम्।
असूयां मत्सरं चैव दिवास्वापं च वर्जयेत्॥
१७८ न वदेत् परपापानि स्वपुण्यं नैव कीर्तयेत्।
स्ववयश्च स्वनक्षत्रं नाम चैवातिगोपयेत्॥
१७९ आसवद्यूतगीतेषु नरस्तु न रतिं चरेत्॥
१८० आर्द्रास्थि च तथोच्छिष्टं शूद्रं च पतितं तथा।
नर्तकं कितवं स्पृष्ट्वा सचैलं स्नानमाचरेत्॥
१८१ चितिं च चितिकाष्ठं च यूपं चाण्डालमेव च।
स्पृष्ट्वा देवलकं चैव सवासा जलमाविशेत्॥
१८२ दीपखट्वातनुच्छायाकेशवस्त्रनखोदकम्।
अजमार्जाररेणुश्च हन्ति पुण्यं पुराकृतम्॥
१८३ स्नानं रजकतीर्थेषु भोजनं गणिकागृहे।
नापितस्य गृहे क्षौरं हन्ति पुण्यं पुराकृतम्॥
१८४ शूर्पवातं प्रेतधूमं तथा शूद्रान्नभोजनम्।
वृषलीपतिसङ्गं च दूरतः परिवर्जयेत्॥
१८५ असच्छास्त्राभिगमनं खादनं नखकेशयोः।
तथैव नग्नशयनं सर्वदा परिवर्जयेत्॥
१८६ ग्रामस्थं सभां चैव तथैव च चतुष्पथम्।
देवतायतनं चैव नाऽपसव्यं व्रजेद् द्विजः॥
१८७ ताम्बूलमशुचिर्नाद्यात् तथा सुप्तं न बोधयेत्॥
१८८ पर्णमूले भवेद् व्याधिः पर्णाग्रे पापसम्भवम्।
चूर्णपर्णं हरेदायुः शिरा बुद्धिविनाशिनीम् (नी)॥

१८९ नाशुद्धोऽग्निं परिचरेन् न पूजां गुरुदेवयोः।
न वामहस्तेनैकेन पिबेद् वक्त्रेण वा जलम्॥
१९० न चाक्रामेद् गुरोश्छायां तदाज्ञां च न लङ्घयेत्।
न निन्द्याद् योगिनो विप्रान् व्रतिनोऽपि यतीश्वरान्॥
१९१ परस्परस्य मर्माणि कदाचिन्न वदेद् द्विजः॥
१९२ गृहे पररहस्यानि नैवोपश‍ृणुयाद् बुधः।
न ब्रूयात् पररन्ध्राणि प्रकाशं जनसंसदि॥
१९३ सूर्याचन्द्रमसौ चोभौ नक्षत्राणि च सर्वशः।
नोदीक्षेताशुचिर्नित्यं ग्रहानन्यांश्च मानवः॥
१९४ पतितव्यङ्गचाण्डालोच्छिष्टाद्यान् नावलोकयेत्।
अन्यदृष्टिगतैरेतैः सम्भाषेत नृणां वरः॥
१९५ आवासे भोजने चैव न त्यजेत् सहयायिनम्।
देवान् नृपानृषींश्चैव अनुसप्तपदं व्रजेत्॥
१९६ ब्राह्मणान् नृपतीन् वृद्धान् गाश्च साधून् शिशूनपि।
नाक्रोशेन् नावमन्येत पूजयेद् दैवतं यथा॥
१९७ नावगाहेदपो नग्नो वह्निं नातिक्रमेत् पदा।
शिरोऽभ्यङ्गावशिष्टेन तैलेनाङ्गं न लेपयेत्॥
१९८ अशुद्धः शयनं स्नानं स्वाध्यायं यानवाहनम्।
बहिर्निष्क्रमणं चैव न कुर्वीत कथञ्चन॥
१९९ स्वप्नमध्ययनं स्नानमुच्चारं भोजनं गतिम्।
उभयोः सन्ध्ययोर्नित्यं मध्याह्ने च विवर्जयेत्॥
२०० नावेक्षेताशुचिः कूपं धर्षयेन्न पदं पदा।
अग्नौ न प्रक्षिपेदग्निमाद्भिः प्रशमयेत् तथा॥
२०१ प्राणोपघातमन्येषां न शुद्धादिभिराचरेत्।
सुहृन्मरणमार्तिं वा स्वयं न श्रावयेत् परान्॥

२०२ अभियोगेण मित्राणि बालिश्यान्नैव पीडयेत्।
दाक्षिण्याद्धि दरिद्रोऽपि सहते मित्रपीडनम्॥
२०३ प्राणिनो हिंसितव्याश्च क्लिष्टघातं न घातयेत्।
अपण्यं कूटपण्यं वा विक्रये न प्रयोजयेत्॥
२०४ न वाह्निं विनिश्वासैर्ज्वालयेद् धर्मतत्त्ववित्। — ?
नावगूरेद् वृथा शस्त्रं गोगुरुस्त्रीकुमारके॥
२०५ पुण्यस्थानोदकस्थाने सीमान्तं वा कृषेन्न च।
न भिन्द्यात् समयं पूर्वमभ्युपेतं कदाचन॥
अविश्वासो हि पापिष्ठो भवेत् समयभेदनात्॥
२०६ निक्षेपोपनिधी प्राप्तौ तथैव पुनरर्पयेत्।
दत्त्वापनयनं चार्यैर्निरकद्वारमुच्यते॥
२०७ यः पापिष्ठो नरः कुर्यात् तिर्यग् योनिषु मैथुनम्।
वियोनिगमनाद् भूयः स वियोनिषु जायते॥
२०८ परस्परं पशून् बालान् पक्षिणो वा न योधयेत्।
परबाधान्न कुर्वीत जलवातायनादिभिः॥
२०९ कारयित्वा स्वकर्माणि कारून् पश्चान्न वञ्चयेत्।
कर्मानुरूपमेतेषां प्रयच्छेद् भक्तवेतनम्॥
२१० प्रतिवेश्मानुवेश्माभ्यामन्यत्र न निमन्त्रयेत्।
प्रदीप्तं गृहमासन्नमद्भिर्यायात् त्वरान्वितः॥
२११ सायं प्रातर्गृहद्वारं भिक्षार्थं नावघट्टयेत्।
न चिरं वासयेत् कन्यां स्वामी प्राप्तफलां गृहे॥
२१२ आत्मानं न शपेद् रोषान् नीरुजो न स्वपेद् दिवा।
न नखैर्विलिखेद् भूमिं गाश्च रात्रौ न संविशेत्॥
२१३ यः काष्ठपादुकारूढो गृहात् परगृहं व्रजेत्।
तं दृष्ट्वा तु दुराचारं सूर्यश्चैव निमीलति॥

२१४ आसनानि न कुर्वीत मृत्तिकाश्वत्थगोमयैः।
पालाशेन निशेपेण दन्तधावनमेव च॥
२१५ धीमाद्भिर्नाशुभं कर्म प्राणत्यागेऽपि संस्थिते।
इह लोके यतो निन्दा परलोकेऽधमा गतिः॥
२१६ इत्येवमादयो धर्माः गृहस्थस्य समीरिताः।
तेषां व्युत्क्रमणे राजन् प्रायश्चित्ती भवेद् द्विजः॥
[वानप्रस्थधर्माः]
२१७ सकलत्रोऽथवाप्येको गृहस्थो यो वनं व्रजेत्।
त्यक्तग्रामविधिः सर्वो वानप्रस्थः स उच्यते॥
२१८ सर्वप्राणिष्वनुक्रोशः॥
२१९ हृदयतुष्टिः॥
२२० अपायचिन्तनम्॥
२२१ सर्वोपभोगवर्जनम्॥
२२२ भूमिशिलातृणसिकताशर्कराणामन्यतमाधिशयनम्॥
२२३ सदा सत्त्वबोधः॥
२२४ धर्ममार्जवमनर्दनं चेति॥
२२५ जटिलत्वमग्निहोतृत्वं भूशय्याजिनधारणम्।
वने वासः पयोमूलनीवारफलवृत्तिता॥
२२६ प्रतिग्रहनिवृत्तिश्च त्रिःस्नानं ब्रह्मचारिता।
देवतातिथिपूजा च धर्मोऽयं वनवासिनः॥
[संन्यासाश्रमः; यतिधर्माः]
२२७ यस्यैतानि सुगुप्तानि जिह्वोपस्थोदरं गिरः।
संन्यसेदकृतोद्वाहो ब्राह्मणो ब्रह्मवर्च(चर्य)वान्॥
२२८ स भिक्षुः॥
२२९ अरागानुक्रोशप्रधानः॥

२३० कामायी॥
२३१ मुण्डितः॥
२३२ त्रिदण्डी॥
२३३ कमण्डलुपवित्रपात्रपादुकासनः॥
२३४ कन्थामात्रः॥
२३५ ज्ञानरतिः॥
२३६ आत्महृष्टः॥
२३७ बन्धुभिरसम्पृक्तः॥
२३८ निरपेक्षः॥
२३९ परातिक्रमक्षीणविगतपापः॥
२४० सममृत्काञ्चनः॥
२४१ स्वमात्रास्वसक्तः॥
२४२ मध्यस्थः॥
२४३ तुल्यारिमित्रः॥
२४४ निष्परिग्रहः॥
२४५ ब्रह्मवादी॥
२४६ मङ्गलव्यवहारसंस्कारजीवहिंसारत्नधनधान्यविषयोपभोगसम्पर्केर्ष्यादर्पमोहमायाहर्षविरोधविस्मयविवादत्रासवितर्कतन्द्रश्चेति यतिधर्माः॥
२४७ नित्यं प्रस्यादित्ये निवृत्तमुसलोद्यमे प्रशान्तधूमे काले ग्रामं प्रविश्य भैक्षार्थं सर्वतः पर्यटन् अग्रतो युगमात्रमवलोक्य सङ्कलितानि विवृतद्वाराणि अन्यवचनेऽनासक्तः प्रविशेत्॥
२४८ प्रविष्टः सङ्कल्पप्रणयकुहकविस्मयविलम्बनपरिहासयाचनाप्रेक्षितादि परिहरेत्॥
२४९ गोदोहमात्रं स्थित्वा व्रजेत्॥

२५० भिक्षां लब्ध्वा न प्रहृष्येत्॥

२५१ अलब्ध्वा न क्रुध्येत्॥

२५२ अन्त्यावसायिपरिपन्थिज्ञातीश्वरप्रेतसूतकभिक्षां नोपलभ्यां
प्रतिहतां गृह्णीयात्॥

२५३ आत्मनः संस्कृतां परबाधकरीं वर्जयेत्॥

२५४ उदक्याशवचाण्डालचौरनग्नकपालिकान्।
पतितान् पिशुनान् स्पृष्ट्वा भिक्षां भिक्षुः परित्यजेत्॥

२५५ मधुमांसकुबीजविरहितां गृहीत्वा तद्भैक्ष्यमेकान्ततो तेन
पात्रेणाऽन्येन वा तूष्णीं भूत्वा मात्रया भुञ्जीत॥

२५६ दृष्टं भ्रूणघ्नपाषण्डैः कुष्ठ्यादिभिरुदक्यया।
श्वषण्ढकाकचाण्डालैरन्यैरन्त्यावसायिभिः॥
एतान् पश्यन्न भुञ्जीत भुक्त्वा चान्द्रायणं चरेत्॥

२५७ पतितान्नं सकृद् भुक्त्वा प्रायश्चित्ती भवेद् यतिः।
तप्तकृच्छ्रत्रयं कृत्वा शुध्यते नात्र संशयः॥

२५८ व्रणात्तु कृमिसम्भूतौ भक्षणे मधुमांसयोः।
उपवासत्रयं कृत्वा प्राणायामशतं चरेत्॥

२५९ यूकायाः शतसम्भूतावुपवासं समाचरेत्॥

२६० ताम्बूलभक्षणेऽभ्यङ्गे कांस्यपात्रे च भोजने।
एकैकातिक्रमे तेषां प्राणायामशतं चरेत्॥

२६१ अदण्डो न गृहं गच्छेदिषुक्षेपत्रिकाद् वने।
यदि गच्छेत् प्रतिगृहं प्राणायामत्रयं चरेत्॥

२६२ परिव्राजको दीक्षाप्रभृति सर्वारम्भान् परित्यजेत्॥

२६३ चतुर्मासान्तरं केशश्मश्रूण्यपनयेत्॥

२६४ नाधौतः श्मश्रुरोमाणि॥

२६५ विद्याचारकुलवयोवृत्तानि परेभ्यो न कथयेत्॥

२६६ न चिरमेकत्र वसेत्॥
२६७ अन्यत्र वार्षिकात्॥
२६८ श्रावणादिश्चतुर्मासिको वार्षिकः कालः॥
२६९ अतो हेमन्तः प्रत्यासन्नः॥
२७० शिशिरो हेमन्ततः प्रविष्टः॥
२७१ ग्रीष्मे वसन्तः॥
२७२ शरद् वर्षासु॥
२७३ आददीत प्रवृत्तेभ्यः साधुभ्यो धर्मसाधनम्।
नाददीत निवृत्तेभ्यः प्रमादेनापि किञ्चन॥
२७४ रथ्यायां बहुवस्त्राणि भिक्षा सर्वत्र लभ्यते।
भूमिशय्याऽस्ति विस्तीर्णा यतयः केन दुःखिताः॥
२७५ सर्वसङ्गपरित्यागी यतिर्यदि मठाधिपः।
तस्यैव निष्कृतिर्नास्ति चाण्डालात् जनगर्हितात्॥
२७६ स्नानादिनित्यकर्माणि ब्रह्मविद्यामथापि वा।
दण्डादीन् वा परित्यज्य प्रवर्तेत यदा यतिः॥
२७७ नानागृहेषु भिक्षान्नव्यवहारेषु वसतेः।
ग्रामार्थं शिष्यरक्षार्थं धनार्जनपरायणः॥
२७८ परिव्राट् पतितः स स्यात् न तं सम्भाषयेत् क्वचित्।
नमस्कारं न कुर्वीत यदि कुर्यात् स पातकी॥

२७९ स्वप्नस्कन्ने दुर्बलत्वात् प्राणायामास्तु षोडश॥
२८० रेतःसेकं क्वचिद्भिक्षुः कुर्यान्मोहात्तु कामतः।
प्राजापत्यत्रयं कृत्वा प्राणायामशतं चरेत्॥
२८१ स्वभावतो दिवा स्कन्ने प्राजापत्यं समाचरेत्॥

२८२ स्त्रियं दृष्ट्वा यदा स्वप्ने रेतः क्षराति वै क्वचित्।
सवासाऽऽप्लुत्य शुद्ध्यर्थं कुर्यात् षोडशसंयमान्॥
२८३ उपवासं यतिः कुर्यात् पुनः सुप्तः क्षरेद् यदि।
प्राणायामैर्विशुद्धात्मा विरजो जायते पुनः॥

२८४ उपेत्य तु स्त्रियं कामात् प्रायश्चित्तं विधीयते।
प्राणायामसमायुक्तं कृच्छ्रमब्दं समाचरेत्॥
२८५ तथैव च पुनः श्रान्तः कुर्यात् सान्तपनं व्रतम्।
तपश्चारितनिर्देशात् कृच्छ्रस्यान्ते समाहितः॥
२८६ पुनश्चाश्रममागत्य चरेद् भिक्षुरतन्द्रितः॥
पाराकं त्रिकलं च सकृद् गत्वा स्त्रियं चरेत्॥
त्रिरात्रमेवमभ्यासे संवत्सरात्रिकं व्रजेत्॥
२८७ गृहस्थश्च यतिश्चैव खण्डितो यदि कामतः।
पराकत्रयसंयुक्तमवकीर्णिव्रतं चरेत्॥
२८८ स्कन्न इन्द्रियदौर्बल्यात् स्त्रियं दृष्ट्वा यतिर्यदि।
तेन धारयितव्या वै प्राणायामास्तु षोडश॥
२८९ इच्छया यदि तां पश्येत् प्राणायामास्तु षोडश।
रात्रौ तु क्षरणे स्नात्वा द्वादशैव तु धारयेत्॥
२९० स्वप्नसेके प्रबुद्धश्च मृद्भिर्द्वादशभिर्यतिः।
शौचं कृत्वा विशुध्येत षोडशप्राणसंयमैः॥
२९१ रात्रिशेषे यदा स्वप्ने रेतो मूत्रं च बापयेत्।
स्नानं कृत्वा विशुध्येत षोडशप्राणसंयमैः॥
२९२ पुनः प्रसङ्गे सुप्तस्य द्विगुणं तु विधीयते।
स्कन्ने ज्ञाते तु सुप्तश्चेदुपवासस्तदा भवेत्॥

२९३ आलिङ्गनादिषु स्कन्ने वियोगे चेन्द्रियैर्यदा।
कृच्छ्रार्द्धेन जपेद्लक्षं ततः शुद्धिमियाद् यतिः॥
२९४ संशयश्चेत् कृते तस्मिन् पुनः शौचं समाचरेत्।
प्राणायामशतं कृत्वा तस्माद् भिक्षुर्विशुध्यति॥

[वर्णा अनुलोमाः प्रतिलोमा अन्तरालाः मिश्रजाश्चेति]
२९५ ब्राह्मण्यां ब्राह्मणात् जातः संस्कृतो ब्राह्मणो भवेत्।
एवं क्षत्रियविट्शूद्रा ज्ञेयाः स्वेभ्यः स्वयोनिजाः॥

२९६ व्रतहीनास्त्वसंस्कार्याः सवर्णास्वपि ये सुताः।
उत्पादिताः सवर्णेन व्रात्या इव बहिष्कृताः॥
२९७ द्वितीयेन तु यः पित्रा सवर्णायां प्रजायते।
अवरीट इति ख्यातः शूद्रधर्मा स जातितः॥
[अनुलोमाः]
२९८ ब्राह्मणात् क्षत्रियायां तु समुत्पन्नः सवर्णकः।
वैश्यायां ब्राह्मणात् जातः पुत्रोऽम्बष्ठ इति स्मृतः॥
२९९ विप्रात् निषादः शूद्रायां जातः पारशवोऽपि सः।
वैश्यायां क्षत्रियात् जातः सवर्णः स च संज्ञया॥
३०० शूद्रायां क्षत्रियात् जातं प्राहुरुग्र इति द्विजाः।
वैश्याच्छूद्रस्य कन्यायां शूद्र एव प्रजायते॥
[प्रतिलोमाः]
३०१ शूद्रादायोगवक्षत्तृचण्डालाः प्रतिलोमजाः।
वैश्यायां क्षत्रियायां च ब्राह्मण्यां च यथाक्रमम्॥
३०२ तथैव मागधो वैश्यात् जातो वैदेहिकोऽपि च।
ब्राह्मण्यां क्षत्रियात् जातः सूतो जात्या स्वकर्मणा॥

[अन्तरालाः]

303 उग्रान्निषाद्यामुत्पन्नस्तनयः कुक्कुटो भवेत्।
ततो निषादाच्छूद्रायां जातो भवति पुल्कसः॥
304 वैदेहकेन त्वम्बष्ठ्यां जातो वेन इति स्मृतः।
वैदेहकायामम्बष्ठाद् भवेत् जातः कुशीलवः॥
305 जले स्थले च यो मार्गस्तत्र रक्षां करोति यः।
राजदूतो वाद्यजीवो भवेत् कीर्तिप्रकाशकः॥
306 क्षत्त्र्यां तथोग्रजः पुत्रो श्वपाक इति कीर्त्यते।
अन्तराला भवन्त्येवमेते चान्ये च मिश्रजाः॥

[मिश्रजाः]

307 देवब्राह्मणबालस्त्रीदीनान्धकृपणैस्तु यत्।
उपार्जितं धनं तस्य परित्यागात् तु दस्यवः॥
308 ब्राह्मण्यामथ वैश्येन वैदेहो नाम जायते।
एते द्वादश विधन्तो मूलप्रकृतिभिर्युताः॥
भवन्ति पञ्चदश वै विप्रः षोडशको भवेत्॥
309 रक्षिता राजदुर्गाणां तद्वृत्तिपरसंयुतः।
क्षत्रियायां तु वैश्येन मुञ्चको नामतो भवेत्॥
310 वैश्येन शूद्र्यां करणो वर्णः स्यात् प्रकरोति सः।
दुर्गान्तःपुरगञ्जानां रक्षां ब्राह्मणसङ्ग्रहम्॥
311 वैदेहमागधावेतौ करणश्चेति ते त्रयः।
वर्णेभ्यः पूर्ववत् पुत्रान् जनयन्ति विमोहिताः॥
312 ते च षोडश जायन्ते मूलप्रकृतिभिः सह।
दुष्टानि वैश्यकर्माणि तेऽपि कुर्वन्ति दस्यवः॥
313 ब्राह्मण्यामथ शूद्रेण चण्डालः स्यात् जुगुप्सितः।
स चक्रे राजमार्गादिशोधनं च कुकर्म च॥

३१४ राजस्त्रियां च शूद्रेण क्षत्तामैन्द्रश्च जायते।
आविध्यमथ गोधानां स चक्रे वधबन्धनात्॥
३१५ आयोगवस्तु शूद्रेण वैश्यायां तु भवेच्च सः।
तक्षास्थप्रतिरिसुक्तो राज्ञां वेश्मकरः सदा॥
३१६ आयोगवस्तथा क्षत्ता चण्डालश्चापि ते त्रयः।
चतुर्वर्णासु तनयान् जनयन्त्यथ पूर्ववत्॥
३१७ शूद्रेण सहितास्ते तु सन्ति षोडश सङ्ख्यया।
दुष्टानि यानि कर्माणि तेऽपि कुर्वन्ति दस्यवः॥
३१८ एते विप्रादयो ज्ञेयाश्चतुःषष्टिषु योनिषु।
उत्पादयन्ति सदृशान् सङ्कीर्णानन्ययोनिषु॥

३१९ तेषां सवर्णजाः श्रेष्ठास्तेभ्योऽन्वगनुलोमजाः।
अन्तराला बहिर्वर्णाः पतिताः प्रतिलोमजाः॥
३२० माहिषीत्युच्यते भार्या सा चैव व्यभिचारिणी।
तस्यां यो जायते गर्भः स वै माहिषिकः स्मृतः॥

[चण्डालधर्माः।]

३२१ स्वजातिजीवनम्॥
३२२ सर्वप्रणामः॥
३२३ तितिक्षा॥
३२४ व्यवहारशुद्धिः॥
३२५ अपरावमानः॥
३२६ स्वभृत्यपोषणम्॥
३२७ स्वकर्मानुष्ठानम्॥
३२८ प्रधानकर्मवर्जनमिति चण्डालधर्माः॥

# ॥तृतीयं प्रकरणम्॥

## ॥संस्काराः॥

३२९ चित्रकर्म यथानेकैरङ्गैरुन्मील्यते शनैः।
ब्राह्मण्यमपि तद्वत् स्यात् संस्कारैर्विधिपूर्वकैः॥

[संस्काराः]

330 गर्भाधानं पुंसवनं सीमन्तो जातकर्म च।
नामान्नप्राशने चौलं मौञ्जी व्रतचतुष्टयम्॥
गोदानाख्यं स्नातकं च विवाहः पैतृमेधिकम्॥

[गर्भाधानम्]

३३१ ऋतुकालेऽभिगमनं भर्त्रा कार्यं प्रयत्नतः।
पुंसवादीनि कर्माणि बान्धवैर्वापि कारयेत्॥

३३२ स्नानवत्यामृतौ पत्न्यां गर्भाधानं समाचरेत्।
चतुर्थेऽहनि वा राजन् पञ्चमेऽहनि तद्भवः(वेत्)॥

333 कृत्वाऽभ्युदयिकं प्रातस्तद्रात्रौ मन्त्रपूर्वकम्।
गर्भाधानं ततः कुर्यात् सर्वगर्भविशुद्धिदम्॥

३३४ अन्यथा दोषमाप्नोति गर्भपातीह गद्यते॥

३३५ तद्दोषपरिहारार्थं गर्भशुद्ध्यर्थमेव हि।
प्राजापत्यत्रयं कुर्यात् द्वितीये पुनरार्तवे॥
अन्यथा गर्भपाती स्याद् यथा जारस्तथैव सः॥

३३६ न तत्र प्रतिगर्भं तु निषेको मन्त्रसंहितः॥
३३७ सकृच्च संस्कृता नारी सर्वगर्भेषु संस्कृता।
यं यं गर्भं प्रसूयेत स सर्वः संस्कृतो भवेत्॥
३३८ ऋतुकालेऽभिगमनं पुंसा कार्यं प्रयत्नतः।
सदैव पर्ववर्जं च स्त्रीणामभिमतं हि तत्॥
३३९ निषेधस्तु निवृत्त्यात्मा कालमात्रमपेक्षते॥
३४० यः स्वदारानृतुस्नाताज् स्वस्थः सन् नोपगच्छति।
भ्रूणहत्यामवाप्नोति गर्भं प्राप्तं विनाश्य सः॥ १
३४१ ऋतौ नोपैति यो भार्यामनृतौ यश्च गच्छति।
तुल्यमाहुस्तयोः पापमयोनौ यश्च सिञ्चति॥
३४२ प्रेतादिश्राद्धकालेषु पञ्चपर्वसु यो द्विजः।
भार्यामृतुमतीं स्नातां यो गच्छेत् स तु पापभाक्॥
३४३ अशुद्धिदिवसेष्वेतां मैथुनार्थं यदि व्रजेत्।
आयुः प्रजा च धर्मश्च तस्य पुंसः प्रहीयते॥
३४४ तस्मात् त्रिरात्रं चाण्डालीं पुष्पितां परिवर्जयेत्।
अवेक्षेत च तां नित्यं रथ्याभस्मनिषेवणैः॥
३४५ एतेष्वपि त्र्यहं पूर्वं वर्जयित्वा रजस्वलाम्।
शुद्धां स्नातां ततो भार्यां समेयुः पुत्रकारणात्॥
३४६ ब्राह्मण्या द्वादशाहं स्याद् वेदोक्तमृतुधारणम्।
दशाष्टौ षट् च शेषाणां विधीयन्तेऽनुपूर्वशः॥
३४७ यौगपद्ये तु तीर्थानां विप्रादिक्रमशो व्रजेत्।
रक्षणार्थमपुत्रां वा ग्रहणक्रमशोऽपि वा॥
३४८ त्रीणि वर्षाण्यृतुमतीं यो भार्यां नोपगच्छति।
स तुल्यं भ्रूणहत्याया दोषमृच्छत्यसंशयम्॥

३४९ अतीर्थगमनात् पुंसस्तीर्थसंदूहनात् स्त्रियाः ×
उभयोर्धर्मलोपः स्याद् द्वेषेण तु विशेषतः॥
३५० पलाशदशसाहस्रात् सावित्रेण दलं प्रति।
स्नापयेत् सपवित्रेण एकादश्यां प्रजार्थिनी(नीम्)॥ ×

[पुंसवनं, सीमन्तश्च]

३५१ सीमन्तः प्रथमे गर्भे चतुर्थे मासि शस्यते।
अथवा दैवयोगेन कुर्यात् षष्ठेऽष्टमे द्विजः॥
३५२ पुंसवं तत्र कुर्वीत सीमन्तेन सहैव वा॥

[जातकर्म]

३५३ जाते पुत्रे पिता श्रुत्वा सचैलं स्नानमाचरेत्।
ब्राह्मणेभ्यो यथाशक्ति दत्त्वा पुत्रं विलोकयेत्॥
३५४ यमलौ युगपत् जातौ मातुर्योनिविभेदनात्।
तयोर्ज्येष्ठः पूर्वजः स्याद् द्वितीयोऽनुज एव हि॥
३५५ यस्य जातस्य यमयोः पश्यन्ति प्रथमं मुखम्।
सन्तानः पितरश्चैव तस्मिन् ज्यैष्ठ्यं प्रतिष्ठितम्॥
३५६ जाते पुत्रे पिता स्नात्वा सचैलं जातकर्मणि।
हेम्ना वा धान्यजातेन जातश्राद्धं समाचरेत्॥
३५७ अच्छिन्ननाभिं तं पुत्रं पिता पश्येत् प्रयत्नतः।
ये पुत्रमुखमीक्षन्ते स्वर्गद्वारमपावृतम्॥
३५८ पुत्रं दृष्ट्वा तथा भूमौ जातकर्म समाचरेत्।
फलीकरणमिश्रैश्च सर्षपैर्वाऽऽहुतीर्यजेत्॥
३५९ अजस्राग्निस्तदा तिष्ठेद् यावदाशौचनिर्गमः।
दशरात्रं पिता कुर्यादेवं पुत्राभिवृद्धये॥
३६० नैमित्तिके च कर्तव्ये स्नानदाने च रात्रिषु।
पुत्रजन्मनि स्नानं च नैमित्तिकमितीरितम्॥

३६१ ग्रहणोद्वाहसङ्क्रान्तियात्रासु प्रसवेषु च।
दानं नैमित्तिकं कार्यं रात्रावपि न दुष्यति॥
३६२ देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनाम्।
आयान्ति पुण्यं तदहः स्नानदानादिकर्मसु॥
३६३ मृताशौचेऽपि कर्तव्यं जातुकर्ण्योऽब्रवीद् वचः॥
३६४ मृताशौचे समुत्पन्ने पुत्रजन्म यदा भवेत्।
अशौचे निर्गते कुर्यात् जातकर्म च नाम च॥
३६५ जननाशौच उत्पन्ने पुत्रजन्म यदा भवेत्।
जननानन्तरं कुर्यात् जातकर्म यथाविधि॥
३६६ प्रतिग्रहो न दोषाय नाभिच्छेदनतः पुरा।
नालस्य छेदनादूर्ध्वमपि तस्मिन् प्रतिग्रहः॥
दिने न दोषायेत्याह मनुर्वृद्धस्तु धर्मवित्॥
३६७ जाते कुमारे तदहः कामं कुर्यात् प्रतिग्रहम्।
हिरण्यधान्यगोवासस्तिलानां मधुसर्पिषोः॥
३६८ जातकर्म न कुर्वीत पूर्वजो यदि नास्तिकात् (कः)।
व्रतकाले च तत् कर्म कुर्याद् विधिपुरस्सरम्॥
प्राजापत्यद्वयं कुर्यात् चौले वा नामकर्मणि॥

[नामकर्म।]

३६९ एकादशेऽह्नि सम्प्राप्ते पितरौ नामकर्म यत्।
कुर्यातां तस्य सम्पत्तिरायुषां तत्र लक्षणात्॥

[अन्नप्राशनम्।]

३८० षष्ठे मास्यष्टमे वाऽथ पुंसां स्त्रीणां च पञ्चमे।
सप्तमे मासि वा कार्यं नवान्नप्राशनं शुभम्॥

३८१ शिशूनां भोजने राजन् कालः षण्मास ईरितः।
तदतिक्रमणे नास्ति मुख्यकालो द्विजन्मनाम्॥

[कर्णवेधः।]

३८२ कर्णरन्ध्रे रवेश्छाया न विशेदग्रजन्मनः।
तं दृष्ट्वा विलयं यान्ति पुण्यौघाश्च पुरातनाः॥

३८३ तस्मै श्राद्धं न दातव्यं यदि चेदासुरं भवेत्॥

[चूडाकर्म।]

३८४ चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः।
प्रथमेऽब्दे द्वितीये वा कर्तव्यं श्रुतिदर्शनात्॥

३८५ सीमन्ते पुंसवे चैव चौलकर्मणि यो द्विजः।
असगोत्रस्तदन्नादः सुरापीत्युच्यते बुधैः॥

३८६ चौलकर्मणि सीमन्ते मुहूर्ताद् भोजने परम्।
सुरापानसमं प्रोक्तमतो नेच्छन्ति सूरयः॥

[अक्षरारम्भः।]

३८७ उदग्गते भास्वति पञ्चमाब्दे
प्राप्तेऽक्षरस्वीकरणं शिशूनाम्।
सरस्वतीं विष्णुविनायकौ च
गुडोदनाद्यैरभिपूज्य कुर्यात्॥

[उपनयनम्।]

३८८ प्रथमं मातापितृभ्यां गर्भाधानादिभिः संस्कृतो गर्भाष्टमे वर्षे उपनयनार्हो भवति॥

३८९ तत्रोपाध्यायः पिता॥

३८० माता गायत्री॥

३८१ एवमुपनीतो द्विपितृको द्विजातिः स्यात्॥

३८२ गर्भाष्टमेऽष्टमे वाब्दे ब्राह्मणस्योपनायनम्।
गर्भैकादशमे (गर्भादेकादशे) राज्ञो वैश्यं द्वादशवार्षिकम्॥

३८३ अतः परमष्टाचत्वारिंशद्वार्षिकीं वेदव्रतचर्यामातिष्ठेत्॥

३८४ अशक्तश्चेत् षट्त्रिंशद्वार्षिकीं चतुर्विंशतिवार्षिकीं
द्वादशवार्षिकीं वा॥

[उपाकर्म]

३८५ वेदान्तानां च वेदानामधीतानां च वीर्यदम्।
ब्रह्मचारिगृहस्थानां सर्वपापहरं शुभम्॥

३८६ संवत्सरे तु पापस्य गृहस्थब्रह्मचारिभिः।
कृतस्य तु विशोधाय उपाकर्म समाचरेत्॥

३८७ उपाकर्म तथोत्सर्गं वनस्थानामपीष्यते।
धारणाध्ययनं कृत्वा गृहिणां ब्रह्मचारिणाम्॥

[वेदव्रतचतुष्टयम्]

३८८ प्राजापत्यं तथा सौम्यमाग्नेयं वैश्वदेवकम्।
चत्वारि वेदसंज्ञानि व्रतानि सुमहान्ति च॥

३८९ प्राजापत्यमृचां वेदः सौम्यं याजुषमेव च।
आग्नेयं सामवेदश्च वैश्वदेवं चतुर्थकम्॥

३९० एतानि कुरुते यस्तु द्विजः पापात् स मुच्यते॥

३९१ कालातिक्रमणे कुर्यात् प्रायश्चित्तं विधानतः।
कृच्छ्रं द्वादशरात्रं तु हुत्वाऽऽज्याहुतीः शतम्॥
३९२ अष्टाविंशतिरष्टौ वा क्रमात् कुर्याद् व्रतानि हि।
अत्यये यावदभ्यस्तं वेदं तावत् पुनः पठेत्॥

[गोदानम्।]

३९३ षोडशे वर्षके राजन् विप्राणां पापनाशनम्।
गोदानिकं महत् कर्म कुर्याद् विप्रः समाहितः॥
यः कुर्यात् कर्मसम्पूर्तिं भवेद् विप्रः स पुण्यभाक्॥

[विवाहः।]

३९४ ब्राह्मो दैवस्तथा चार्षः प्राजापत्यस्तथाऽऽसुरः।
गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमो मतः॥
३९५ तिस्रः कन्या यथान्यायं पालयित्वा निवेद्य च।
न पिता नरकं याति नारी वा स्त्रीप्रसूतिनी॥
३९६ ततो विनीतां कल्याणीं कन्यां कुलवयोऽन्विताम्।
अलङ्कृत्याऽर्हते दद्याद् विवाहो ब्राह्म उच्यते॥
३९७ अन्तर्वेदि समानीय कन्यां कनकमण्डिताम्।
ऋत्विजे तु ददात्येनां विवाहो दैवसंज्ञकः॥
३९८ प्रदानं यत्तु कन्यायाः सह गोमिथुनेन च।
शस्ताय चासगोत्राय तमार्षमृषयो विदुः॥
३९९ सहधर्मक्रियाहेतोर्दानं समयबन्धजात्।
अलङ्कृत्यैव कन्याया विवाहः स प्रजापतेः॥

४०० एते विवाहाश्चत्वारो धर्म्यास्तोयप्रदायकाः।
अशुक्ला ब्राह्मणाश्चैव तारयन्ति द्वयोः कुलम्॥
४०१ चतुर्ष्वेतेषु दत्तायामुत्पन्नास्तनयाः स्त्रियाम्।
दातुः प्रतिग्रहीतुश्च पुनन्त्यासप्तमं कुलम्॥
४०२ विविक्ते स्वयमन्योन्यं स्त्रीपुंसोर्यः समागमः।
प्रीतिहेतुः स गान्धर्वो विवाहः पञ्चमो मतः॥
४०३ शुल्कं प्रदाय कन्यायाः प्रत्यादानं विधानतः।
वित्तहेतुर्विवाहोऽयमासुरः षष्ठ उच्यते॥
४०४ विक्रमेण प्रसह्य स्यात् कुमारीहरणं पुनः।
वीर्यहेतुर्विवाहः सः राक्षसः सप्तमो मतः॥
४०५ सुप्तान्मत्ताच्च कन्यायाः हरणं व्यसनादपि।
प्रमादहेतुः पैशाचो विवाहोऽष्टम उच्यते॥
४०६ एतान् सशुल्कान् सामान्यान् विवाहांश्चतुरो विदुः।
केवलं क्षत्रियस्यैव वीर्यवत्त्वाद्धि राक्षसः॥
४०७ गान्धर्वादिविवाहेषु पुनर्वैवाहिको विधिः।
कर्तव्यश्च त्रिभिर्वर्णैः समयेनाग्निसाक्षिकः॥ ×

४०८ कुलशीलवयोवृत्तरूपाढ्यां नग्निकां शुभाम्।
विधिना तु नरः कन्यामुद्वहेदात्मनः समाम्॥
४०९ सप्ताब्दात् कन्यका नाम्नी शैशवी स्याच्छुभान्विता।
तामष्टादशवर्षीयो विवहेद् विधिवत् पुमान्॥
४१० षाडष्टवर्षा भवेद् गौरी पुत्रपौत्रप्रवर्धिनी।
पञ्चविंशतिवर्षीयस्तां कन्यामुद्वहेद् द्विजः॥
४११ रोहिणी नववर्षा स्याद् धनधान्यविवर्धिनी।
तामुद्वहेत मतिमान् सर्वकामार्थसिद्धये॥

४१२ ऊर्ध्वं दशाब्दाद् या कन्या प्राग्रजोदर्शनात्तु सा।
गान्धारी स्यात् समुद्वाह्या चिरं जीवितुमिच्छता॥
४१३ पितृगृहे तु या कन्या रजः पश्यत्यसंस्कृता।
सा कन्या वृषली ज्ञेया तद्भर्ता वृषलीपतिः॥
४१४ अनूढे भ्रातरि ज्येष्ठे यवीयान् सपरिग्रहः।
ज्येष्ठः स परिवित्तिः स्यात् परिवेत्ता तथाऽनुजः॥
विवाहे राज्यलाभे च श्रेयसां व्युत्क्रमेऽपि च॥
४१५ तेषां वृत्तिं विधायाऽऽशु कदाचित् तान् विवाह्य च।
पश्चात् परिणयेत् कन्यां न दोषस्तत्र पार्थिव॥
४१६ पञ्चमात् सप्तमादूर्ध्वं मातृतः पितृतः क्रमात्।
सपिण्डता निवर्तेत सर्ववर्णेष्वयं विधिः॥
४१७ सन्निकर्षेऽपि कर्तव्यं त्रिगोत्रात् परतो यदि॥
४१८ मातुः स्वसृकुले कन्यां परिणीय स्वबन्धुतः।
पश्चात् ज्ञात्वा परित्याज्या स्वसा माता तु धर्मतः॥
४१९ अग्रजा येषु वंशेषु स्त्रीप्रजाप्रसवास्तथा।
पतिघ्न्यश्च स्त्रियो यत्र तानि यत्नेन वर्जयेत्॥
४२० रेतोऽस्य प्लवते नाप्सु चाप्सु ह्लादि मूत्रं च फेनिलम्।
पुमान् स्यात् लक्षणैरेतैर्विपरीतं नपुंसकम्॥
४२१ न मूत्रं फेनिलं यस्य विष्ठा चाप्सु निमज्जति।
मेढ्रश्चोन्मादशुक्राभ्यां हीनः क्लीबः स उच्यते॥
४२२ युगपद् यत्र वर्तेते चिह्नात् तत्र नपुंसकम्॥
४२३ षण्ढको हीनलिङ्गः स्यात् संस्कारार्हश्च नैव सः॥

४२४ प्रायश्चित्तेषु दानेषु प्रतिष्ठासु व्रतेषु च।
विवाहादिषु सर्वत्र नान्दीश्राद्धं समाचरेत्॥
नान्दीश्राद्धं तदा कुर्यात् सर्वकर्माभिवृद्धये।

४२५ विवाहे वितते तन्त्रे होमकाले उपस्थिते।
वधूः पश्येत् तदा पुष्पं प्रथमं दोषसम्भवम्॥
४२६ सा वधूः शूद्रकन्या स्यात् तत्पतिर्वृषलोपमः॥
तयोः पुत्रास्तु वृषलास्ते यान्ति नरकं ध्रुवम्॥

४२७ उद्वाहौपासनात् पूर्वमनष्टे संस्थिते सति।
महान् दोषो भवत्यत्र पत्नौ जायापरिग्रहे॥

[यज्ञसंस्थाः।]

४२८ हुतः प्रहुतोऽहुतः शूलगवो बलिहरणं प्रत्यवरोहणमष्टकाहोम इति पाकयज्ञसंस्थाः सप्त॥
४२९ अग्निहोत्रमग्न्याधेयं दर्शपूर्णमासौ–आग्रयणमयनयज्ञश्चातुर्मास्यानि सौत्रामणीति–इमा हविर्यज्ञसंस्थाः सप्त॥
४३० अग्निष्टोमोऽत्यग्निष्टोम उक्थः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्यामः–इतीमाः सोमसंस्थाः सप्त॥
४३१ एकविंशतिविधो यज्ञश्चाध्वरवेदोक्तः॥
४३२ वाजपेयाश्वमेधराजसूयपौण्डरीकगोसवादयो महायज्ञाः क्रतवः॥
४३३ एतावदिति कालमुद्दिश्य यज्ञानुष्ठानं सत्रम्॥
४३४ पक्वापक्वान्नेन पञ्चयज्ञप्रवृत्तिर्हुतम्॥
४३५ देवेभ्यो होमः स्मार्तेऽग्नौ प्रहुतः॥

४३६ ब्राह्मणाय पक्वान्नदानमहुतः॥
४३७ बलिहरणं शूलगवः स्मार्त एव॥
४३८ पुंगवः पशुयागः॥
४३९ बलिहरणं सर्पबलिहरणम्॥
४४० प्रत्यवरोहणं मार्गशीर्षप्रत्यवरोहणम्॥

४४१ नाग्निहोत्रं समाधाय जीवितार्थमपि त्यजेत्।
सर्वे वेदास्तदर्था हि लोके ब्राह्मणजन्म च॥
४४२ अथान्वारम्भणीयस्य लोपं विप्रो न कारयेत्।
कुर्याद् यदिह मूढात्मा पतितोऽभून्न संशयः॥
४४३ प्रथमायां पौर्णमास्यां वोढा देवाहुतीर्यजेत्।
अग्निस्तथा च विष्णुश्च सरस्वांश्च सरस्वती॥
अग्निश्च भगिनी चैव स्विष्टकृद्देवतास्त्वमूः॥
४४४ प्रथमायां पौर्णमास्यामन्वारम्भणमिष्यते।
या तत्र देवता हूतास्ताः सर्वा वरदास्तयोः॥
४४५ प्रतिपद्धोमलोपस्तु शुक्ले कृष्णे तथैव च।
महान्तं दोषमाप्नोति नरकं चाधिगच्छति॥

४४६ आश्लेषा कृत्तिका ज्येष्ठा मूलाजपदकेषु च।
भृगुभौमदिने रिक्तातिथौ नाद्यान्नवौदनम्॥
४४७ नवधान्ये समायाते ब्राह्मणो ब्रह्मवित्तमः।
व्रीह्यादीनां नवानां च शुद्ध्यर्थं मुनिचोदितम्॥
४४८ स्थालीपाकं तथा कृत्वा हुत्वाऽऽग्रयणदेवताः।
शेष(षं) चरुं प्रभुञ्जीत ब्राह्मणैर्ब्रह्मवित्तमैः॥
४४९ आस(अश)ने रक्तस्रावी स्यादतो दोषे महत्तरे॥

४५० कृत्वाऽनुष्ठानादिवसाद् याजनाद्यग्निहोत्रकम्।
एवत्वा यदि प्रवर्तेत भ्रूणहत्यामवाप्नुयात्॥
४५१ दर्शश्च पूर्णमासश्च पशुश्च सोमयाजिनः।
तयोर्लोपं न कुर्वीत बहुधा यत्नतश्चरेत्॥
४५२ सोमयाजी तदा कुर्यात् यदा मासः प्रवर्तते।
तत्रैव पिण्डयज्ञः स्यादनन्तफलदायकः॥
४५३ स्थालीपाको यदा वह्नौ शान्ते तत्र महाभयम्।
ततः कृत्वा कायकृच्छ्रं विप्रः कुर्यादनन्तरम्॥
४५४ पूर्वोक्तं तत्र कुर्वीत प्रायश्चित्तं यथाक्रमम्॥
४५५ स्थालीपाकात् परं राजन् उभयोर्हौतृकर्मणि।
अभावे नित्यहोमस्य पतिः पत्नी रुजार्दितौ॥
४५६ तयोरेकतराभावे नित्यहोमोऽत्र दोषभाक्।
तयोरेकमवस्थाप्य अग्निसान्निध्यमादरात्॥
४५७ महासान्तपनं कृत्वा अध्वर्युर्होममाचरेत्।
पत्नीसमक्षविषये उद्देशत्यागकारकः॥

(लाङ्गलयोजनम्)

४५८ यो लाङ्गले तु सम्पूज्य कृष्यारम्भमहोत्सवे।
गन्धैः पुष्पैस्तथा धूपैर्माल्यै रत्नैः पृथक् पृथक्॥
सदक्षिणै र्द(र्वि)धानेन होमैर्ब्राह्मणतर्पणैः॥

४५९ ततः शान्तिविमुक्तेन ब्रह्मनादेन भूरिणा।
हलयेद् वाहयेद् भूमिं स्वयं स्नातः स्वलङ्कृतः॥

४६० पूर्वोत्तरां दिशं गच्छेत् क्रमात् पौरन्दरीं शुभाम्।
कृत्वा प्रदक्षिणावृत्तिमीशानाभिमुखस्ततः॥
४६१ विमुच्य वृषभं बीजं पुरुषो लक्षणान्वितः।
तुष्टः सुवासाः स्रग्वी च सुवर्णे जलसेचकः॥
सुवर्णपात्रसंयुक्तं प्राङ्मुखो निर्वपेत् भुवि॥
४६२ उप्त्वा बीजं च तत्रैव भोक्तव्यं सह बन्धुभिः।
उत्सवश्चैव कर्तव्यो गीतवाद्यसमाकुलः॥
४६३ स्नात्वाऽनडुहोऽलङ्कृत्य ब्राह्मणान् भोजयेत् सौरभेयाणां पुण्यमिति॥
४६४ षड्भागं राज्ञे दत्वा पञ्चमार् ब्राह्मणान् दत्वा तोषयेत्।
४६५ अथाप्यत्रोदाहरन्ति —
यूपोऽयं निहितो मध्ये मेधिनामिह कर्षकैः।
तस्मादतन्द्रितो दद्यादन्नधान्यार्थदक्षिणाः।
४६६ भूमिं भित्त्वौषधीश्छित्त्वा हत्वा कीटपिपीलिकाः।
पुनन्ति खलयज्ञेन कर्षका नात्र संशयः॥

४६७ पुंस्त्वोपघातं नास्ये(स्यं) वा वाहनानां न कारयेत्।
वृद्धं युग्मे न युञ्जीत जीर्णं व्याधितमेव च॥
४६८ न षण्डं वाहयेद् धेनुं न च भारेण पीडयेत्।
न वाहनीयाः शिखरे वृषभा यत्र कुत्रचित्॥

# ॥ चतुर्थं प्रकरणम् ॥

## ॥ परिभाषा ॥

४६९ कुशाः काशा उशीराश्च दूर्वाश्च व्रीहयस्तथा।
विश्वामित्राः कुशा(था)श्चैव सप्त दर्भाः प्रकीर्तिताः॥
४७० अपूता गर्भिता दर्भा ये चाग्रच्छेदिता नखैः।
क्वथिता अग्निदग्धाश्च कुशा वर्ज्याः प्रयत्नतः॥
४७१ कुशादर्भौ च गोवा[illegible](बालः) पवित्रं कनकं तथा।
.........................................
४७२ नवपञ्चत्रिसंयुक्तमग्रं तु चतुरङ्गुलम्।
वलयं द्व्यङ्गुलं प्रोक्तं ग्रन्थिरेकाङ्गुलो भवेत्॥
४७३ अङ्गुष्ठे तु पितुर्नाशस्तर्जन्यां मरणं भवेत्।
मध्यमे पुत्रनाशश्च कनिष्ठे सर्वदोषकृत्॥
४७४ तस्मात् सर्वप्रयत्नेनाऽनामिकायां तु योजयेत्॥

४७५ कूर्चांस्तु त्रिविधानाहुरुत्तमाधममध्यमान्।
सप्त पञ्च त्रयो दर्भा ग्रन्थिरेकाङ्गुलो भवेत्॥
४७६ दक्षिणावर्तिनो ग्रन्थिः कूर्चाग्रं चतुरङ्गुलम्।
तन्मूलं द्वादशाङ्गुल्ये त्रिविधः कूर्च उच्यते॥

४७७ ऊर्ध्वाग्रः पुष्टिदः प्रोक्तो ह्यधोग्रः शान्तिकर्मणि।
अन्तःकूर्चो हि कर्तव्यस्त्वभिचारे द्विजोत्तमैः॥
४७८ सप्तविंशतिदर्भैर्वा एकविंशतिभिस्तथा।
दशपञ्चभिरेवाथ कूर्चं कुर्वीत बुद्धिमान्॥

४७९ सदोपवीतिना भाव्यं सदा बद्धशिखेन च।
विशिखोऽनुपवीती च यत् करोति न तत् कृतम्॥
४८० यज्ञोपवीतं कुर्वीत सूत्रेण नवतन्तुकम्।
एकेन ग्रन्थिना, तन्तुर्द्विगुणस्त्रिगुणोऽथवा॥
४८१ स्तनादूर्ध्वमधो नाभेर्न कर्तव्यं कथञ्चन।
स्तनादूर्ध्वं श्रियं हन्ति नाभ्यस्तात् तपःक्षयः॥
४८२ कार्पासक्षौमगोवालशणवल्कतृणोद्भवम्।
यथासम्भवतो धार्यमुपवीतं द्विजातिभिः॥
४८३ कार्पासकं समादध्यात् शुचिक्षेत्रे विशोधितम्।
त्रिवृतं तु तथा कार्यं ब्राह्मण्या सूत्रकं कृतम्॥
४८४ शुचौ देशे शुचि सूत्रं संहताङ्गुलिमूलके।
आवर्त्य षण्णवत्या तत् त्रिगुणीकृत्य यत्नतः॥
४८५ अब्लिङ्गकैस्त्रिभिः सम्यक् प्रक्षाल्योर्ध्ववृतं त्रिवृत्।
अप्रदक्षिणमावृत्य सावित्र्या त्रिगुणीकृतम्॥
४८६ ततः प्रदक्षिणमावर्तं समं स्यान्नवसूत्रकम्।
त्रिरावेष्ट्य दृढं बद्ध्वा ब्रह्मविष्णवीश्वरान् नमेत्॥
४८७ ॐकारः प्रथमस्तन्तुर्द्वितीयोऽग्निस्तथैव च।
तृतीयो नागदैवत्यश्चतुर्थः सोमदैवतः॥
४८८ पञ्चमः पितृदैवत्यः षष्ठश्चैव प्रजापतिः।
सप्तमो वायुदैवत्यः सूर्यश्चाष्टम एव च॥

४८९ नवमः सर्वदैवत्य इत्येते नवतन्तवः॥

४९० ग्रामान् निष्क्रम्य सङ्ख्याय प्रणवस्याङ्गुलिषु तत्।
तावत् त्रिगुणितं सूत्रं प्रक्षाल्याब्लिङ्गकैस्त्रिभिः॥
४९१ देवागारेऽथवा गोष्ठे नद्यां वाऽन्यत्र वा शुचौ।
सावित्र्या त्रिवृतं कुर्यान् नवसूत्रं तु तद्भवेत्॥
४९२ बिल्वाश्वत्थादियज्ञीयवृक्षस्यान्यतमस्य तु।
बध्नीयात् तत् सजीवं(?) तु पितृभ्यो नम इत्यथ॥
४९३ ध्रुवन्नावेष्टितव्यं स्यात् पितॄणां तृप्तिदं हि तत्।
त्रिस्ताडयेत् करतलं देवानां तृप्तिदं हि तत्॥

४९४ सव्ये मृदं गृहीत्वाऽस्मिन् स्थापयेत् भूरिति ब्रुवन्।
पत्रं पुष्पं फलं वाऽपि व्याहृतिभिः प्रतिक्षिपेत्॥ —x

४९५ कार्पासं त्रिवृतं श्लक्ष्णं निदध्यात् वामहस्तके।
सावित्र्या दशकृत्वोऽद्भिर्मन्त्रिताभिस्तदुक्षयेत्॥
४९६ अभिमन्त्र्याथ भूरग्निश्चेति त्रिवृत्त्रयं त्रिभिः।
हरिब्रह्मेश्वरेभ्यश्च प्रणम्यैवावधारयेत्॥
४९७ यज्ञोपवीतमिति वा व्याहृत्या वापि धारयेत्॥

४९८ ब्रह्मसूत्रेऽपसव्येंऽसे स्थिते यज्ञोपवीतिता।
प्राचीनावीतिता सव्ये कण्ठस्थे च निवीतिता॥
४९९ यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्मणि।
तृतीयमुत्तरीयार्थे वस्त्राभावे तदिष्यते॥

५०० उपवीतं बटोरेकं द्वे तथेतरयोः स्मृते।
एकमेव यतीनां स्यादिति शास्त्रविनिश्चयः॥
५०१ ब्रह्मचारिण एकं स्यात् स्नातस्य द्वे बहूनि वा।
तृतीयमुत्तरीयं स्याद् वस्त्राभावे तदिष्यते॥
५०२ बहूनि चायुष्कामस्येत्यादि काम्यं प्रचक्षते॥
५०३ आयुष्कामैः सदा धार्यं बहुयज्ञोपवीतकम्।
पञ्चभिः पुत्रकामी स्याद् धर्मकामी तथैव च॥
५०४ यज्ञोपवीतं विप्राणां स्कन्धान्नैवावतारयेत्।
गन्धादिपूजासिद्ध्यर्थं दैवे पित्र्ये च कर्मणि॥
५०५ सूत्रं सलोमकं चेत् स्यात् ततः कृत्वा विलोमकम्।
सावित्र्या दशकृत्वोऽद्भिर्मन्त्रिताभिस्तदुत्सृजेत्॥
५०६ विधवारचितं सूत्रमनध्यायकृतं च यत्।
विच्छिन्नं चाप्यधोयातं भुक्त्वा निर्मितमुत्सृजेत्॥

५०७ मन्त्रपूतं स्थितं काये यस्य यज्ञोपवीतकम्।
नोद्धरेच्च ततः प्राज्ञो य इच्छेच्छ्रेय आत्मनः॥
५०८ सकृच्चोत्तारणात् तस्य प्रायश्चित्ती भवेद् द्विजः॥
५०९ तैत्तिरीयाः कठाः काण्वाश्चरका वाजसेयिनः (वाजिनस्तथा)।
कण्ठादुत्तार्य सूत्रं तु कुर्युर्वै क्षालनं द्विजाः॥
५१० बह्वृचाः सामगाश्चैव ये चान्ये याजुषाः स्मृताः।
कण्ठादुत्तार्य सूत्रं तु पुनर्हन्ति सत्क्रियाम्॥
५११ अभ्यङ्गे चोदधिस्नाने मातापित्रोः क्षयेऽहनि।
कण्ठादुत्तार्य सूत्रं तु कुर्युर्वै क्षालनं द्विजाः॥

# ॥पञ्चमं प्रकरणम्॥

## ॥आह्निकम्॥

[अष्टौ मङ्गलानि]

५१२ लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः।
हिरण्यं सर्पिरादित्य आपो राजा तथाऽष्टमः॥
५१३ एतानि सततं पश्येन् नमस्येदर्चयेच्च यः।
प्रदक्षिणं तु कुर्वीत तस्य चायुर्न हीयते॥

[मूत्रपुरीषोत्सर्गविधिः]

५१४ न चत्वरोपक्षारयोर्मूत्रपुरीषे कुर्यात्॥
५१५ न कृष्टक्षेत्रे॥
५१६ न सस्यपूर्णे॥
५१७ न यज्ञभूमौ॥
५१८ न यज्ञियानां वृक्षाणामधस्तात्॥
५१९ वापीकूपनदीगोष्ठचैत्याम्भःपथिभस्मसु।
अग्नौ काम्ये श्मशाने च विण्मूत्रं न समाचरेत्॥
५२० दशहस्तं समुत्सृज्य मूत्रं कुर्यात् जलाशयात्।
शतहस्तं पुरीषं च तीर्थे नद्यां चतुर्गुणम्॥

५२१ सदैवोदङ्मुखः प्रातः सायाह्ने दक्षिणामुखः।
विण्मूत्रमुत्सृजेन् नित्यं सन्ध्यासु परिवर्जयेत्॥
५२२ विण्मूत्रकरणात् पूर्वमादद्यान् मृत्तिकां सदा।
आददानस्तु तां पश्चात् सवासा जलमाविशेत्॥
५२३ अङ्गारतुषकीटास्थिसिकताशर्करान्विताम्।
वल्मीकोषरतोयान्तःकुड्याफालश्मशानजाम्॥
५२४ ग्रामबाह्यान्तरालस्थां वालुकां पांसुरूपिणीम्।
आहृतामन्यशौचार्थमाददीत न मृत्तिकाम्॥
५२५ यस्मिन् देशे कृतं शौचं वारिणा तत्तु शोधयेत्।
न शुद्धिस्तु भवेत् तस्य मृत्तिकां यो न शोधयेत्॥
५२६ यस्मिन् देशे च यत्तोयं यावद्यत्र च मृत्तिका।
सैव तत्र प्रशस्ता स्यात् तथा(या) शौचं विधीयते॥
५२७ देश(शं)कालं तथात्मानः(नं) द्रव्यं द्रव्यप्रयोजनम्।
उपस्थितामवस्थां च ज्ञात्वा शौचं प्रकल्पयेत्॥
५२८ विप्रुषश्च यथा न स्युर्यथा वो[illegible] न संस्पृशेत्॥
५२९ यावन्न शुद्धिं मन्येत तावच्छौचं विधीयते।
प्रमाणं द्रव्यसङ्ख्या वा न शिष्टैरुपदिश्यते॥
५३० धृतोर्ध्वमेहनो वस्त्रमुत्क्षिप्य द्रुतमुत्थितः।
अशौचान् नोत्सृजेच्छिश्नं प्रस्रावोच्चारयोरपि॥
५३१ गुदं हस्तं च निर्मृज्यान् मृदम्भोभिर्मुहुर्मुहुः॥
तिष्ठेन् नातिचिरं तत्र न च किञ्चिदुदीरयेत्॥
५३२ धर्मविद् दक्षिणं हस्तमधःशौचे न योजयेत्।
तथैव वामहस्तेन नाभेरूर्ध्वं न शोधयेत्॥
५३३ प्रकृतिस्थितिरेषा स्यात् कारणादुभयक्रिया॥

५३४ आद्यन्तयोस्तु शौचानामद्भिः प्रक्षालनं स्मृतम्।
सुनिर्णिक्ते मृदं दद्यान् मृदन्ते जलमेव च॥
५३५ कटिशौचं ततः कुर्यान्मूत्रादिस्पर्शशङ्कया।
धृत्वा च धौतं कौपीनं गण्डूषान् द्वादशाचरेत्॥
५३६ मूत्रोच्चारे कृते शौचं न स्यादन्तर्जलाशये।
अन्यत्रोद्धृत्य तत् कुर्यात् सर्वदैव समाहितः॥
५३७ न शौचं वर्षधाराभिराचरेद् वेदतत्त्ववित्।
५३८ प्रथमं प्राङ्मुखः स्थित्वा पादौ प्रक्षालयेज्जलैः।
उदङ्मुखो वा दैवत्ये पैतृके दक्षिणामुखः॥
५३९ शिखां बद्ध्वा वसित्वा द्वे निर्णिक्ते वाससी शुभे।
तूष्णीं भूत्वा समाधाय न क्रुध्यन्न विलोकयन्॥
५४० न गच्छन् न शयानश्च न चलन्न परामृशन्।
न हसन्नैव सञ्जल्पन् नात्मानं चैव वीक्षयन्॥
५४१ केशान् नीवीमधःकायं न स्पृशन् धरणीमपि।
यदि स्पृशति चैतानि भूयः प्रक्षालयेत् करम्॥
५४२ नान्तरीयैकदेशस्थ कृत्वा चैवोत्तरीयताम्॥
५४३ सोपानस्थो जलस्थो वा मुक्तकेशोऽपि वा नरः। X
उष्णीषी वापि नाचामेद् वस्त्रेणावेष्ट्य वा शिरः॥
५४४ इत्येवमद्भिराजानु प्रक्षाल्य चरणौ पृथक्।
हस्तौ चामणिबन्धाभ्यां पश्चादासीत संयतः॥
५४५ अथापः प्रथमात् तीर्थाद् दक्षिणात् त्रिः पिबेत् समम्।
अशब्दमजवस्त्राबमबहिर्जान्वबुद्बुदम्॥
५४६ आचम्य प्रयतो भूत्वा प्राणायामान् षडाचरेत्॥
५४७ द्विस्तथाङ्गुष्ठमूलेन परिमृज्यात् ततो मुखम्।
नाग्राङ्गुल्या न पृष्ठैर्वा परिमृज्यात् कथञ्चन॥

५७० विना दर्भेण यत्स्नानं यच्च दानं विनोदकम्।
असंख्यातं च यज्जप्तं तत्सर्वं निष्फलं भवेत्॥
५७१ वर्ज्यं पर्युषितं तोयं न वर्ज्यं जाह्नवीजलम्।
अन्यत् पर्युषितं वर्ज्यं न वर्ज्यं पद्मपुष्पकम्॥
५७२ अलाभे देवखातानां सरितां सरसां तथा।
उद्धृत्य चतुरः पिण्डान् पारक्ये स्नानमाचरेत्॥
५७३ दिवाहृतैर्जलैः स्नानं निशि कुर्यान् निमित्ततः।
निक्षिप्य च सुवर्णं तु सन्निधाप्य च पावकम्॥
५७४ प्रवेशाद् वरुणस्यासौ न रात्रौ जलमुद्धरेत्।
धाम्न इत्यादिमन्त्रेण ततो रात्रौ जलं हरेत्॥
५७५ देवाः पिबन्ति शिरसो मुखस्य पितरस्तथा।
वक्षसोऽपि च गन्धर्वा अधस्तात् सर्वजन्तवः॥
५७६ अङ्गानि स्नातो वस्त्रेण पाणिना न प्रमार्जयेत्।
धौताम्बरेण वा प्रोञ्छ्य बिभृयाच्छुष्कवाससी॥
५७७ स्वयं धौतेन कर्तव्याः क्रिया धर्म्या विपश्चिता।
न तु नेजकधौतेन नाहतेन च कर्हिचित्॥
५७८ नीलीवस्त्रं तु तच्छिन्नं धृत्वाज्ञानात् तु यश्चरेत्।
स विप्रस्त्वशुचिर्नित्यं न कर्मार्हो भवेदिह॥
५७९ नीलीवस्त्रं तु तच्छिन्नं धृत्वा कर्म करोति यः।
स विप्रस्तु न कर्मार्हस्तत् कर्म विफलं भवेत्॥
५८० एकस्मिन् दिवसे भुक्त्वा धृत्वा रक्तमयं पटम्।
कुर्याद् देहविशुद्ध्यर्थं यावकं मुनिचोदितम्॥
५८१ अभ्यासे तु पराकं स्यात् वत्सरं चान्द्रमुच्यते॥
५८२ कूपोदकेन सप्ताहं स्नानमुष्णेन वारिणा।
मृत्तिकाभिर्विना शौचं कृत्वा सप्ताहमेव च॥

५८३ प्राजापत्यं विशुद्ध्यर्थं चरेत् पूतो भवेद् द्विजः।
पञ्चगव्यं ततः पीत्वा शुद्धो भवति नान्यथा॥
५८४ ......................संगवे स्नानमाचरेत्॥
५८५ आतुरा चेदृतुमती तस्याः स्नानं कथं भवेत्।
स्पृष्ट्वा तु तां परा स्नायाद् दशकृत्वो ह्यनातुरा॥
५८६ वासोभिर्दशभिश्चैव परिधाप्य यथाक्रमम्।
ब्राह्मणान् भोजयित्वाऽथ पुण्याहेन विशुध्यति॥
५८७ आतुराणां तु सर्वेषामेवं शुद्धिर्विधीयते॥

[मानसस्नानम्]

५८८ स्वास्थितं पुण्डरीकाक्षं चिन्तयेत् पुरुषोत्तमम्।
अनन्तादित्यसङ्काशं वासुदेवं चतुर्भुजम्॥
५८९ शङ्खचक्रगदापद्मधारिणं वनमालिनम्।
ध्वजवज्राङ्कुशोल्लक्ष्यपादपद्मं सुनिर्मलम्॥
५९० तत्पादोदकजां गङ्गां निपतन्तीं स्वमूर्धनि।
चिन्तयेद् ब्रह्मरन्ध्रेण प्रविशन्तीं स्वकां तनुम्॥
५९१ तया सङ्क्षालयेद् देहं बाह्यमाभ्यन्तरं मलम्।
तत्क्षणाद् विरजो मन्त्री जायते स्फटिकोपमः॥
५९२ इडा भागीरथी गङ्गा पिङ्गला यमुना तथा।
तयोर्मध्यगता नाडी सुषुम्नाख्या सरस्वती॥
५९३ ज्ञानह्रदे ध्यानजले रागद्वेषमलापहे।
यः स्नाति मानसे तीर्थे स याति परमां गतिम्॥
५९४ अच्युतोऽहमनन्तोऽहं गोविन्दोऽहमहं हरिः।
आनन्दोऽहमशेषोऽहमजोऽहममृतोऽस्म्यहम्॥

५९५ नित्योऽहं निर्विकल्पोऽहं निर्विकारोऽहमव्ययः।
सच्चिदानन्दरूपोऽहं परिपूर्णोऽस्मि सर्वदा॥
५९६ ब्रह्मैवाहं न संसारी मुक्तोऽहमिति भावयेत्॥
५९७ एवं यः प्रत्यहं स्नात्वा मानसं स्नानमाचरेत्।
स देहान्ते परब्रह्मपदं याति न संशयः॥
५९८ इति मानसिकं स्नानं प्रोक्तं हरिहरादिभिः।
इदं स्नानं वरं दिव्यं मन्त्रस्नानात् शताधिकम्॥
५९९ यो नित्यमाचरेदेवं स वै नारायणः स्मृतः।
कालमृत्युमतिक्रम्य जीवत्येव न संशयः॥

[अघमर्षणम्]

६०० आत्मदेहविशुद्ध्यर्थं कर्तव्यमघमर्षणम्।
प्रायश्चित्ते च कृच्छ्रादौ तुलादानादिषु द्विजैः॥
६०१ व्रतेषूद्यापनविधौ कर्तव्यमघमर्षणम्।
पञ्चगङ्गासु राजेन्द्र न कुर्यादघमर्षणम्।
६०२ समुद्रगासु सर्वत्र न कुर्यादघमर्षणम्।
वापीकूपतटाकेषु कर्तव्यमघमर्षणम्॥

[मार्जनम्]

६०३ अष्टाक्षरैर्नवपदैः पादान्ते मार्जनं भवेत्।
तन्मध्ये मार्जनं कुर्याद् ब्राह्मं तेजो विनश्यति॥

[उपस्थानम्।]

६०४ मित्रस्य चर्षणी तिस्रो वसवस्त्वेति चोदयो
इमं मेति चतुष्केण सायं कुर्यादुपस्थितिम्॥

६०५ सन्ध्यातिक्रान्ते कृच्छ्रं कुर्यात्॥
६०६ औपासनपरित्यागी सुरापीत्युच्यते बुधैः।
न कर्मार्हो भवेत् तत्र शूद्र एव न संशयः॥
६०७ ऊर्ध्वपुण्ड्रं विना यस्तु वर्तते पुरुषाधमः।
वेदवेदान्तविद्यापि स वै पुरुषतस्करः॥
६०८ एकपाकेन वसतामेकं देवार्चनं गृहे।
वैश्वदेवं तथैवैकं विभक्तानां गृहे गृहे॥
६०९ अन्नेन सुमनोभिश्च गन्धपुष्पैः प्रदीपकैः।
गृहस्थः पूजयेन्नित्यं स्वगृहे गृहदेवताः॥

[पञ्चमहायज्ञाः]

६१० अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्॥

[ब्रह्मयज्ञः।]

६११ ब्रह्मयज्ञपरित्यागे गृहस्थः स्वस्थमास्थितः।
देवहन्ता स विज्ञेयः बुधैर्ब्राह्मण ईरितः॥

[तर्पणम्।]

६१२ अङ्गुष्ठमूलदेशे तु वामहस्तस्य(स्तेन) निक्षिपेत्।
तत्तिलं पूतपुण्यं स्यात् तत्तोयममृतं भवेत्॥
६१३ शिलातले पटे पात्रे रोमस्थानेषु कुत्रचित्।
तत्तिलं क्रिमितुल्यं स्यात् तत्तोयं रुधिरं भवेत्॥ ×
६१४ रोमसंस्थांस्तिलान् कृत्वा यस्तु तर्पयते पितॄन्।
पितरस्तर्पितास्तेन रुधिरेण मलेन च॥
६१५ तर्जन्यङ्गुष्ठसंयोगो राक्षसी मुद्रिकास्तथा(स्मृता)।
तया तिलान् न गृह्णीयात् दक्षाङ्गुष्ठेन निक्षिपेत्॥
६१६ शुक्लैस्तु तर्पयेद् देवान् मनुष्यान् शबलैस्तिलैः।
पितॄन् सन्तर्पयेत् कृष्णैर्देवर्षीनपि चाक्षतैः॥
६१७ सप्तम्यां रविवारे च गृहे जन्मदिने तथा।
भृत्यपुत्रकलत्रार्थी न कुर्यात् तिलतर्पणम्॥

(वैश्वदेवम्।)

६१८ वैश्वदेवं द्विजैः कार्यमन्नशुद्ध्यर्थमादरात्।
पञ्चसूनाऽपनुत्यर्थं लवणव्यञ्जनैर्विना॥
६१९ यद्येकस्मिन् काले व्रीहियवौ प्रक्रियेयातामन्यतरस्य हुत्वा प्रहृतमन्येन॥
६२० यद्येकस्मिन् काले पुनः पुनरन्नं पच्येत, सकृदेवैतं बलिं कुर्यात्॥
६२१ न प्रतिपाकम्॥
६२२ यद्येकस्मिन् काले बहुधाऽन्नं पच्येत, गृहपतिर्महानसादेवैतं बलिं कुर्वीत॥
६२३ अकृते वैश्वदेवे तु स्थालीपाकाः प्रकीर्तिताः।
अन्यत्र पिण्डयज्ञात् तु सोऽपराह्णे विधीयते॥

६२४ वस्त्रेण वाऽथ पर्णेन पाणिशूर्पास्यदारुभिः।
व्यजनेनाग्निधमनं न कुर्यादिति हि श्रुतिः॥
६२५ पर्णेन वै भवेद् व्याधिः शूर्पेण धननाशनम्।
पाणिना मृत्युमाप्नोति चायुः क्षीणं मुखाद् धमे॥
६२६ धमनीमन्तरे कृत्वा तृणं वा काष्ठमेव वा।
मुखेनाग्निं समिन्धीत 'मुखादग्निरजायत'॥

[नित्यश्राद्धम्]

६२७ उपवेश्यासनं दत्त्वा सम्पूज्य कुसुमादिभिः।
निर्दिश्य भोजयित्वा तु किञ्चिद् दत्त्वा विसर्जयेत्॥
६२८ भोक्तारं प्रति दातारं व्रतं तत्र न विद्यते॥

[अतिथिपूजा]

६२९ गर्भिण्यातुरवृद्धेषु बालश्रान्तातिथिष्वपि।
अप्राशितेषु तत्पूर्वमनिवेद्य च नाश्नीयात्॥
(अप्राशितेषु तत्पूर्वं नाश्नीयादनिवेद्य च॥)
६३० न पृच्छेद् गोत्रचरणं स्वाध्यायं देशजन्मनी।
भिक्षितो ब्राह्मणैरन्नं दद्यादेवाविचारयन्॥
६३१ चित्तं तु भावयेत् तस्मिन् व्यासः स्वयमुपागतः॥
६३२ अतिथिर्गृहमभ्येत्य यस्य प्रतिनिवर्तते।
असत्कृतो निराशश्च स सद्यो हन्ति तत्कुलम्॥
६३३ देवतातिथिभृत्यानां पितॄणामात्मनश्च यः।
न निर्वपति पञ्चानामुच्छ्वसन् न स जीवति॥

६३४ देवेभ्यश्च पितृभ्यश्च मनुष्येभ्यस्तथैव च।
अवशिष्टं तु यो भुङ्क्ते तमाहुर्विघसाशिनम्॥
६३५ अघृतं भोजयेद् विप्रं यो गृहे सति सर्पिषि।
परत्र निरयं घोरं गृहस्थः प्रतिपद्यते॥
६३६ मिष्टमन्नं स्वयं भुक्त्वा पश्चात् कदशनं तु यः।
ब्राह्मणं भोजयन् विप्रो निरये चिरमावसेत्॥
६३७ नात्मार्थं पाचयेदन्नं नात्मार्थं घातयेत् पशून्।
देवार्थं ब्राह्मणार्थं च पचमानो न लिप्यते॥
अघं स केवलं भुङ्क्ते यः पचत्यात्मकारणात्॥

६३८ देवताराधनं त्यक्त्वा वैश्वदेवं तथाऽतिथिम्।
यो विप्रो भोजनं कुर्यात् नित्यहोमं तथा त्यजन्॥
सुरापी स हि विज्ञेयः सर्वधर्मबहिष्कृतः॥

६३९ स्नाने भोजनवेलायां जपहोमेषु पैतृके।
सन्ध्यादिनित्यकार्येषु देवपूजासु सर्वदा॥
६४० चाण्डालास्त्रिविधाः प्रोक्तास्तेषां सम्भाषणादिकम्।
कृत्वा कर्म परित्यज्य (त्याज्यं) दृष्ट्वा। तत् पुनराचरेत्॥
६४१ अन्यथा दोषमाप्नोति कर्मभ्रष्टोऽभिजायते।
चाण्डालस्यैव यत्कर्म तत्तु दृष्ट्वा परित्यजेत्॥

६४२ पन्था देयो ब्राह्मणाय गवे राज्ञेऽचक्षुषे।
वृद्धाय भारतप्ताय गर्भिण्यै दुर्बलाय च॥

[भोजनविधिः।]

६४३ सुप्रक्षालितपाणिपादोऽप आचम्य शुचौ संवृतदेशेऽन्नमुपसङ्गृह्य कामक्रोध-
मोहानपहृत्य सर्वाभिरङ्गुलीभिः शब्दमकुर्वन् प्राश्नीयात्॥

६४४ न भिन्नासनगतः॥

६४५ न शयनगतः॥

६४६ ताम्ररजतसुवर्णाश्मशङ्खशुक्तिस्फटिकाजां भिन्नमभिन्नम्॥

६४७ आचान्तो हृदयदेशमभिमृशति- "प्राणानां ग्रन्थिरसि, रुद्रोमा विशान्तकः,
तेनान्नेनाऽऽप्यायस्व- इति॥

६४८ उपलिप्ते शुचौ देशे पादौ प्रक्षाल्य वाग्यतः।
प्राङ्मुखोऽन्नानि भुञ्जीत शुचिः पीठमधिष्ठितः॥
विशुद्धवदन(नः) प्रीतो भुञ्जीत न विदिङ्मुखः॥

६४९ आहारं तु रहः कुर्यात् विहारं चैव सर्वदा।
गुप्तो हि लक्ष्म्या युक्तः स्यात् प्रकाशे हीयते श्रिया॥

६५० स्नात्वा प्रक्षाल्य पादौ च स्रग्गन्धालङ्कृतः शुचिः।
पञ्चयज्ञावशिष्टं च यो भुङ्क्ते सोऽमृताशनः॥

६५१ पिशाचौदुम्बरे पात्रे योऽश्नाति सततं द्विजः।
सर्वपापविनिर्मुक्तः परमां गतिमाप्नुयात्॥

६५२ स्वर्णे वा राजते कांस्ये प्रत्यहं भोजनं चरेत्।
तदभिन्नं यदि राजेन्द्र न कुर्यात् तत्र भोजनम्॥

६५३ एकवस्त्रो न भुञ्जीत कवाटमपिधाय वा।
यानस्थः शकटस्थो वा पादुकानिकटेऽपि वा॥

६५४ एकवासा न भुञ्जीत न कुर्याद् देवतार्चनम्।
न चार्चयेद् द्विजान् नाग्नौ कुर्यादेवंविधो नरः॥

६५५ अस्नानाशी मलं भुङ्क्ते अजपी पूयशोणितम्।
अहुलाऽद्धं कृमिं भुङ्क्ते अदाता विषमश्नुते॥
६५६ यस्तु भोजनशालायां भोक्तुकाम उपस्पृशेत्।
आसनस्थो न चान्यत्र स विप्रः पङ्क्तिदूषकः॥
६५७ चतुरस्रं त्रिकोणं च वर्तुलं ~~चार्ध~~चार्धचन्द्रकम्।
कर्तव्यमानुपूर्वेण ब्राह्मणादिषु मण्डलम्॥
६५८ अकृत्वा मण्डलं ये तु भुञ्जतेऽधमयोनयः।
तेषां तु यक्षरक्षांसि हरन्त्यन्नस्य तद्बलम्॥
६५९ भुक्त्वा पीत्वा तु यः कश्चिच्छून्यं पात्रं विमुञ्चति।
क्षुधार्तः स पिपासार्तो भवेज्जन्मनि जन्मनि॥
६६० भुक्त्वोच्छिष्टं समादाय सर्वस्मात् किञ्चिदाचमेत्।
उच्छिष्टभागधेयेभ्यः सोदकं निर्वपेद् भुवि॥
६६१ "रौरवे पूयनिलये पद्मार्बुदनिवासिनाम्।
प्राणिनां सर्वभूतानामक्षय्यमुपतिष्ठताम्॥"
६६२ अर्धं पीत्वा तु गण्डूषमर्धं त्याज्यं महीतले।
रसातलगता नागास्तेन प्रीणन्ति नित्यशः॥
६६३ हस्तं प्रक्षाल्य गण्डूषं यः पिबेत् पापमोहितः।
स दैवं चैव पित्र्यं च आत्मानं चैव घातयेत्॥
६६४ तस्मिन्नाचमनं कुर्यात् यत्र भाण्डेऽथ भुक्तवान्।
यद्युत्तिष्ठत्यनाचान्तो भुक्तवानासनात् ततः॥
स्नानं सद्यः प्रकुर्वीत सोऽन्यथाऽप्रयतो भवेत्॥
६६५ भुक्त्वाऽऽचामेद् यथोक्तेन विधानेन समाहितः।
शोधयेन् मुखहस्तौ च समृद्भिर्घर्षणैरपि॥
६६६ आचम्य तु ततः कार्यं दन्तकाष्ठस्य भक्षणम्॥

Smt. HANSHA MEHTA LIBRARY
M. S. University of Baroda

६६७ भोजने दन्तलग्नानि निर्हृत्याऽऽचमनं चरेत्।
दन्तलग्नमसंहार्यं लेपं मन्येत दन्तवत्॥
६६८ दन्तवद् दन्तलग्नेषु जिह्वास्पर्शाच्छुचिर्न तु॥
६६९ न तत्र बहुशः कुर्यात् यत्नमुद्धरणे पुनः।
भवेदशौचमत्यर्थं तृणवेधाद् व्रणे कृते॥
६७० विना यज्ञोपवीतेन शिखया च द्विजोत्तमः।
उच्छिष्टो यदि मोहात्मा पापकृत् स भवेद् द्विजः॥
६७१ उपोष्य रजनीमेकां पञ्चगव्येन शुध्यति॥
६७२ द्विजः कामातुरो यस्तु पत्न्या सह यदान्नभुक्।
पश्चात् चान्द्रायणं कृत्वा शुद्धिमाप्नोति पौर्विकीम्॥
६७३ एकपङ्क्त्युपविष्टौ यौ भुञ्जानौ तौ परस्परम्।
स्पृष्टान्नमत्यजन्तौ चेत् ज्ञेयौ तौ मांसभोजिनौ॥
६७४ एकपङ्क्त्युपविष्टा ये भुञ्जते मुखजाः सकृत्।
अन्योन्यस्पर्शजं कृत्वा मत्वा जग्ध्वा स्वपात्रजम्॥
मांसतुल्यं तदन्नं स्याद् भोक्तारो मांसभोजिनः॥
६७५ एकपङ्क्त्युपविष्टश्च ब्राह्मणो ब्राह्मणं स्पृशेत्।
तदन्नमत्यजन् भुक्त्वा प्रायश्चित्ती भवेत् तथा॥
६७६ अन्यगोत्रं द्विजं स्पृष्ट्वा भुक्त्वा चान्द्रायणं चरेत्।
सगोत्रस्पर्शने भुक्त्वा तप्तकृच्छ्रं समाचरेत्॥
६७७ पिता पुत्रं भ्रातरं वा स्पृष्ट्वा भुक्त्वा तु कायकम्॥
६७८ पुत्रस्य वा कनिष्ठस्य पितुरुच्छिष्टभोजने।
न दोषः पुत्रयोस्तत्र पिता कायकमाचरेत्॥

६७९ वाय्वा दीपनिर्वाणे भोजने, नाशमाप्नुयात्।
धृत्वा पात्रं तदा दोर्भ्यां संस्मरन् भानुमव्ययम्॥

पुनर्दीपागमे तात गायत्र्याऽन्नं जलैः क्षिपेत्॥
६८० तदन्नमक्षयन् भुक्त्वा शुद्धिमाप्नोति दीपतः।
अन्यदन्नं पुनर्भुक्त्वा पञ्चगव्यं पिबेत् तदा॥
६८१ विप्रभोजनकाले तु क्षुतं वा जृम्भणं तथा।
अपानवायोरुत्सर्गं कृत्वा विप्रः स पापभाक्॥
६८२ अपानवायुमोक्षं चेत् (च) कृत्वा भुञ्जीत पापभाक्॥

६८३ पित्रोर्मृताहे पूर्वेद्युर्भानुवारे च सङ्क्रमे।
तथा चतुर्दश्यष्टम्योर्व्रतेषु च महोत्सवे॥
६८४ श्रोत्रिये मरणं प्राप्ते गुरूणां दुःखसम्भवे।
पितरौ व्याधिना ग्रस्तौ महाराजनिपातने॥
६८५ उक्तेष्वेतेषु सर्वेषु अन्येषु व्रतपर्वसु।
न द्विवारं समश्नीयाद् विप्रो धर्मपरायणः॥

[भोज्यान्नाः, अभोज्यान्नाश्च।]

६८६ स्वदासो नापितो गोपः कुम्भकारः कृषीवलः।
ब्राह्मणैरपि भोज्यान्नाः पञ्चैते शूद्रयोनयः॥

६८७ शूद्रवैश्यालये राजन् तद्द्रव्यं पाचयेद् द्विजः।
तत्रैव भोजनं कृत्वा तदनुज्ञापुरःसरः॥
न तस्य निष्कृतिर्वास्ति प्रायश्चित्तायुतैरपि॥ ~x
६८८ ग्रामान्नं यदि कुर्वन् भुङ्क्ते विप्रः क्षुधातुरः।
कवले कवले चान्द्रं कृत्वा शुद्धिमवाप्नुयात्॥
६८९ एकादश्यन्नभुक् चैव शुद्धौ चान्द्रायणं चरेत्॥

९९० देवलान्नं तु यो भुङ्क्ते गणकान्नं तथा द्विजः।
मद्यपौ तौ विजानीयात् सर्वकर्मबहिष्कृतौ॥
९९१ देवार्चकस्य यो भुङ्क्ते तथा गणकवेश्मनि।
उभौ तौ पापिनौ प्रोक्तौ प्रायश्चित्तमथार्हतः॥
९९२ एकरात्रे पञ्चगव्यं द्विरात्रे यावकं स्मृतम्।
मासमात्रे पराकं स्याद् अब्दे चान्द्रमुदीरितम्॥
९९३ ततः परं तत्समः स्यात्, स्त्रीणामर्धमुदीरितम्॥
९९४ परिवित्तिः परिवेत्ता कुण्डश्च गोलकस्तथा।
तेषामन्नं न भोक्तव्यं विप्रैः पापपराङ्मुखैः॥
९९५ कुण्डगोलकयोरन्नं परिवित्तेस्तथैव च।
परिवेत्तुर्यदन्नं च भुक्त्वा चान्द्रायणं चरेत्॥
९९६ रजस्वलान्नं यो भुङ्क्ते द्विजोऽज्ञानाद् सकृद् यदि।
रौरवं नरकं याति भवेत् पश्चात् विगर्हितः॥

९९७ पतितश्च खलश्चैव दुर्जनः पिशुनस्तथा।
जारश्च गायकश्चैव निसयाश्चापरस्तथा॥
९९८ भिषक् चोरस्तथा मर्मी आततायी भयप्रदः।
एते वै दुर्जनाः प्रोक्ता अपाङ्क्तेयाः सदैव हि॥

९९९ कुण्डश्च गोलकश्चैव अयाज्यानां च याजकः।
चक्राङ्किततनू राजन् तथा लिङ्गाङ्कितोऽपि वा॥
१००० चार्वाको दूषकश्चैव उन्मत्तः कितवस्तथा।
एतैरावेष्टिता पङ्क्तिः पापदा सर्वदा नृणाम्॥
१००१ एतस्यामन्नभुग् विप्रः पापमेव समाश्रयेत्।
एकत्र भोजने राजन् चान्द्रायणमथाचरेत्॥

७०२ मासभोजी महापापी चान्द्रं पाराकमाचरेत्।
वर्षभोजी महाचान्द्रं कृत्वा शुद्धिमवाप्नुयात्॥

७०३ अमायां च पितृश्राद्धे तीर्थयात्रासु सर्वदा।
ज्ञाताशौचे बन्धुमृतौ पक्षद्वयहरेर्दिने॥
७०४ अशुचिर्मार्गमध्ये च सन्ध्ययोरुभयोरपि।
देवालये सभास्थाने तथा कर्मसु भाषणे॥
७०५ दुःखान्विते बहुजने तथैवोत्पातदर्शने।
राजभङ्गे प्रजाक्षोभे गुरुदेवार्चनेषु च॥
७०६ व्रताचरणकाले तु पुराणश्रवणे तथा।
ताम्बूलं भक्षयेद् यस्तु स विष्ठाशी भवेदिह॥

# ॥षष्ठं प्रकरणम्॥

## ॥भक्ष्याभक्ष्यम्॥

७०७ अयातयामं रसवत् प्रसन्नं सुपरिश्रु(स्कृ)तम्।
द्रव्यं द्रव्येषु धर्मज्ञैरेतन्मेध्यतमं स्मृतम्॥
७०८ दधि भक्ष्यं शुक्तमपि यच्चैवं दधिसम्भवम्।
कन्दमूलफलैः पुष्पैः शस्तैः शुक्तासवं तु यत्॥
अविकारि भवेन् मेध्यमभक्ष्यं तद् विकारकृत्॥

७०९ अभोज्यं प्राहुराहारं शुक्तं पर्युषितं सदा।
अन्यत्र मधुसक्तुभ्यां भक्ष्येभ्यः सर्पिषो गुडात्॥
७१० अवलीढं श्वमार्जारध्वाङ्क्षकुक्कुटमूषकैः।
भोजने नोपयुञ्जीत तदमेध्यं हि धर्मतः॥

७११ चाण्डालेन शुना वापि दृष्टं हरिभिराविकैः।
बिडालादिभिरुच्छिष्टं दुष्टमन्नं विवर्जयेत्॥
७१२ अन्यत्र हिरण्योदकस्पर्शात् ..........॥
७१३ विशुद्धमपि चाहारं मक्षिकाकृमिजन्तुभिः।
केशरोमनखैर्वापि दूषितं परिवर्जयेत्॥

७१४ शूद्रभुक्तावशिष्टं च चिरपर्युषितं च यत्।
दम्पत्योर्भुक्तशिष्टं च तन्न भुञ्जीत कर्हिचित्॥
७१५ पतितान्नमभोज्यान्नमपाङ्क्तेयान्नमेव च।
शूद्रान्नं कुत्सितान्नं च दूरतः परिवर्जयेत्॥

७१६ न भुञ्जीताघृतं नित्यं गृहस्थो भोजनं स्वयम्।
पवित्रमथ हृद्यं च सर्पिराहुरघापहम्॥
७१७ न बीजान्युपभुञ्जीत रोगापत्तिमृते द्विजः।
फलान्येषामनन्तानि बीजानां हि विनाशयेत्॥
७१८ नाश्नीयात् पायसं नक्तं भुक्तं चेन्न स्वपेन्निशि।
न क्षीरमुत्सृजेत् प्राप्तं पवित्रं हि पयः स्मृतम्॥

७१९ दुर्गन्धिसहितं भक्ष्यं तथा पर्युषितं च यत्।
शष्कुली माषनिर्माणं विपणिस्थं च यत् भवेत्॥
तैलपक्वविहीनं च न भोज्यं स्यात् द्विजातिभिः॥
७२० शाकमध्येऽन्नमध्ये वा दन्तकेशजला मलम्।
अस्थि चर्म द्विजस्याङ्गरोमकीटनखा यदा॥
बह्वन्नं न परित्याज्यं स्वपात्रस्थं परित्यजेत्॥

[अभक्ष्यम्, उद्भिज्जादि।]

७२१ कौसुम्भकुम्भाण्डावभक्ष्यौ॥
७२२ किसलयक्ष्वाकू अभक्ष्ये॥
७२३ श्लेष्मातको वज्रफली कौसुम्भं नालमस्तकान्।
गृञ्जनं चेति शाकानामभक्ष्याणि प्रचक्षते॥

७२४ पलाण्डुं लशुनं शुक्तं निर्यासं चेति सर्वशः।
कण्डूरां श्वेतवृन्ताकं कुष्माण्डं च विवर्जयेत्॥
७२५ वल्लीमुपोत(द)कीं चैव रक्तशिग्रुं परित्यजेत्॥
७२६ कालिङ्गालाबुबीजानि येषां कुक्षौ विशन्ति तु।
ये भक्षयन्ति पिण्याकं ते वै निरयगामिनः॥
७२७ वार्ताककालिङ्गबिम्बोदुम्बराभिस्सटाः।
एतांस्तु सेवते यस्तु तस्य दूरतरो हरिः॥
७२८ चर्म कोशातकी शेलुः पिण्याकं शिग्रुमूलकम्।
उपोत(द)की रक्तलता पूतिगन्धाश्च यानि वै॥
७२९ एतानि भुङ्क्ते यस्तस्य मन्त्रसिद्धिः कथं भवेत्।
सकण्टकं तु कुष्माण्डं वृन्ताकं तु सकण्टकम्॥
७३० वर्जयेत् सर्वनिर्यासान् वृक्षवल्लीसमुद्भवान्।
निर्यासमपि वा हिङ्गुं धूपं न परिवर्जयेत्॥
७३१ बिम्बवार्ताककालिङ्गमधूकबिसकान्यदन्।
अन्त्यकाले जगन्नाथं गोविन्दं न स्मरिष्यति॥
७३२ वृन्तालाबू रक्तशिग्रुः श्वेतवृन्ताकमेव वा
भक्षयेत् ब्राह्मणो यस्तु स तु चान्द्रायणं चरेत्॥
७३३ वृन्ताकं श्वेतवृन्ताकं मूलकं रक्तमूलकम्।
अलाबुं वर्तुलाकारं भुक्त्वा सान्तपनं चरेत्॥

७३४ कर्णिकारस्य यच्छाकं यच्छाकं दुश्चरीकृतम्।
वेश्मोपवेशे शाकं च शाकं मुखस्रवं तथा॥
७३५ गुर्जरी चञ्चरी शाकं शाकं वर्णोद्भवं च यत्।
करञ्जशाकं दुर्भक्ष्यं देवतापितृवर्जितम्॥

७३६ असम्यत्युक्तं दुर्गन्धि तच्छाकं परिवर्जयेत्।
उच्छिष्टं च यच्छाकं यच्छाकं पादताडितम्॥
७३७ पलाण्डुलशुनाक्रान्तं भावदुष्टं परित्यजेत्।
एतानि विप्रो नाश्नीयात् तथैतानि न भक्षयेत्॥
७३८ ज्ञात्वा भक्षेत् यदा पापी उपोष्य रजनीमिमाम्।
परेद्युर्भक्षयेत् पञ्चगव्यं होमपुरःसरम्।
एतेन शुद्धिमाप्नोति दुष्टशाकान्नभुक् द्विजः॥

७३९ उच्छिष्टं पादहतं बिडालादिविमर्दितम्।
पूर्वोक्तशाकसंयुक्तं पलाण्डुलशुनावृतम्॥
७४० देवपूजाविहीनं यत् वैश्वदेवविवर्जितम्।
देवालयेषु यद्भुक्तं यदन्नं मूलसम्भवम्॥
७४१ शीतीकृतं यदन्नं च शूर्पेण वदनेन वा।
एकपङ्क्त्युपविष्टेन ब्राह्मणेन विघातितम्।
७४२ पुनःक्षालनभाण्डेषु तथा मौनविवर्जितम्।
श्रान्तं पिण्डीकृतं चान्नं यदन्नं जीवतण्डुलम्॥
७४३ तुषपाषाणसंयुक्तं कलीकरणमिश्रितम्।
पुत्रैः पौत्रैरनुजैर्वा पुत्रीपुत्रैरथापि वा॥
७४४ भार्याविलोकने चैव यत् यदन्नमसाक्षिकम्।
एतत् दुष्टं विजानीयात् पूर्वोक्तं बालवादिभिः॥
७४५ एतद्भुक्त्वा द्विजः सद्यो महापापं समश्नुते।
एतद्भुक्त्वा विशुद्ध्यर्थं पराकं कृच्छ्रमाचरेत्॥

७४६ जले निधाय पूर्वेद्युर्यदन्नं जलसेचनम्।
तत् तु पर्युषितं भुक्त्वा महत् पापमवाप्नुयात्॥

७४७ परमान्नं च कृसरं वृथा पक्त्वा द्विजोत्तमः।
भुञ्जीयात् केवलं तेन नरके वासमश्नुते॥
७४८ भुञ्जीत यदि छर्दित्वा उपोष्य रजनीं ततः।
पञ्चगव्यं पिबेत् पश्चाच्छुद्धो भवति नान्यथा॥
७४९ रवौ धनुः समायाते गृहे कन्या रजस्वला।
पितृदेवनिमित्तं च परमान्नं प्रशस्यते॥
७५० शम्भोर्निवेदितं भक्तं तत् तीर्थं शाकमेव वा।
विप्रः सकृन्न भुञ्जीयात् भुक्त्वा तप्तं समाचरेत्॥
७५१ दिवापि दधिधानासु रात्रौ च दधिसक्तुषु।
श्लेष्मातके तथाऽलक्ष्मीर्नित्यमेव कृतालया॥
७५२ पलाण्डुसदृशं यत् स्यात् गन्धवर्णरसादिभिः।
अभोज्यं तद्भवेत् सर्वं भुक्त्वा चान्द्रायणं चरेत्॥
७५३ लशुनादिषु ये तुल्या गन्धवर्णरसादिभिः।
अभक्ष्यास्ते द्विजातीनां भुक्त्वा सान्तपनं चरेत्॥
७५४ माक्षिकं फाणितं शाकं गोरसं लवणं घृतम्।
हस्तदत्तानि भुक्त्वा च दत्त्वा चान्द्रायणं चरेत्॥

[मांसभक्षणम्]

७५५ भक्षयन्नपि मांसानि शेषभोजी न लिप्यते।
औषधार्थमशक्तौ वा नियोगात् यज्ञकारणात्॥

[अभक्ष्याः अण्डजाः]

७५६ बलाकहंसदात्यूहभृङ्गराजकचित्रकाः।
उलूककुररश्येनगृध्रकुक्कुटवायसाः॥

७५७ चकोरः कोकिलो रज्जुदालकश्चाषमुद्गुकौ।
कङ्कः सारबणो भासः शतपत्रः प्लवङ्गमः।।
७५८ उत्क्रोशो बर्हिणः क्रौञ्चश्चक्रवाकः शिलीमुखः।
पारावतकपोतौ च न भक्ष्याः पक्षिणः स्मृताः।।

[भक्ष्याः जारजाः।]

७५९ पञ्च पञ्चनखा भक्ष्या धर्मतः परिकीर्तिताः।
गोधा कूर्मः शशः श्वावित् शल्लकश्चेति ते स्मृताः।।

७६० आरण्यमाहिषं चाजं मार्गं रौरवमेव च।
भक्ष्यमांसं समुद्दिष्टमौरभ्रं पार्षतं तथा।।
वराहाश्च तथा भक्ष्या महारण्यनिवासिनः।।

[अभक्ष्याः।]

७६१ अभक्ष्याः पशुजातीनां गोखरोष्ट्राश्वकुञ्जराः।
सिंहव्याघ्रर्क्षशरभाः सर्पाजगरकास्तथा।।
७६२ आखुमूषिकमार्जारनकुलग्रामसूकराः।
श्वशृगालमृगद्वीपिगोलाङ्गूलकमर्कटाः।।
७६३ वेसरोष्ट्रगजश्वाश्ववृषभाज् करिमाचलम्।
रासभं प्राश्य च भवेत् विट्कृमिर्वा भवे भवे।।
७६४ आत्मार्थं स्वादुकामित्वात् जीवजातं न घातयेत्।
कष्टं हि व्यालधर्मित्वात् जीवमांसोपजीवनम्।।
७६५ जलौकाशुक्तिशम्बूकशिशुमारककर्कटाः।
मत्स्याश्च विकृताकाराः सर्पशीर्षा दरीशयाः।।

७६६ जालपादासुमार्जारास्तथा पाण्डुकपोतकाः।
हारीतो गवयश्चैव नैव भक्ष्या द्विजातिभिः॥
७६७ शम्बुशुक्तिनखशुक्तिशिशुमारप्लवङ्गममत्स्याश्च विकृताकारा नैव
भक्ष्या जलौकसाम्॥
७६८ शम्बूको नखशुक्तिश्च शिशुमारः प्लवङ्गमः।
मत्स्याश्च विकृताकारा नैव भक्ष्या जलौकसाम्॥

७६९ सुरामरिष्टं मैरेयं मधु माध्वीकमासवम्।
धान्याम्बु शुक्तं वर्ज्यं तु न पेयं ब्राह्मणैर्विदुः॥
७७० माधूकमैक्षवं टाङ्कं कौलं खार्जूरपानसम्।
मार्द्वीकं कारमार्दीकं मैरेयं नालिकेरजम्॥
७७१ अमेध्यानि द्विजैतानि मद्यानि ब्राह्मणस्य तु।
क्षत्रियश्चैव वैश्यश्च स्पृष्ट्वैतानि न दुष्यतः॥

७७२ उक्तमेतत्तु सर्वेषां भक्ष्याभक्ष्यमशेषतः।
वर्णानां सानुलोमानां सस्त्रीणां च विशेषतः॥

७७३ अभक्ष्यभक्षणे कृच्छ्रम्॥

७७४ यज्ञेषु पशुबन्धे वा यागार्थं पाचनं यदि।
तदा विप्रैर्न भोक्तव्यं लोकेषु भिरकल्मषैः॥
७७५ देवालयेषु मार्गेषु ग्रामेषु नगरेषु च।
विप्रः क्रीतान्नभोक्ता चेत् तदा नरकमाप्नुयात्॥
७७६ यत्सन्नं यतिपात्रस्थं यतिना प्रेरितं तथा।
दम्पत्योर्भुक्तशेषं यत् तद्भुक्त्वा चान्द्रमाचरेत्॥

७७७ व्यतिपाते यदन्नं च महापुरुषभोजनम्।
कर्मण्यरिजने भुक्तिर्दशाहे बालिभोजनम्॥
७७८ भूतप्रेतपिशाचानां यदन्नं परिकल्पितम्।
कलुषं वर्जनीयं तत् ब्रह्मराक्षसभोजनम्॥
७७९ एतेष्वन्नेषु यो विप्रो धनलोभपरायणः।
भुङ्क्ते तस्य गतिर्नास्ति तस्मादेतत् परित्यजेत्॥
७८० तदानीं मृत्युमाप्नोति जीवेद् वा पापकार्यसौ।
७८१ तत्र दोषोपशान्त्यर्थं प्रायश्चित्तमिदं स्मृतम्।
प्राजापत्यद्वयं कृत्वा पुनःसंस्कारपूर्वकम्॥
पञ्चगव्यं पिबेत् पश्चाच्छुद्धो भवति भूतले॥

७८२ शूद्रैर्नानाविधैर्वर्णैश्चाण्डालादिभिरीक्षितम्।
पुष्पवत्या सूतिकया दृष्टं वा पतितादिभिः॥
७८३ अन्नं भक्ष्यं तथा शाकं भुङ्क्ते विप्रः सकृद् यदि।
प्रायश्चित्ती भवेत् पापी न कर्मार्हो भवेदिह॥

७८४ अतीव तृषितो विप्रो न शूद्रस्योदकं पिबेत्।
तद्भाण्डभोजनं चैव अज्ञानाद् यदि मार्गतः॥
तस्योपनयनं भूयस्तप्तकृच्छ्रेण शुध्यति॥

७८५ अयुते वा सहस्रे वा नानावर्णसमागमे।
पतितक्लीबवैडालव्रात्यतस्करपूरिते॥
७८६ कुण्डगोलकसङ्कीर्णे नटगायकसङ्कुले।
पाषण्डजनसंसर्गे सर्वपातकिसङ्कुले॥

७८७ भाण्डोच्छिष्टस्वयम्पाके स्त्रीजनैरुपशोभिते।
यो विप्रो लोकमन्विच्छन्न भुञ्जीत कदाचन॥
७८८ यमो जिह्वां रहत्याशु सन्दंशैर्भृशदारुणैः।
तदन्ते भुवमासाद्य विड्वराहत्वमाप्नुयात्॥

७८९ वर्षद्वयं वा वर्षं वा तदूर्ध्वं वा जनाधिप।
सङ्कल्प्य भोजयेद् विप्रान् तद्दीर्घसत्रमुच्यते॥
७९० विप्रस्तत्र न भुञ्जीयात् पूर्ववत् दुष्टसङ्गमात्।
महादोषमवाप्नोति नरकं चाधिगच्छति॥
७९१ पक्षं वा मासमथवा भुक्त्वा निष्कृतिमाचरेत्।
पक्षभुक्तौ पराकं स्यात् चान्द्रं स्यात् मासभोजने॥
७९२ शूद्रसत्रे न भुञ्जीत प्राणैः कण्ठगतैरपि।
इत्थं विप्रो महालोके दुःसङ्गात् वा महाभयात्॥
महान्तं नरकं गत्वा भुवि भूयात् स वायसः॥
७९३ पक्षे मासे ऋतावब्दे भोजने तु यथाक्रमम्।
यावकं तप्तकृच्छ्रं च प्राजापत्यमथैन्दवम्।
कृत्वा शुद्धिमवाप्नोति द्विजः पापक्षयात् क्रमात्॥

७९४ सङ्घीभूता यदा विप्राः स्त्रियो वा राजवल्लभा।
स्वैः स्वैर्द्रव्यैरेकभाण्डे पाचयेयुः पृथक् पृथक्॥
भुक्त्वा दोषम् आ(प्रा)प्नुवन्ति शूद्रतुल्या भवन्त्यतः॥

७९५ रेतोमूत्रपुरीषाणां प्राशनेऽमतिपूर्वके।
नाश्नीयात् तु त्र्यहं, मत्वा तप्तकृच्छ्रं चरेत् द्विजः॥

७९६ यदि रोगनिवृत्त्यर्थं द्विजो वाऽपि तदङ्गना।
सन्निपाते महाघोरे तन्निवृत्त्यर्थमञ्जसा॥
७९७ औषधार्थं पिबेत् स्तन्यं मद्यं वा वैद्यचोदितम्।
तदा रोगनिवृत्तिश्चेत् मरणं वा भवेदुत॥
७९८ तस्य देहविशुद्ध्यर्थं तप्तकृच्छ्रं समाचरेत्।
ज्ञानाभावे पुनःकर्म कर्तव्यं देहशुद्धये॥
७९९ तप्तकृच्छ्रं द्विजैः कार्यं दत्त्वा वा बहुदक्षिणाम्।
घृतेन शुद्धिमाप्नोति मृतो जीवन्नुभौ तथा॥
८०० रोगोल्बणे सन्निपाते स्तन्यं वा मद्यमेव वा।
पीत्वा चरेत् तप्तकृच्छ्रं पुनःसंस्कारमाचरेत्॥
८०१ मनुष्यस्य खरस्यापि सूकरस्य द्विजन्मनः।
मलमूत्रं पिबेद्यस्तु रेतो वा रोगपीडितः॥
८०२ स तु पश्चात् पुनःकर्म कृत्वा कृच्छ्रेण शुध्यति।
अज्ञानात् शुद्धिमाप्नोति ज्ञात्वा चान्द्रायणं चरेत्॥

८०३ ताम्रपात्रस्थितं दुग्धं गोमूत्रं तक्रमेव वा।
दधि वा ताम्रपात्रस्थं नारिकेलोदकं तथा॥
८०४ द्विजः पीत्वा सुरापानं कृतवान्नात्र संशयः।
अज्ञानात् ज्ञानतो वापि सुरापानसमं विदुः॥

८०५ हिन्तालतालखर्जूरनारिकेरमधूद्भवम्।
गन्धं वायुवशात् प्राप्तं घ्रात्वा विप्रस्य दक्षिणम्॥
८०६ हस्तमाघ्राय सहसा शुद्धिमाप्नोति तत्क्षणात्।
अभावे भास्करं दृष्ट्वा स्पृष्ट्वा कर्णं स्मरेद् हरिम्॥

८०७ विप्रस्य पीतशेषं यत् तोयमन्यः पिबेद् यदि।
मद्यपानसमं प्रोक्तं तत् तोयं मुनिपुङ्गवैः॥
८०८ पीत्वाऽज्ञानाद् द्विजः कुर्यात् प्राजापत्यं विशुद्धये॥

# ॥सप्तमं प्रकरणम्॥

## ॥देशधर्माः कालधर्माश्च॥

८०९ यस्मिन् देशे य आचारः पारम्पर्यक्रमागतः।
श्रुतिस्मृत्यविरुद्धश्च तमनुष्ठातुमर्हति॥
८१० यस्मिन् देशे य आचारो न्यायदृष्टस्तु कल्पितः।
तस्मिन्नेव स कर्तव्यो न तु देशान्तरे स्मृतः॥
८११ येषु देशेषु ये देवा येषु देशेषु ये द्विजाः।
येषु देशेषु यत्तोयं या च यत्रैव मृत्तिका॥
८१२ येषु स्थानेषु यच्छौचं धर्माचारश्च यादृशः।
तत्र तन्नावमन्येत धर्मस्तत्रैव तादृशः॥
८१३ यस्मिन् देशे पुरे ग्रामे त्रैविद्ये नगरेऽपि वा।
यो यत्र विहितो धर्मस्तं धर्मं न विचालयेत्॥
८१४ देशधर्मश्च कर्तव्यः कुलधर्मश्च शाश्वतः॥

८१५ यावद् वर्णविभागोऽस्ति यावद् वेदः प्रवर्तते।
संन्यासं चाग्निहोत्रं च तावत् कुर्यात् कलौ युगे॥
८१६ समुद्रयात्रास्वीकारः कमण्डलुविधारणम्।
दत्ताक्षतायाः कन्यायाः पुनर्दानं वरस्य च॥

८१७ दीर्घकालं ब्रह्मचर्यं वर्जनीयं कलौ युगे॥
८१८ एतान् धर्मान् परित्यज्य यो विप्रो दोषभाग् भवेत्।
तस्यैव निष्कृतिर्नास्ति तप्तकृच्छ्रशतादिह॥

८१९ सङ्क्रान्तिसमयः सूक्ष्मो दुर्ज्ञेयः पिशितेक्षणैः।
तद्योगश्चाप्यधश्चोर्ध्वं त्रिंशन्नाड्यः पवित्रिताः॥
८२० मुख्यालाभे तु गौणेऽपि कार्या दानादिका क्रिया॥
८२१ आसन्नसङ्क्रमं पुण्यं दिनार्धं स्नानदानयोः।
रात्रौ सङ्क्रमणे भानोर्विषुवत्ययने दिने॥
८२२ या याः सन्निहिता नाड्यस्तास्ताः पुण्यतमाः स्मृताः॥
८२३ त्रिंशत् कर्कटके नाड्यो मकरे विंशतिः परा।
वर्तमाने तुलामेषे नाड्यस्तूभयतो दश॥
८२४ षडशीत्यामतीतायां षष्टिरुक्तास्तु नाडिकाः।
पुण्यायां विष्णुपद्यां च प्राक्पश्चादपि षोडश॥
८२५ अहः सङ्क्रमणे पुण्यमहः कृत्स्नं प्रकीर्तितम्।
रात्रौ सङ्क्रमणे पुण्यं दिनार्धं स्नानदानयोः॥

८२६ मासपक्षतिथीनां च निमित्तानां च सर्वशः।
उल्लेखनमकुर्वाणो न तस्य फलभाग् भवेत्॥
८२७ पूर्वाह्णे दैविकं कार्यमपराह्णे तु पैतृकम्।
एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकम्॥
८२८ यां तिथिं समनुप्राप्य उदयं याति भास्करः।
सा तिथिः सकला ज्ञेया स्नानदानजपादिषु॥
८२९ यां तिथिं समनुप्राप्य अस्तं याति दिवाकरः।
सा तिथिः सकला ज्ञेया दानाध्ययनकर्मसु॥

८३० सा तिथिः सकला ज्ञेया पितृकर्मणि सर्वदा।
८३१ त्रिमुहूर्तापि कर्तव्या या तिथिर्वृद्धिगामिनी।
षण्मुहूर्ता न कर्तव्या या तिथिः क्षयगामिनी॥
८३२ आगतां तिथिमुत्सृज्य तिथिशेषं न योजयेत्।
ज्वलन्तमग्निमुत्सृज्य न हि भस्मनि हूयते॥
८३३ आदित्योदयवेलायां याल्पापि हि तिथिर्भवेत्।
सा पूर्णेव मन्तव्या प्रभूता नोदयं विना॥
८३४ व्रतोपवासस्नानादौ घटिकैका यदा भवेत्।
उदये सा तिथिर्ग्राह्या श्राद्धादावस्तगामिनी॥
८३५ व्रतोपवासनियमे घटिकैका यदा भवेत्।
सा तिथिः सकला ज्ञेया पित्र्यर्थे चापराह्णिकी॥
८३६ व्रतोपवासनियमे घटिकैकापि या भवेत्।
सा तिथिस्तद्दिने पूज्या विपरीता तु पैतृके॥
८३७ तिथिनक्षत्रयोर्योगे द्वयोरेवानुपालनम्।
योगाभावे तिथिर्ग्राह्या देव्याः पूजनकर्मणि॥
८३८
व्रतोपवासनियमैः शरीरोत्तापनैस्तथा।
वर्णाः सर्वेऽपि मुच्यन्ते पातकेभ्यो न संशयः॥
८३९ आहिताग्निरनड्वांश्च ब्रह्मचारी च ते त्रयः।
अश्नन्त एव सिध्यन्ति नैषां सिद्धिरनश्नताम्॥
८४० वैश्याः शूद्राश्च ये मोहाद् उपवासं प्रकुर्वते।
त्रिरात्रं पञ्चरात्रं वा तयोः पुष्टिर्न विद्यते॥
८४१ सायमाद्यन्तयोरह्नोः सायं प्रातश्च मध्यमे।
धर्मोपवासी कुर्वीत नैव भक्तचतुष्टयम्॥

८४२ अभुक्त्वा प्रातराहारं स्नात्वाऽऽचम्य समाहितः।
सूर्याय देवताभ्यश्च निवेद्य व्रतमाचरेत्॥
८४३ सूर्यः सोमो यमः कालो महाभूतानि पञ्च च।
देवा एव हि जानन्ति वृत्तं जन्तोः शुभाशुभम्॥
८४४ सर्वभूतभयं व्याधिः प्रमादो गुरुशासनम्।
अव्रतघ्नानि कथ्यन्ते सकृदेतानि शास्त्रतः॥
८४५ दिनार्धसमयेऽतीते भुज्यते नियमेन यत्।
एकभुक्तमिति प्रोक्तं न्यूनं ग्रासत्रयेण तु॥
८४६ नक्षत्रदर्शनान्नक्तं गृहस्थस्य बुधैः स्मृतम्।
यतेर्दिनाष्टमे भागे तस्य रात्रौ निषिध्यते॥
८४७ उपवासेषु सर्वेषु पूर्वाह्णे पारणं भवेत्।
अन्यथा तु फलस्यार्धं धर्ममेवोपसर्पति॥
८४८ असकृज्जलपानाच्च ताम्बूलस्य च भक्षणात्।
उपवासः प्रदुष्येत दिवास्वापाच्च मैथुनात्॥
८४९ ब्रह्मचर्यमहिंसा च सत्यमामिषवर्जनम्।
व्रतेष्वेतानि चत्वारि चरितव्यानि नित्यशः॥
८५० स्त्रीणां तु प्रेक्षणात् स्पर्शात् ताभिः सङ्कथनादपि।
भिद्यते ब्रह्मचर्यं तु न दारेष्वृतुसङ्गमात्॥
८५१ उपवासो यदा नित्यः श्राद्धं नैमित्तिकं भवेत्।
उपवासं तदा कुर्यादाघ्राय पितृसेवितम्॥

८५२ प्रतिपद्यग्निकरणं द्वितीयायां गवार्चनम्।
क्षत्रक्षयं करिष्येते वित्तनाशं कुलक्षयम्॥
८५३ प्रतिपद्दर्शसंयोगे क्रीडनं तु गवां मतम्।
परविद्धासु यः कुर्यात् पुत्रदारधनक्षयः॥

८५४ या कुहूः प्रतिपन्मिश्रा तत्र गाः पूजयेन् नृप।
पूजने त्रीणि वर्धन्ते प्रजा गावो महीपतिः॥
८५५ गवां क्रीडादिने यत्र रात्रौ दृश्येत चन्द्रमाः।
सोमो राजा पशून् हन्ति सुरभीपूजकं तथा॥

८५६ युगं मध्यन्दिने यत्र तत्रोपोष्य फणीश्वरान्।
क्षीरेणाप्याय्य पञ्चम्यां पूजयेत् प्रयतो नरः॥
८५७ विषाणि तस्य नश्यन्ति न च हिंसन्ति पन्नगाः॥
८५८ देवतास्तस्य तुष्यन्ति कामितं चास्य सिध्यति।
अन्यथा तु वृथा मर्त्याः क्लिश्यन्ति स्वल्पबुद्धयः॥

८५९ शाकं मांसं मसूरांश्च पुनर्भोजनमैथुने।
द्यूतमत्यम्बुपानं च दशम्यां वैष्णवस्त्यजेत्॥
८६० दशम्यामेकभुक्तस्तु मांसमैथुनवर्जितः।
एकादश्यामुपवसेत् पक्षयोरुभयोरपि॥
८६१ एकादश्यां न भुञ्जीयात् पक्षयोरुभयोरपि।
यदि भुङ्क्ते स पापी स्याद् रौरवं याति दारुणम्॥
८६२ न शङ्खेन पिबेत् तोयं न खादेत् कूर्मसूकरौ।
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि॥
८६३ एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि।
वनस्थयतिधर्मोऽयं शुक्लामेव सदा गृही॥
८६४ महद्विद्धापि कर्तव्या या तिथिः क्षयगामिनी।
दशम्येकादशी यत्र तत्रोपोष्य व्रतं चरेत्॥
८६५ विद्धाप्येकादशी कार्या परतो द्वादशी न चेत्॥

८६६ गृहीत्वौदुम्बरं पात्रं वारिपूर्णमुदङ्मुखः।
उपवासं तु गृह्णीयात् यद्वा सङ्कल्पयेद् द्विजः॥
८६७ एकादश्यां निराहारो भूत्वाऽहमपरेऽहनि।
भोक्ष्यामि पुण्डरीकाक्ष गतिर्भव ममाच्युत॥
८६८ इत्युच्चार्य ततो विद्वान् पुष्पाञ्जलिमथार्पयेत्॥
८६९ उपवासो विनश्येत दिवास्वप्नाक्षमैथुनैः।
अत्यये जलपानेन नोपवासः प्रदुष्यति॥
८७० सङ्कटे विषमे प्राप्ते द्वादश्यां पारयेत् कथम्।
अद्भिस्तु पारणं कुर्यात् पुनर्भुक्तं न दोषकृत्॥

८७१ अशिताऽनशिता यस्मादापो विद्वद्भिरीरिताः।
अम्भसा केवलेनैव करिष्ये व्रतपारणम्॥

८७२ चैत्रशुक्लचतुर्दश्यां यः स्नायाच्छिवसन्निधौ।
पिशाचत्वं न तस्य स्यात् गङ्गायां तु विशेषतः॥

८७३ पञ्चदश्यां चतुर्दश्यामष्टम्यां च विशारदः।
तैलं मांसं व्यवायं च क्षुरं च परिवर्जयेत्॥

---

८७४ यथा स्नानं च दानं च सूर्यस्य ग्रहणे दिवा।
सोमस्यापि तथा रात्रौ स्नानं दानं विधीयते॥
८७५ चन्द्रग्रहे तथा रात्रौ स्नानं दानं प्रशस्यते॥
८७६ सूर्यसोमोपरागे तु सोमयाज्यग्निहोत्रवान्।
गार्हपत्ये समिद्धेऽग्नौ स्रुचा हुत्वा विधानतः॥

८७७ सूर्यसोमोपरागेषु स्नात्वा याजी प्रयच्छति।
मोक्षस्नानं पुनः कृत्वा मौनमास्थाय सत्वरः॥
८७८ गार्हपत्यं समिद्भिश्च प्राज्वाल्ययाज्य(प्रज्वाल्याज्यं) स्रुचोद्वहन्।
सूर्योपरागे जुहुयाद् उदुत्यं चित्रमित्यृचा॥
८७९ उपस्थाय ततः पश्चात् नत्वा स्तुत्वा विसर्जयेत्।
एवं कृत्वा तदा याज्यां, सूर्यलोकमवाप्यते॥
८८० सोमोपरागे जुहुयात् आप्यायस्वेति मन्त्रतः।
'सं ते पयांसि' च पुनः हुत्वा चाज्याहुतिद्वयम्॥
८८१ ततः शुद्धिमवाप्नोति सोमयाजी महानिह।
एतं कृत्वा तदा याजी सोमलोकमवाप्नुयात्॥
८८२ चन्द्रसूर्यग्रहे नाद्यादद्यात् स्नात्वा विमुक्तयोः।
अमुक्तयोरस्तगयोर्दृष्ट्वा स्नात्वा परेऽहनि॥
८८३ चन्द्रसूर्यग्रहे भुक्त्वा प्राजापत्येन शुध्यति।
तस्मिन्नेव दिने भुक्त्वा त्रिरात्राच्छुद्धिरिष्यते॥
८८४ सूर्यसोमोपरागे च उक्तकालं विना द्विजाः।
तदन्नं मांसमित्याहुस्तद्भुक्त्वा मांसभुग् भवेत्॥

# ॥अष्टमं प्रकरणम्॥

## ॥दानम्॥

[दानप्रशंसा]

८८५ दुर्लभं भारते वर्षे जन्म तस्मान्मनुष्यता।
मानुष्याद् ब्राह्मणत्वं च दुर्लभं सुतरां मतम्॥
८८६ विप्रत्वे सति दुष्प्रापा विद्यादिगुणयोगिता।
तत्र न्यायार्जितार्थाप्तिस्ततो भक्त्याप्तिरिष्यते॥
८८७ लब्ध्वैतद्गुणसंयोगं तीर्थं पात्रं च पर्व च।
दानानि ये प्रयच्छन्ति कृतार्थास्ते नरा भुवि॥
८८८ यद् ददाति यदश्नाति तदेव धनिनां धनम्।
अन्ये मृतवत् क्रीडन्ते (क्रीडन्ति मृतवत् चान्ये) दारैरपि धनैरपि॥
८८९ नानाविधानि द्रव्याणि धनानि विविधानि च।
आयुष्कामेण देयानि स्वर्गमक्षय्यमिच्छता॥

[दानस्वरूपम्]

८९० अथातो दानविधिं व्याख्यास्यामः॥

८९१ अर्थानामुदिते पात्रे श्रद्धया प्रतिपादनम्।
दानमित्यभिनिर्दिष्टं व्याख्यानं तस्य वक्ष्यते॥
८९२ द्विहेतु षडधिष्ठानं षडङ्गं षड्विपाकयुक्।
चतुष्प्रकारं त्रिविधं त्रिनाशं दानमुच्यते॥

८९३ नाल्पत्वं वा बहुत्वं वा दानस्याऽभ्युदयावहम्।
श्रद्धा भक्तिश्च दानानां वृद्धिक्षयकरे हि ते॥

८९४ धर्ममर्थं च कामं च व्रीडाहर्षभयानि च।
अधिष्ठानानि दानानां षडेतानि प्रचक्षते॥

८९५ पात्रेभ्यो दीयते नित्यमनपेक्ष्य प्रयोजनम्।
केवलं धर्मबुद्ध्या यद् धर्मदानं तदुच्यते॥
८९६ प्रयोजनमपेक्ष्यैव प्रसङ्गात् यत् प्रदीयते।
तदर्थदानमित्याहुरैहिकं फलहेतुकम्॥
८९७ स्त्रीपानमृगयाक्षाणां प्रसङ्गात् यत् प्रदीयते।
अनर्हेषु च रागेण कामदानं तदुच्यते॥
८९८ संसदि व्रीडया स्तुत्या योऽर्थोऽर्थिभ्यः प्रयाचितः।
प्रदीयते चेत् तद्दानं व्रीडादानमिति स्मृतम्॥
८९९ दृष्ट्वा प्रियाणि श्रुत्वा वा हर्षाद्यत् प्रदीयते।
हर्षदानमिति प्राहुर्दानं तद्धर्मचिन्तकाः॥
९०० आक्रोशानर्थहिंसानां प्रतीकाराय यद्भयात्।
दीयते ह्यपकर्तृभ्यो भयदानं तदुच्यते॥

९०१ दाता प्रतिग्रहीता च श्रद्धा देयं च धर्मयुक्।
देशकालौ च दानानामङ्गान्येतानि षड् विदुः॥

९०२ अपापरोगी धर्मात्मा दिक्षुरव्यसनः शुचिः।
अनिन्द्याजीवकर्मा च षड्भिर्दाता प्रशस्यते॥
९०३ त्रिशुक्लः कृशवृत्तिश्च घृणालुः सकलेन्द्रियः।
विमुक्तो योनिदोषेभ्यो ब्राह्मणः पात्रमुच्यते॥
९०४ सौमुख्याद्यभिसम्प्रीतिरर्थिनां दर्शने सदा।
सत्कृतिश्चानसूया च सदा श्रद्धेति कीर्त्यते॥
९०५ अपराबाधमक्लेशं स्वयत्नेनार्जितं धनम्।
स्वल्पं वा विपुलं वापि देयमित्यभिधीयते॥
९०६ यत्र यद् दुर्लभं द्रव्यं यस्मिन् कालेऽपि वा पुनः।
दानार्हौ देशकालौ तौ स्यातां श्रेष्ठौ न चान्यथा॥
९०७ अवस्थादेशकालानां पात्रदात्रोश्च सम्पदा।
हीनं चापि भवेच्छ्रेष्ठं श्रेष्ठं चाप्यन्यथा भवेत्॥

९०८ दुष्फलं निष्फलं हीनं तुल्यं विपुलमक्षयम्।
षड्विपाकयुगुद्दिष्टं षडेतानि विपाकतः॥

९०९ नास्तिकस्तेनहिंस्रेभ्यो जाराय पतिताय च।
पिशुनभ्रूणहन्तृभ्यः प्रदत्तं दुष्फलं भवेत्॥
९१० महदप्यफलं दानं श्रद्धया परिवर्जितम्।
परबाधाकरं दानं परमप्यल्पतां व्रजेत्॥
९११ यथोक्तमपि यद्दानं चित्तेन कलुषेण तु।
तेन सङ्कल्पदोषेण दानं तुल्यफलं भवेत्॥

९१२ युक्ताङ्गैः सकलैः षड्भिर्दानं स्याद् विपुलोदयम्।
अनुक्रोशवशाद् दत्तं दानमक्षय्यतां व्रजेत्॥

९१३ ध्रुवमाजस्रिकं काम्यं नैमित्तिकमिति क्रमात्।
वैदिको दानमार्गोऽयं चतुर्धा वर्ण्यते द्विजैः॥

९१४ प्रपारामतडागादिसर्वकालफलं ध्रुवम्।
तदाजस्रिकमित्याहुर्दीयते यद्दिने दिने॥
९१५ अपत्यविजयैश्वर्यस्त्रीबालार्थं यदिष्यते।
इच्छासंज्ञं तु तद्दानं काम्यमित्यभिधीयते॥
९१६ कालापेक्षं क्रियापेक्षमर्थापेक्षमिति स्मृतम्।
त्रिधा नैमित्तिकं प्रोक्तं सहोमं होमवर्जितम्॥
९१७ राहुदर्शनसङ्क्रान्तियात्राद्यौ प्रसवेषु च।
दानं नैमित्तिकं ज्ञेयं रात्रावपि तदिष्यते॥

९१८ नवोत्तमानि चत्वारि मध्यमानि विधानतः।
अधमानीति शेषाणि त्रिविधत्वमिदं विदुः॥

९१९ अन्नमधुदधिगोरुक्माश्वहस्तिदानान्युत्तमदानानि॥
९२० अन्नं दधि मधु त्राणं गोभूरुक्माश्वहस्तिनः।
दानान्युत्तमदानानि उत्तमद्रव्यदानतः॥
९२१ विद्यादाच्छादनावासपरिभोगौषधानि च।
दानानि मध्यमानीति मध्यमद्रव्यदानतः॥
९२२ उपानत्प्रेङ्खयानानि छत्रपात्रासनानि च।
दीपकाष्ठफलादीनि चामरं बहुवार्षिकम्॥

९२३ बहुत्वादर्थजातानां सङ्ख्या शेषेषु नेष्यते।
अधमान्यवशिष्टानि सर्वदानान्यतो विदुः॥

९२४ इष्टं दत्तमधीतं च विनश्यत्यनुकीर्तनात्।
श्लाघानुशोचनाभ्यां च भग्नतेजा विपद्यते॥
९२५ तस्मादात्मकृतं पुण्यं न वृथा परिकीर्तयेत्।
भुक्तवानिति तं प्राहुस्तमेवं कृतवादिनम्॥

९२६ एवं सर्वगुणोपेतमुक्तदोषैर्विवर्जितम्।
कामधुग्धेनुवद् दानं फलत्याप्सितं फलम्॥
९२७ इह कीर्तिं वदान्याख्यां स्फीतान् भोगान् त्रिविष्टपे।
दानं श्रद्धां तृतीयेऽपि जन्मनि प्रसवोत्तमे॥
९२८ सर्वेषामेव दानानामन्नदानमनुत्तमम्।
कोऽन्योऽस्ति प्राणदादस्माद् विशिष्टो नाऽन्नदात् परः॥
९२९ अन्यायाधिगतां दत्वा सकलां पृथिवीमपि।
श्रद्धावर्जमपात्राय न काञ्चिद् भूतिमाप्नुयात्॥
९३० प्रदाय शाकमुष्टिं वा श्रद्धाभक्तिसमन्वितम्।
महते पात्रभूताय सर्वाभ्युदयमाप्नुयात्॥

[अदेयद्रव्याणि]

९३१ पक्वमन्नं गृहस्थस्य वानप्रस्थस्य गोरसः।
वृत्तिश्च भैक्षवृत्तीनां न देयं पुण्यमिच्छता॥
९३२ न शूद्राय हविर्दद्यात् स्वस्ति (?) क्षीरं तिलान् मधु।
न शूद्रात् प्रतिगृह्णीयात् तेषामन्यान्निवेदयेत्॥

९३३ गोरसं काञ्चनं क्षेत्रं गास्तिलान् मधुसर्पिषी।
तथा सर्वान् रसांश्चापि चाण्डालेभ्यो न दापयेत्॥

[पात्रनिरूपणम्।]

९३४ मात्रश्च ब्राह्मणश्चैव श्रोत्रियश्च ततः परम्।
अनूचानस्तथा भ्रूण ऋषिकल्प ऋषिर्मुनिः॥
९३५ इत्येतेऽष्टौ समुद्दिष्टा ब्राह्मणाः प्रथमं श्रुतौ।
तेषां परः परः श्रेष्ठो विद्यावृत्तविशेषतः॥

९३६ ब्राह्मणानां कुले जातो जातिमात्रो यदा भवेत्।
अनुपेतः क्रियाहीनो मात्र इत्यभिधीयते॥
९३७ एकदेशमतिक्रम्य वेदस्याचारवानृजुः।
स ब्राह्मण इति प्रोक्तो निर्वृतः सत्यवाग् घृणी॥
९३८ एकां शाखां सकल्पां च षड्भिरङ्गैरधीत्य च।
षट्कर्मनिरतो विप्रः श्रोत्रियो नाम धर्मवित्॥
९३९ जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते।
विद्यया चापि विप्रत्वं त्रिभिः श्रोत्रिय उच्यते॥
९४० वेदवेदाङ्गतत्त्वज्ञः शुद्धात्मा पापवर्जितः।
शेषं श्रोत्रियवत् प्राप्तः सोऽनूचान इति स्मृतः॥
९४१ अनूचानगुणोपेतो यज्ञस्वाध्याययन्त्रितः।
भ्रूण इत्युच्यते शिष्टैः शेषभोजी जितेन्द्रियः॥
९४२ वैदिकं लौकिकं चैव सर्वं ज्ञानमवाप्य यः।
आश्रमस्थो वशी नित्यमृषिकल्प इति स्मृतः॥

९४३ ऊर्ध्वरेतास्तपस्युग्रो नियताशी न संशयी।
शापानुग्रहयोः शक्तः सत्यसन्धो भवेदृषिः॥
९४४ निभृतः सर्वतत्त्वज्ञः कामक्रोधविवर्जितः।
ध्यानस्थो निष्क्रियो दान्तस्तुल्यमृत्काञ्चनो मुनिः॥

९४५ एवमन्वयविद्याभ्यां वृत्तेन च समुच्छ्रिताः।
त्रिशुक्ला नाम विप्रेन्द्राः पूज्यन्ते सवनादिषु॥
९४६ प्रतिग्रहमसद्भ्योऽपि कृत्वा विप्रो यथाविधि।
निस्तारयति दातारमात्मानं च स्वतेजसा॥
९४७ न लोके ब्राह्मणेभ्योऽन्यत् पवित्रं पुण्यमेव च।
अशक्यं च द्विजेन्द्राणां नास्ति वृत्तिमतामपि॥
९४८ नियुक्तो हव्यकव्येषु त्रिशुक्लो ब्राह्मणो द्विजैः।
अभिभूतश्च पूर्वोक्तैर्दोषैः स्पृष्टश्च नेष्यते॥
९४९ चतुराश्रमबाह्याय दत्तं भवति निष्फलम्॥
९५० उदक्यान्नादनं येषां ये च केचिदनग्नयः।
कुलं चाश्रोत्रियं येषां सर्वे ते शूद्रधर्मिणः॥
९५१ प्रश्नपूर्वं तु यो दद्याद् ब्राह्मणाय प्रतिग्रहम्।
स पूर्वं नरकं याति ब्राह्मणस्तदनन्तरम्॥

[अन्नदानम्।]

९५२ सर्वेषामपि दानानामन्नदानमनुत्तमम्।
कोऽन्योऽस्ति प्राणदादस्माद् विशिष्टो नाऽन्नदात् परः॥
९५३ कृत्वापि पातकं कर्म यो दद्यादन्नमीप्सितम्।
ब्राह्मणानां विशेषेण स निहन्त्यात्मनोऽश्वराः॥

९५४ आदरेण च भक्त्या च यदन्नमुपदीयते।
तत् प्रीणयति गात्राणि नामृतं मानवर्जितम्॥
९५५ दुर्लभश्चान्नदाता तु भोक्ता चैव सुदुर्लभः।
प्रदाता चैव भोक्ता च तावुभौ स्वर्गगामिनौ॥
९५६ योऽन्नं बहुमतं भुङ्क्ते यश्चान्नं नावमन्यते।
यश्चान्नं प्रीतितो दद्यात् तस्यान्नमुपतिष्ठते॥
९५७ प्रीतितोऽन्नं च यो दद्याद् गृह्णीयाद् योऽभिपूजितः।
प्रीतितोऽक्षयमश्नाति पूजितः स्वर्गमश्नुते॥
९५८ यो दद्यादप्रियेणान्नं यश्चान्नं नाभिनन्दति।
तावुभौ नरके मग्नौ वसेतां शरदः शतम्॥
९५९ [गृहस्थो नियतं] भिक्षां यतिभ्यो न प्रयच्छति।
विमुक्तः सर्वपापेभ्यो नाऽसौ मुक्तिमवाप्नुयात्॥
९६० यो मृष्टमन्नं द्विजपुङ्गवानां
दद्यात् सुराणामथ वाऽतिथिभ्यः।
स पुत्रपौत्रैरभिवर्धमानः
समानतां वृत्ररिपोरुपैति॥

## [गोदानम्]

९६१ विमानवरमारूढो दिव्याभरणभूषितः।
यो गन्तुं वाञ्छति स्वर्गं स गोदानं प्रयच्छतु॥
९६२ दानमप्यधिकं धेनोर्विद्यते वा समं भुवि।
नियतं त्रिदशैर्वासः कल्पितोऽस्यास्तु विग्रहे॥
९६३ विवत्सां रोगिणीं रूक्षां स्थविरां शृङ्गभीषणीम्।
क्षीणक्षीरशरीराङ्गां दत्वा दोषमवाप्नुयात्॥

९६४ सुशीलां लक्षणवतीं युवतीं वत्ससंयुताम्।
बहुदुग्धवतीं स्निग्धां धेनुं दद्याद् विचक्षणः॥

९६५ चामीकरमये शृङ्गे शुभे रौप्यमयाः खुराः।
कांस्यजं दोहनं पृष्ठं ताम्रं वस्त्रयुगान्विता॥
९६६ पुष्पमालावृता घण्टाचामरभूषिता।
दीयते पुच्छदेशेन श्रद्धया दक्षिणान्विता॥
९६७ दत्त्वैवं दत्तभोगाढ्यो दिव्यस्त्रीवृन्दसंवृतः।
गोवत्सरोमतुल्यानि वर्षाणि दिवि मोदते॥

९६८ यावद्वत्समुखा योनौ तथा यद्गर्भनिष्कृतिः।
यावन्न जायते धेनुस्तावद् भूः सचराचरा॥
९६९ अलङ्कृत्योक्तविधिना सुवर्णत्रिपलान्विता।
दातव्या द्विपला मध्या पलाढ्या कन्यसी मता॥
९७० दत्त्वैवं पुरुषः स्वर्गे वससमरपूजितः।
गोवत्सरोमतुल्यानि युगानीप्सितभोगभाक्॥

[वृषदानम्]

९७१ वृषयुग्मं वृषं वापि दत्त्वा गच्छेत् सुरालयम्।
भुङ्क्ते मन्वन्तरं भोगान् द्विगुणान् युग्मलाङ्गली॥
९७२ अनड्वाहौ तु यो दद्यात् द्विजे सीरेण संयुतौ।
अलङ्कृत्य यथाशक्त्या सुबाहौ शुभलक्षणौ॥
९७३ सर्वपापविशुद्धात्मा सर्वकामसमन्वितः।
वर्षाणि वसति स्वर्गे रोमसङ्ख्याप्रमाणतः॥

९७४ यो ददाति बलीवर्दमुक्तेन विधिना शुभम्।
अव्यङ्गं गोप्रदानाच्च भुङ्क्ते दशगुणं फलम्॥

[भूमिदानम्।]

९७५ श्रेष्ठाच्छ्रेष्ठतरं प्रोक्तं भूमिदानं द्विजातिभिः।
तद् दत्त्वा पुरुषः स्वर्गे पूज्यते त्रिदशोत्तमैः॥
९७६ वाञ्छन्ति पितरोऽप्येवं स्वर्गलोके व्यवस्थिताः।
यद्यस्मत्कुलजः कश्चित् भवत्यवनिदानकृत्॥
९७७ नरकस्था मरुल्लोके स्वर्गस्थाः परमं पदम्।
यथा वयमतीता ये व्रजामस्तत्प्रभावतः॥
९७८ किमत्र चित्रं दातारं यत् समुद्धरते धरा।
प्रतिग्रहगृहीतारमपि तारयति द्विजम्॥
९७९ न तद्यज्ञैर्व्रतैर्दानैर्दातृभिः फलमाप्यते।
अपि यद् दत्तया भूम्या दण्डत्रितयमात्रया॥
९८० यद् दानं दीयते किञ्चिद् परत्र स्यादिहैव हि।
भूदानेन पुनः सर्वदानानां प्राप्यते फलम्॥
९८१ ते धन्यास्ते सुकृतिनः कृतार्थास्ते न संशयः।
सत्पात्राय प्रदत्तं यैर्भूदानं विधिना नरैः॥

९८२ कान्तियुक् सुभगः श्रीमान् भवत्यम्बरदानकृत्॥
९८३ छत्रदश्छायया याति यानेनोपानहप्रदः॥
९८४ दीपकोद्योतकृद् राजा भवेन्मार्जनकृन्नरः॥
९८५ सतोयां पथिके विप्रे यो दद्यात् करपात्रिकाम्।
फलं स कूपखातस्य नूनमाप्नोति मानवः॥

९८६ पिपासया न म्रियते सोऽपच्छन्दस्य(श्च)जाय(ये)ते।
नैवाप्नुयात् च व्यसनं करकान् यः प्रयच्छति॥
९८७ ग्रीष्मप्रवेशे मणिकं ददाति द्विजसद्मनि।
योऽम्बुपूरितमाप्नोति स तडागकृतः फलम्॥

[विश्वचक्रदानम्।]

९८८ पुरा स्वयम्भुवा राजन् लोकानां हितकाम्यया।
विश्वचक्रमिदं सृष्टं राज्ञां पापापनुत्तये।
९८९ स्थावरा जङ्गमाश्चैव देवराक्षसपन्नगाः।
यक्षाः पिशाचाः कूष्माण्डा विश्वचक्रं समाश्रिताः॥
९९० कालमृत्युहरं चेदं सर्वपापप्रणाशनम्।
राज्ञां श्रेयस्करं दिव्यं विश्वचक्रमिदं द्विजाः॥
९९१ निर्माय लोकं गतवान् हंसारूढश्चतुर्मुखः।
मान्धातृप्रमुखान् दृष्ट्वा क्षितिपालान् महौजसः॥
९९२ ददौ परमया भक्त्या विप्रेभ्यो दीयतामिति।
इत्युक्त्वा तांस्तदा दत्त्वा पुनर्लोकं जगाम ह॥
९९३ तदा प्रभृत्यदश्चक्रं पूज्यते राजभिः सदा।
दीयते विप्रवर्येभ्यो सर्वश्रेयोपपत्तये॥

९९४ श्रान्तायान्नप्रदः स्वर्गं विमानेनाधिरोहति।
प्राप्नोति दशगोदानफलं रोगिप्रतिक्रियः(या)॥
९९५ प्रक्षाल्य पादौ विप्राय(स्य) लभेद् गोदानजं फलम्।
चन्दनं तालवृन्तं च फलानि कुसुमानि च।
ताम्बूलमासनं शय्यां दत्त्वासन्तं सुखी भवेत्॥

९९६ धर्मज्ञस्य कृतज्ञस्य रक्षार्थं शासतोऽभ्युचीज्।
मेध्यमेव धनं प्राहुस्तीक्ष्णस्यापि महीपतेः॥
९९७ अर्थिनां भूरिभावाच्च देयत्वाच्च महात्मनाम्।
श्रेयान् प्रतिग्रहो राज्ञां नान्येषां ब्राह्मणाद् ऋते॥

९९८ रत्नक्षेत्रवेश्महेमरूप्याभरणान्युत्तमानि॥
९९९ चतुष्पदद्विपदधान्यफलोदकवस्त्रकार्पासादीनि मध्यमानि॥
१००० एतद् व्यतिरिक्तानि द्रव्याण्यधमानि॥
१००१ एषां मध्ये यन्नामतो निषिद्धं, तत्र न प्रतिग्रहप्रायश्चित्तम्॥
१००२ अन्येषां तु देशकालाद्यपेक्षया अग्राह्यत्वदशायां ग्रहणे प्रायश्चित्तविशेष-
विधानम्॥
१००३ न उत्तमादिद्रव्याणां तेन रूपेण ग्राह्यत्वम्॥

१००४ मनुजानां नाभिरन्ध्रादधोभागे षडङ्गुले।
आश्रित्य तत्र पापीयान् पुरुषो वर्तते सदा॥

१००५ ब्रह्माण्डं यस्तु गृह्णाति द्विजः ऋत्वादिभिर्विना।
ऋत्विग्भिः सह दुष्टात्मा राक्षसो भवति ध्रुवम्॥

१००६ तुलादीनि च दानानि यो राजा कर्तुमुद्यतः।
सर्वपापविनिर्मुक्तः सर्वलोकमवाप्नुयात्॥
१००७ तुलायां गोसहस्रेषु आचार्यस्य पुनर्भवः।
आब्रह्मणोऽब्दपर्यन्तं ध्रुवं भूमौ पिशाचता॥
१००८ ऋणापकरणार्थं वा तथा भागार्थमेव वा।
द्विजः प्रतिग्रहं कृत्वा तदर्धं विनियोजयेत्॥

१००९ सुवर्णरत्नरजतैस्तुलाश्च त्रिविधाः स्मृताः।
तासां प्रतिग्रहे विप्रः ऋणयागादिभिर्विना॥
रौरवे नरके घोरे ऋत्विग्भिः सह मज्जति॥

१०१० पुरा वृत्रवधे राजन् बिडौजा विप्रहत्यया।
पीडितः शरणं गत्वा धिषणं स्वपुरोहितम्॥
१०११ उवाच वचनं पश्चात् तद्दोषोपरमाय वै।
गुरुस्तं पुनरप्याह लोकानुग्रहकाम्यया॥
१०१२ राजानः क्रूरकर्माणः राज्यार्थं धनलोभतः।
मातरं पितरं पुत्रं घ्नन्ति वा भ्रातरं तथा॥
१०१३ किं न कुर्वन्ति कामान्धाः किं न कुर्वन्ति पापिनः।
किं न कुर्वन्ति भूपालाः किं न कुर्वन्ति योषितः॥
१०१४ तस्मादेतद् विशुद्ध्यर्थं तथा राजन्यशेखर।
कर्तव्यः पुण्यकाले तु महाभूतघटः सकृत्॥
१०१५ तस्याऽऽचरणमात्रेण मुक्तो भवति किल्बिषात्।
तथेति वृत्रहा सद्यो पुण्यकाल उपागते॥
१०१६ यत् प्रोक्तं गुरुणा पूर्वं विधिना तच्चकार ह।
विप्रहत्या गता सद्यः किमन्यैरुपपातकैः॥

१०१७ महाभूतघटस्याऽस्य प्रायश्चित्तमिदं शृणु।
येन पूतो भवेद् विप्रस्तदहं कथयामि ते॥
१०१८ तं च भूतघटं गृह्णन् विप्रो भवति राक्षसः।
सहस्राब्दं वने घोरे निर्जले निर्जने वसेत्॥
१०१९ पक्षमात्रं जपेद् देवीं द्विजः पापविशुद्धये।
तस्योपनयनं भूयः पुनःसंस्कारकर्मणा॥

१०२० निधुतेनाभिषेकेण चतुर्भागाम्बयेन च।
नान्यथा शुद्धिमाप्नोति ब्रह्मराक्षसदेहतः॥
१०२१ तदर्धं ब्रह्मणः प्रोक्तं तथैव सदसस्पतेः।
द्वाःस्थानां ज्ञापकानां च तयोरर्धं प्रकल्पयेत्॥
१०२२ पूजितैर्भूमिपालैस्तं महाभूतघटं शुभम्।
गृह्णाति मुखजो लोभात् तस्य नास्तीह निष्कृतिः॥

१०२३ तुलायां गोसहस्रे च गोकुले विश्वमण्डले।
सप्तसागरदाने च चर्मधेनुप्रतिग्रहे॥
१०२४ महाभूतघटे चैव आचार्यो यो भवेद् द्विजः।
स सद्यः पतितो भूयात् पुनःसंस्कारमर्हति॥
तस्योपनयनं भूयः स कर्मार्हो भवेदिह॥
१०२५ प्रायश्चित्तेन पूतात्मा नवलक्षजपादिना।
पुनःसंस्कारमात्रेण शुद्धिमाप्नोति पूर्वजः॥
अधिकारो भवेत् पश्चात् पैतृकादिषु कर्मसु॥
१०२६ तदानीं वा परेद्युर्वा पञ्चमे वाथ सप्तमे।
यस्मिन् कस्मिन् दिने वापि मनसा परिशुद्धिमान्॥
१०२७ गन्धाक्षतान् पञ्चगव्यं ताम्बूलानि कुशानपि।
ब्राह्मणान् वेदसम्पन्नान् आमन्त्र्य सरितस्तटे॥
१०२८ गत्वा सर्वैः समालोच्य बन्धुभिः सह पार्थिव।
तैरनुज्ञामवाप्याऽऽशु प्रणिपत्य यथाक्रमम्॥
१०२९ द्रव्यलुब्धतया विप्राः मयाऽकारि प्रतिग्रहः।
यागादिकरणेऽशक्तस्तत्क्षन्तव्यं द्विजोत्तमाः॥
१०३० इति नत्वा व्रजेत् तीर्थं प्रार्थयित्वा क्षमापयेत्।
मलापकर्षणं कृत्वा नित्यकर्म समाप्य च॥

१०३१ पुण्ड्रादिकं ततो धृत्वा दर्भपाणिर्जितेन्द्रियः।
चतुर्विंशतिकान् विप्रान् वेदशास्त्रपरिष्कृतान्॥
१०३२ अष्टादश द्वादश वा पर्षदर्थे नियोजयेत्।
स्थापयित्वा ततः सम्यक् परिषद्विधिपूर्वकम्॥
१०३३ उपविश्य शुचौ देशे तदग्रे प्राङ्मुखः शुचिः।
पूर्णेन मनसा युक्तः प्राणायामत्रयं चरेत्॥
१०३४ पुण्याहवाचनं कुर्यात् तेन तोयेन मार्जयेत्।
नान्दीश्राद्धं ततः कुर्यात् केचिदिच्छन्ति पार्थिव॥
१०३५ प्राणानायम्य विधिवद् देशकालौ च कीर्तयेत्।
निमित्तं कीर्तयेद् विद्वान् यस्मिन् क्षेत्रे यदा तिथौ॥
१०३६ यस्य राज्ञः समुत्पन्नं पापमेतत्परिग्रहात्।
तद्गोत्र-नाम-नक्षत्र-राशिपूर्वं समुच्चरेत्॥
१०३७ तद्तद्गोत्रं सनक्षत्रं दानमन्त्रं प्रकीर्तयेत्।
प्रायश्चित्तमहं कुर्यां धर्मशास्त्रानुसारतः॥
१०३८ इति सङ्कल्प्य विधिवद् गन्धपुष्पाक्षतैर्मुदा।
अभ्यर्च्य पर्षदं सम्यक् नारायणमनुस्मरन्॥
१०३९ तदष्टमांशद्रव्यस्य चतुर्भागस्य वाग्यतः।
भागमेकं ततो बद्ध्वा स्ववस्त्रेऽक्षतपूर्वकम्॥
१०४० समस्तसम्पदित्याद्यैर्वाक्यैः पौराणिकैः पठन्।
त्रिः परिक्रम्य यत्नेन प्रणम्योत्थाय दण्डवत्॥
तदग्रे दक्षिणां स्थाप्य ततो विज्ञापयेत् सुधीः॥
१०४१ सभा तु तत् समागृह्य तेन विज्ञापितं वचः।
नत्वा विप्रान् सप्त पञ्च त्रयं वा विदुषां मुदा॥
१०४२ पूर्वोक्तदक्षिणां दत्त्वा प्रेषयेदनुवादकम्।
प्रेषयन्त्विति तानुक्त्वा स्मरेन्नारायणं विभुम्॥

१०४३ तत्रैकं विदुषां शान्तमनुवादार्थमादरात्।
दक्षिणां बहुशो दत्त्वा प्रेषयेयुर्द्विजोत्तमाः॥
सोऽपि स्नात्वा दर्भपाणिः कर्तारमनुबोधयेत्॥
१०४४ तद्गोत्रनामनक्षत्रमनूच्चार्योपदेशयेत्।
तत् सर्वमनुवादाच्च श्रुत्वा वाक्यं समाचरेत्॥
१०४५ हिरण्यस्नानरूपेण प्रायश्चित्तं विशोधनम्।
प्राच्याङ्गवपनं कृत्वा दन्तधावनपूर्वकम्॥
१०४६ स्नानं कृत्वा पञ्चगव्यैस्तत्तन्मन्त्रैः पृथक् पृथक्।
गोदानं च ततः कुर्यात् प्राच्याङ्गपरितुष्टये॥
१०४७ उदीच्याङ्गानि सर्वाणि शालाहोमं ततः परम्।
नान्दीश्राद्धं वैष्णवाख्यं पञ्चगव्यमनुत्तमम्॥
१०४८ शालाहोमं ततः कुर्यादुत्तराख्यं विचक्षणः।
पुनर्गोदानकृत् कर्ता दशदानमनुक्रमात्॥
१०४९ भूरिदानं ततः कृत्वा ब्राह्मणान् भोजयेत् सुधीः॥
१०५० एवं कृते द्विजो नित्यं मुक्तो दोषात् परिग्रहात्।
अन्यथा दोषमाप्नोति दुःखी स्यात् जन्मजन्मनि॥

# ॥नवमं प्रकरणम्॥

## ॥द्रव्यशुद्धिः॥

१०५१ वक्ष्यतेऽतः (वक्षाम्यतः) परं सर्वं मेध्यमेध्यसमुच्चयम्॥

१०५२ शुचि पूतं स्वयंशुद्धं पवित्रं चेति केवलम्।
मेध्यं चतुर्विधं लोके प्रजानां मनुरब्रवीत्॥

१०५३ नवं वा निर्मलं वापि शुचीति द्रव्यमुच्यते।
शुद्धं पवित्रभूतं च पूतमित्यभिधीयते॥
१०५४ स्वयमेव हि यद् द्रव्यं केवलं मेध्यतां गतम्।
स्थावरं जङ्गमं वापि स्वयंशुद्धमिति स्मृतम्॥
१०५५ अन्यद्रव्यैरदूष्यं यत् स्वयमन्यानि शोधयेत्।
हव्यकव्येषु पूज्यं यत् तत् पवित्रमिति स्मृतम्॥

१०५६ अथ सर्वाणि धान्यानि द्रव्याण्याभरणानि च।
अवर्ज्यभक्ष्यभोज्यानि शुचीन्येतानि केवलम्॥
१०५७ वर्जिते निखिलद्रव्येऽशुचिसंज्ञा प्रवर्तते।
तस्मिन्नेवेह कर्मण्ये पूतसंज्ञा प्रवर्तते॥
१०५८ तस्माच्छुद्धं तु कर्मण्यं शुचीत्याहुर्द्विजातयः।
निर्मलं संस्कृतं द्रव्यं क्रियार्हं पूतमुच्यते॥

१०५९ अदुष्टं वाक्प्रशस्तं हि स्वयंशुद्धं च केवलम्।
त्रीण्येतानि विशुद्धानि भगवान् मनुरब्रवीत्॥
१०६० वसतिश्चमसो यानं वाहनं साधनानि च।
क्षुरो नौरासनं चेति स्वयंशुद्धमिति स्मृतम्॥
१०६१ शिशवश्च स्वयंशुद्धा योषितश्चानृतौ तथा।
ब्रह्महत्या हि नारीणामृतुकालेन संस्पृशेत्॥
१०६२ अदुष्टा संतता धारा वातोद्धूताश्च रेणवः।
स्त्रियो वृद्धाश्च बालाश्च न दुष्यन्ति कदाचन॥
१०६३ आकरा हि स्वयंशुद्धा द्रव्याणामिति निर्णयः।
क्रीतं च व्यवहारिभ्यः पण्यं शुद्धमिति स्मृतम्॥
१०६४ आपः शुद्धा भूमिगताः शुचिर्नारी पतिव्रता।
शुचिर्धर्मपरो ......(नित्यं) सन्तुष्टो ब्राह्मणः शुचिः॥
१०६५ अजाश्वा मुखतो मेध्या गावो मेध्यास्तु पृष्ठतः।
तरवः पुष्पिता मेध्या ब्राह्मणाश्चैव सर्वतः॥
१०६६ पृष्ठतो गौर्गजः स्कन्धे सर्वतोऽश्वः शुचिस्तथा।
नृणां मूत्रपुरीषे च अमेध्यं मलमेव च॥
गोः पुरीषं च मूत्रं च नित्यं मेध्यमिति स्थितिः॥
१०६७ पादौ शुची ब्राह्मणस्य अजाश्वानां मुखं शुचि।
गवां पृष्ठानि मेध्यानि सर्वगात्राणि योषिताम्॥
१०६८ आत्मशय्यासनं वस्त्रं जायापत्यं कमण्डलुः।
शुचीन्यात्मनि प्तानि परेषामशुचीनि हि॥
१०६९ दधि-सर्पिः-पयः-क्षौद्रभाण्डे दोषो न विद्यते।
मार्जारश्चैव दर्वीच मारुतश्च सदा शुचिः॥
१०७० गोशकृच्छुद्धदेशस्थं श्मशानादनुद्धृतं शिवम्।
अग्राम्या मृद्भवेच्छुद्धा श्लक्ष्णा विण्मूत्रवर्जिता॥

## ९. द्रव्यशुद्धिः।

१०७१ द्रव्याणामग्निदग्धानां मेध्यत्वमुपदिश्यते।
ज्वालाभिमृष्टपात्राणां शुचित्वं नियतं भवेत्॥
१०७२ भस्म क्षौद्रं सुवर्णं च सदर्भाः कुतपास्तिलाः।
अपामार्गशिरीषार्काः पद्ममामलकं मणिः॥
१०७३ मालानि सर्षपा दूर्वाः सदा भद्राः प्रियङ्गवः।
अक्षता रोचना लाजा हरिद्रा चन्दनं यवाः॥
१०७४ पलाशखदिराश्वत्थतुलसीधातकीवटाः।
एतान्याहुः पवित्राणि ब्राह्मणा हव्यकव्ययोः॥
१०७५ पौष्टिकानि मङ्गल्यानि शोधनानि च देहिनाम्।
तथाऽपोऽग्निः शकृन्मृच्च पवित्राणि विशेषतः॥
सर्वशौचविशुद्ध्यर्थं सर्वेषां सर्वतः सदा॥

१०७६ अकस्मात्तः समिद्धोऽग्निर्दुर्मनुष्यैरदूषितः।
सर्वेषामप्यशौचानां समर्थः शोधनाय सः॥
१०७७ अग्नेर्वृषलभुक्तस्य ग्रहणं नास्त्यनापदि।
श्वपाकवृषलौ भोक्तुं ब्राह्मणाग्निं च नार्हतः॥
१०७८ चण्डालाग्निरमेध्याग्निः सूतकाग्निश्च कर्हिचित्।
पतिताग्निश्चिताग्निश्च न शिष्टग्रहणोचिताः॥

[अमेध्यत्वम्]

१०७९ मानुषास्थि शवं विष्ठा रेतो मूत्रार्तवं वसा।
स्वेदोऽश्रुदूषिका श्लेष्मा मद्यं चामेध्यमुच्यते॥
१०८० दूषितं वर्जितं दुष्टं कश्मलं चेति लिङ्गतः।
चतुर्विधममेध्यं च सर्वं व्याख्यास्यते पुनः॥

१०८१ शुच्यप्यशुचिसंस्पृष्टं द्रव्यं दूषितमुच्यते।
अभक्ष्यभोज्यपेयानि वर्जितानि प्रचक्षते॥
१०८२ त्यक्तः पतितचाण्डालौ ग्राम्यसूकरकुक्कुटौ।
श्वा च नित्यं विवर्ज्याः स्युः षडेते धर्मतः सभाः॥
१०८३ सव्रणः सूतकी सूती मत्तोन्मत्तरजस्वलाः।
मृतबन्धुरशुद्धश्च वर्ज्यान्यष्टौ स्वकालतः॥
१०८४ स्वेदाश्रुबिन्दवः फेनो निरस्तं नखरोम च।
आर्द्रं चर्मासृगित्येतद् दुष्टमाहुर्द्विजातयः॥
१०८५ मानुषास्थि शवं विष्ठा रेतो मूत्रार्तवानि च।
कुणपं पूयमित्येत् कश्मलं समुदाहृतम्॥
१०८६ दूषिते प्रोक्षणेनापि शुद्धिस्तूक्ता विधानतः।
दुष्टे मार्जनसंस्कारैः कश्मले सर्वथा भवेत्॥

१०८७ देश(शं)कालं तथात्मानः(नं) द्रव्यं द्रव्यप्रयोजनम्।
उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेत्॥

[भूमिशुद्धिः]

१०८८ दहनं खननं भूमेरुपलेपनवापने।
पर्जन्यवर्षणं चेति शौचं पञ्चविधं स्मृतम्॥
१०८९ प्रसूते गर्भिणी यत्र म्रियते यत्र मानुषः।
चण्डालैरुषितं यत्र यत्रोपन्यस्यते शवः॥
१०९० विण्मूत्रोपहतं यच्च कुणपो यत्र दृश्यते।
एवं कश्मलभूयिष्ठा भूरमेध्येति लक्ष्यते॥

१०९१ श्वसूकरखरोष्ट्राद्यैः संस्पृष्टा दुष्टतां व्रजेत्।
अङ्गारतुषकेशास्थिभस्माद्यैर्मलिना भवेत्॥
१०९२ पञ्चधा वा चतुर्धा वा भूरमेध्या विशुध्यति।
दुष्टा द्विधा त्रिधा वापि शोध्यते मलिनैकधा॥

[जलशुद्धिः]

१०९३ श्वशृगालखरोष्ट्रैश्च क्रव्याद्भिश्च जुगुप्सितम्।
उद्धरेदुदकं सर्वं पञ्च पिण्डान् मृदस्तथा॥
१०९४ अविगन्धा रसोपेता निर्मलाः पृथिवीगताः।
अक्षीणाश्चैव गोपानादापः शुद्धतराः स्मृताः॥
१०९५ उद्धृता वा प्रशस्यन्ते शुद्धैः पात्रैर्यथाविधि।
एकरात्रोषितास्तास्तु त्यजेदापः समुद्धृताः॥
१०९६ अक्षुब्धानामपां नास्ति प्रभूतानां च दूषणम्।
स्तोकानामुद्धृतानां च कश्मलैर्दूषणं भवेत्॥
१०९७ अक्षोभ्याणि तडागानि नदीवापीसरांसि च।
कश्मलाशुचियुक्तानि तीर्थतः परिवर्जयेत्॥
१०९८ येषामभक्ष्यं मांसं च तच्छरीरैर्युतं च यत्।
वापीकूपतडागेषु जलं सर्वं च दुष्यति॥
१०९९ सकर्दमं सकुणपं तेभ्यस्तोयमपास्य तत्।
प्रक्षिपेत् पञ्चगव्यं च समन्त्रं सर्वशुद्धिकृत्॥
११०० अपास्य कुणपं तेभ्यो बहुतोयेभ्य एव वा।
शतं षष्ट्यथवा त्रिंशत्तोयकुम्भान् समुद्धरेत्।
पञ्चगव्यं ततस्तेषु प्रक्षिपेन्मन्त्रपूर्वकम्॥

[शारीरशुद्धिः।]

११०१ तथा शरीरे स्रोतोभ्यो मलनिष्यन्दविस्रवात्।
अन्नादीनां प्रवेशाच्च स्यादशुद्धिर्विशेषतः॥
११०२ पतिताशुच्यमेध्यानां स्पर्शनाच्चाशुचिर्भवेत्।
स्वप्नाद् वस्त्रविपर्यासात् क्षुताद्ध्वपरिश्रमात्॥
११०३ उक्त्वा च वचनं शुष्कमनृतं क्रूरमेव वा।
ईप्साविद्धं धनुर्लक्ष्यं दृष्ट्वा वाप्यशुचिर्भवेत्॥
११०४ प्रलेपस्नेहगन्धानामशुचौ व्यपकर्षणम्।
शौचलक्षणमित्याहुर्मृदम्भोगोमयादिभिः॥
११०५ लेपे स्नेहे च गन्धे च व्यपकृष्टे सुदूरतः।
पश्चादाचमनं चापि शौचार्थं वक्ष्यते विधिः॥
११०६ आददीत मृदो यश्च षट्सु पूर्वेषु शुद्धये।
उत्तरेषु च षट्स्वद्भिः केवलाभिर्विशुध्यति॥
११०७ मानुषास्थि वसां विष्ठामार्तवं मूत्ररेतसी।
मज्जानं शोणितं वापि परस्य यदि संस्पृशेत्॥
११०८ स्नात्वाऽपमृज्य लेपादीनाचम्य स शुचिर्भवेत्।
तान्येव स्वानि संस्पृश्य पूतः स्यात् परिमार्जनात्॥
११०९ श्वपाकं पतितं चान्त्यमुन्मत्तं शवहारकम्।
सूतिकां साविकां नारीं रजसा च परिप्लुताम्॥
१११० श्वकुक्कुटवराहांश्च ग्राम्यान् संस्पृश्य मानवः।
सचैलः सशिराः स्नात्वा तदानीमेव शुध्यति॥
११११ अशुद्धान् स्वयमप्येतान् अशुद्धस्तु यदि स्पृशेत्।
विशुध्यत्युपवासेन तथा कृच्छ्रेण वा पुनः॥
१११२ पतितचण्डालसूतिकोदक्याशवस्पृष्टितत्स्पृष्ट्युपस्पर्शने सचैलः स्नातः

शुध्येत्॥

१११३ उपस्पृश्याशुचिस्पृष्टं तृतीयं वापि मानवः।
हस्तौ पादौ च तोयेन प्रक्षाल्याचम्य शुध्यति॥

१११४ विप्रो विप्रेण संस्पृष्ट उच्छिष्टेन कथञ्चन।
आचम्यैव तु शुद्धः स्यादापस्तम्बोऽब्रवीन् मनुः(मुनिः)॥

१११५ क्लिन्नो भिन्नो शवश्चैव कुम्भस्थो यदि दृश्यते।
पयः पिबेत् त्रिरात्रेण मानुषे त्रिगुणं स्मृतम्॥

१११६ रेतोमूत्रशकृन्मोक्षे भोजने च परिश्रमे।
शौचमेवंविधं प्रोक्तमीषच्चान्यत्र वर्तते॥

१११७ उच्छिष्टं मानवं स्पृष्ट्वा भोज्यं चापि तथाविधम्।
तथैव हस्तौ पादौ च प्रक्षाल्याचम्य शुध्यति॥

१११८ यदम्भः शौचनिर्मुक्तं क्षितिं प्राप्य विनश्यति।
प्रक्षाल्याशुचिलिप्तं च स्पृष्ट्वाचम्य विशुध्यति॥

१११९ ऊर्ध्वं नाभेः करौ मुक्त्वा यदङ्गमुपहन्यते।
तत्र स्नानमधस्तात्तु प्रक्षाल्याचम्य शुध्यति॥

११२० विशेषशौचं वक्ष्यामि भोजनक्षुरकर्मणोः।
सामान्येन हि निर्दिष्टः सर्वत्राचमनक्रमः॥

[तैजसादिद्रव्यशुद्धिः]

१०२१ हेमस्फाटिकरौप्याणां यज्ञेषु चमसस्य च।
यतीनां चैव पात्राणामद्भिः शौचं विधीयते॥

१०२२ अश्मनां काचभाण्डानां हेम्नामिव विशोधनम्।
निर्लेपं काञ्चनं भाण्डं जलेनैव विशुध्यति॥

११२३ गवां घ्रातेषु कांस्येषु शूद्रोच्छिष्टेषु वा पुनः।
दशभिर्भस्मभिः शुद्धिः श्वपाकोपहतेषु च॥
११२४ तान्तवं मलिनं पूर्वमद्भिः क्षारैश्च शोधयेत्।
अंशुभिः शोषयित्वा वा वायुना वा समाहरेत्॥
११२५ ऊर्णकौशेयकुतपपट्टक्षौमदुकूलजाः।
अल्पशौचा भवन्त्येते शोषणप्रोक्षणादिभिः॥
११२६ तान्येवामेध्ययुक्तानि क्षालयेच्छोधनैः स्वकैः।
धान्यकल्कैस्तु फलजै रसैः क्षारानुगैरपि॥
११२७ तूलिकामुपधानं च पुष्परक्ताम्बरं तथा।
शोषयित्वाऽऽतपे किञ्चित् करैः सम्मार्जयेन् मुहुः॥
११२८ पश्चाच्च वारिणा प्रोक्ष्य विनियुञ्जीत कर्मणि।
तान्यप्यतिमलिष्ठानि यथावत् परिशोधयेत्॥
११२९ लोहानां दहनाच्छुद्धिर्भस्मना गोमयेन च।
दहनात् खननाद् वापि शैलानामम्भसापि वा॥
११३० काष्ठानां तक्षणाच्छुद्धिर्मृद्गोमयजलैरपि।
मृण्मयानां तु पात्राणां दहनाच्छुद्धिरिष्यते॥
११३१ सर्वद्रवाणां पक्वानां लवणस्य गुडस्य च।
नान्यच्छौचं परित्यागाद् अशुद्धानामिति स्मृतिः॥
११३२ तोयाभावे परस्पर्शे भूमिसंवेशनेऽपि च।
कुण्डिकायाः परित्यागो दहनं वापदि स्मृतम्॥
११३३ द्रव्याणामवशिष्टानां तोयाग्निभ्यां विशोधनम्।
शोधनार्थं हि सर्वेषामुभयं ब्राह्मणैः स्मृतम्॥

११३४ श्वपाको यत्स्पृशेद् द्रव्यं मृण्मयं द्रवमेव च।
पक्वं वा भोज्यकल्पं वा तत्सर्वं परिवर्जयेत्॥

अ॰ १

## ९. द्रव्यशुद्धिः।

११३५ दिवाकीर्त्यैस्तु संस्पृष्टं धान्यं मूलं फलानि च।
प्रक्षालनेन शुध्येत परित्यागान् महीमयम्॥
प्रक्षालनेन सद्ग्राह्यमिति वै लोकसम्मतम्॥
११३६ उच्छिष्टाशुचिभिः स्पृष्टमद्रवं शोध्यतेऽम्भसा।
द्रवं वापि प्रभूतं च शोधयेत् प्रोक्षणादिभिः॥
११३७ भक्तधान्यादिराशीनामेकदेशस्य दूषणे।
तावन्मात्रं समुद्धृत्य शेषं प्रोक्षणमर्हति॥

११३८ अजा गावो महिष्यश्च ब्राह्मण्यश्च प्रसूतिकाः।
दशरात्रेण शुध्यन्ति भूमिष्ठं च नवोदकम्॥
११३९ मार्जनात् क्षालनाच्छुद्धिरश्मनः क्षोभितस्य च॥

११४० शयनासनयानादिदेहबन्धानि यानि च।
वस्त्राण्येतानि सर्वाणि संहतानि प्रचक्षते॥

# ॥दशमं प्रकरणम्॥

## ॥आशौचम्॥

११४१ आशौचं द्विविधं प्रोक्तं बाह्यं चाभ्यन्तरं तथा॥
११४२ जनने मरणे नित्यमाशौचमनुधावति।
सपिण्डान् मातृबन्धूंश्च यत्र क्वचन गच्छतः॥
११४३ योनिज्ञातिद्विजेष्विष्टमाशौचं सहवासिषु।
भर्तृगुर्वोरशौचं स्यान् मृत्युप्रसवकारणम्॥
कारणाद् गच्छति प्रैष्यं तदाशुध्यन्ततां व्रजेत्॥
११४४ रात्रयो मासतुल्याः स्युर्जनन्या गर्भसंस्रवे॥
११४५ [जाते पुत्रे पितुः स्नानं सचैलं तु विधीयते।]
माता शुध्येद् दशाहेन [स्नानात्तु स्पर्शनं पितुः॥]
११४६ शूद्रस्य त्रिंशता शुद्धिर्विंशत्या दिवसैर्विशः।
राज्ञः पञ्चदशाहेन दशाभिर्ब्राह्मणस्य च॥
११४७ स्वाशौचकालाद् विज्ञेयं स्पर्शनं च त्रिभागतः।
शूद्रविट्क्षत्रविप्राणां यथाशास्त्रं प्रचोदितम्॥
११४८ आशौचं दशरात्रं तु सर्वेषामपरे विदुः।
निधने प्रसवे चैव पश्यन्तः कर्मणः क्षयम्॥
११४९ दशाहादित्रिभागेन कृते सञ्चयने क्रमात्।
अङ्गस्पर्शनमिच्छन्ति वर्णानां तत्त्वदर्शिनः॥

११५० त्रिचतुःपञ्चदशभिः स्पृश्या वर्णाः क्रमेण तु।
भोज्यान्नो दशभिर्विप्रः शेषा द्वित्रिषडुत्तरैः॥
११५१ सर्ववर्णेषु दायादा ये स्युर्विप्रस्य बान्धवाः।
तेषां दशाहमाशौचं विप्राशौचे विधीयते॥
११५२ मृतसूते तु दासीनां पत्नीनां चानुलोमिनाम्।
स्वामितुल्यं भवेच्छौचं मृते स्वामिनि यौनकम्॥
११५३ प्राकृतानां तु वर्णानामाशौचं सम्प्रकीर्तितम्॥
११५४ समानोदकानां त्र्यहं गोत्रजानामहः स्मृतम्॥
११५५ ग्रन्थार्थतो विजानाति वेदमङ्गैः समन्वितम्।
सकल्पं सरहस्यं च क्रियावांश्चेन्न सूतकम्॥
११५६ चत्वार्यधीतवेदानामहान्याशौचमिष्यते।
वेदाग्नियुक्तविप्रस्य त्र्यहमाशौचमिष्यते॥
११५७ व्रताभ्यां श्रुतयुक्तस्य दिनमेकं विधीयते।
व्रतैः साकं कर्मयुक्तः सद्यः शुचिरसंशयः॥
११५८ व्रतैर्युक्तस्य राज्ञस्तु द्वादशैकादश दश।
वैश्यस्यैवं पञ्चदशान्द्वादशैकादश क्रमात्॥
अर्धमासं तु शुश्रूषोः शूद्रस्याशौचमिष्यते॥
११५९ अस्नात्वा चाप्यहुत्वा च अदत्त्वा च तथा द्विजः।
एवंविधस्य विप्रस्य सर्वदा सूतकं भवेत्॥
११६० नैष्ठिकानां वनस्थानां यतीनां ब्रह्मचारिणाम्।
नाशौचं सूतके प्रोक्तं शावे वापि तथैव च॥
११६१ क्षत्रियस्याभिषिक्तस्य निवृत्तस्य च लिङ्गिनः।
प्राधान्यात् आगतश्चैव नाशुद्धाशुचयः स्मृताः॥
११६२ डिम्बाशनिहतानां च विश्रुता पार्थिवेन च।
गोब्राह्मणस्य चैवार्थे यस्य चेच्छति पार्थिवः॥

११६३ उद्यतैराहवे शस्त्रैः क्षत्रधर्महतस्य च।
सद्यः सन्तिष्ठते यज्ञस्तथाशौचमिति स्मृतम्॥
११६४ दग्ध्वास्थि पित्रोः पुत्रस्तु दशाहमशुचिर्भवेत्।
तयोः प्रतिकृतिं दग्ध्वा शाववच्छौचमिष्यते॥
११६५ यः समानोदकं प्रेतं वहेद् वाथ दहेत्तथा।
तस्याशौचं दशाहं स्यादन्येषां तु त्र्यहं विदुः॥
११६६ दुर्मृतं यो वहेत् स्कन्धे दहेद् वापि तदेव वा।
पराकमुभयोः प्रोक्तं देहशुद्ध्यर्थमादरात्॥
११६७ चतुर्थे पञ्चमे वाऽह्नि संस्पर्शः कथितो बुधैः॥

[सन्निपाताशौचम्।]

११६८ सूतिकानां भवेच्छुद्धिः कालेनैव रजःक्षये।
नाशौचान्तरपातेन सूतके मृतकेऽपि च॥
११६९ शावान्ते शाव आयाते पूर्वाशौचेन शुध्यति।
गुरुणा लघु शुध्येत तु लघुना नैव तद् गुरु॥
११७० पुनःपाते दशाहात् प्राक् पूर्वेण सह गच्छति।
दशमेऽह्न्यापतेद् यस्य द्व्यहात् स तु विशुध्यति॥
११७१ प्रभाते तु त्रिरात्रेण दशरात्रेष्वयं विधिः॥
११७२ परतः परतः शुद्धिरघवृद्धौ विधीयते।
स्यात् चेत् पञ्चतमादह्नः पूर्वेणाप्यनुशिष्यते॥
११७३ अघानां यौगपद्ये तु ज्ञेया शुद्धिर्गरीयसा।
मरणोत्पत्तियोगे तु गरीयो मरणं भवेत्॥
११७४ मृतं पतिमनुव्रज्य पत्नी चेत् ज्वलनं गता।
न तत्र पाक्षिणी कार्या पैतृकादेव शुध्यति॥

[अतिक्रान्ताशौचम्।]

११७५ आशौचाहःस्वतीतेषु बन्धुश्चेच्छ्रूयते मृतः।
तत्र त्रिरात्रमाशौचं भवेत् संवत्सरान्तरे॥
११७६ बन्धुर्माता पिता चैव स्त्रीणां च पतिरेव च॥
११७७ ऊर्ध्वं संवत्सरार्धात् तु श्रूयते चेत् मृतो जनः
भवेदेकाहमेवात्र तच्च संन्यासिनां न तु॥
११७८ आत्रिपक्षात् त्रिरात्रं स्यात् षण्मासात् पक्षिणी तथा।
परमेकाहमावर्षादूर्ध्वं स्नातो विशुध्यति॥
११७९ मासत्रये त्रिरात्रं स्यात् षण्मासे पक्षिणी तथा।
अहस्तु नवमादर्वागूर्ध्वं स्नानेन शुध्यति॥
११८० नाशौचं प्रसवस्यास्ति अतीतेषु दिनेष्वपि॥

[विदेशस्थाशौचम्।]

११८१ प्रोषिते कालशेषः स्यादशेषे त्र्यहमेव तु।
सर्वेषां वत्सरे पूर्णे प्रेते दत्त्वोदकं शुचिः॥
११८२ पितरौ चेन्मृतौ स्यातां दूरस्थोऽपि हि पुत्रकः
श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेत्॥

# ॥एकादशं प्रकरणम्॥

## ॥अन्त्येष्टिः॥

[उत्क्रमणम्]

११८३ उभयोः पक्षयोः (पक्षद्वयस्य) प्रतिपत् षष्ठी चैव हरेर्दिनम्।
एता नन्दा महाराज भद्रा वक्ष्ये तथा शृणु॥
११८४ द्वितीया सप्तमी चैव द्वादशी पक्षयोर्द्वयोः।
एता भद्राश्च तिथयो मरणे पापदायिकाः॥
११८५ भानुः कुजो भृगुर्मन्दवारो दुष्टो नृणां मृतौ।
आयुर्हानिर्यशोहानिः कुलकीर्तिविनाशनम्॥
११८६ मरणोत्क्रमाद् राजन् योजनीयं शनैः शनैः।
भानौ कुजे शनौ वस्त्रं तत्-तद्-वर्णं प्रदापयेत्॥
भृगौ हिरण्यसहितं वस्त्रदानं विशोधनम्॥
११८७ वह्निभेऽदितिभे चैव नक्षत्रे भगदैवते।
इन्द्राग्निभे वैश्वभे च उत्तराषाढ एव च॥
११८८ पूर्वभाद्रे तथा राजन् नक्षत्राणि महान्ति च।
त्रिपदेष्वेषु यन्मृत्युर्ग्रामेऽरिष्टं भवेत् तदा॥

११८९ धनिष्ठापञ्चके चापि विप्रो यदि विपद्यते।
तदा कर्तृविनाशः स्याद् गृहे वाऽरिष्टमश्नुते॥
११९० वारे त्रिपदिनक्षत्रे मृतिश्चेद् बाटिकाभयम्।
तिथौ वारे त्रिपदभे मृतौ गृहपतेर्भयम्॥

११९१ ऊर्ध्वोच्छिष्टमधोच्छिष्टमन्तरा मरणं तथा।
कर्णमन्त्रेण राहित्यमस्नानमरणं तथा॥
११९२ तथा पर्युषितं चैव षाणिमित्तमितीरितम्।
एतैर्निमित्तैर्मरणे नरकं सम्प्रपद्यते॥
११९३ पापेभ्यः पूर्वमुक्तेभ्यो यदन्यत् खलु विद्यते।
तत् प्रकीर्णकमित्याहुर्दुर्मृतेश्च विशोधनम्॥
११९४ अपस्मारिशुना दष्टो विप्रः स्यात् प्रलपन् सदा।
जम्बूकेनाऽथवा दष्टः प्रलपन् पूर्ववन् मृतः॥
११९५ विद्युदग्निपयःपाशचाण्डालैर्ब्राह्मणो हतः।
एकद्वित्रिचतुःपञ्चषडब्दं कृच्छ्रमाचरेत्॥
११९६ मासत्रये तु षण्मासे वत्सरे वा विचक्षणः।
पुत्रादिर्दुर्मृतस्याऽस्य कुर्यात् संस्कारमादरात्॥
११९७ विद्युता वह्निना तोयैः पाशैर्वाऽथ जनङ्गमैः।
विप्रः प्राणान् त्यजेद् यस्तु तस्य शुद्धिरुदीरिता॥
सद्यो दहनपक्षे तु कुर्यात् पूर्वोक्तमादरात्॥
११९८ बाहुजस्तूरुजो वापि निमित्तैर्यदि वा हतः।
प्रायश्चित्तं मुनिप्रोक्तं विप्रस्याऽर्धं समाचरेत्॥
११९९ वैश्यस्य क्षत्रियस्याऽर्धं पादजे पादमाचरेत्।
तत्-तत्स्त्रीणां तत्-तदर्धं प्रायश्चित्तं विशोधनम्॥

१२०० कण्ठपाशं दुर्मृतस्य यो विप्रश्छेत्तुमिच्छति।
तस्य तस्याऽपवा(ह)र्ता च तप्तकृच्छ्रं चरेत् तदा॥
अन्यथा दोषमाप्नोति तत्र नार्थफलं लभेत्॥

१२०१ जननी जन्मभूमिश्च जम्बूद्वीपो जनार्दनः।
जाह्नवीतीरमित्येते जकाराः पञ्च दुर्लभाः॥
१२०२ मरणं जाह्नवीतीरे नृणां मुक्तिप्रदायकम्।
विकृतावपि सन्ध्याता मुक्तिदः स्यात् जनार्दनः॥
१२०३ जननी जन्मदेशश्च मरणे मुक्तिदाः सदा।
तस्मात् स्वजन्मदेशश्च पापनाशकरो नृणाम्॥
१२०४ देशान्तरे मृतिर्यस्य तस्य जन्म निरर्थकम्।
मृतो नरकमायाति जन्मभूम्यतिलङ्घनात्॥
१२०५ तस्य दोषनिवृत्त्यर्थं प्राजापत्यं समाचरेत्।
कृत्वा दहनकाले तु दग्ध्वा पश्चाद् यथाक्रमम्॥
न तेन दोषमाप्नोति अन्यथा नरकं व्रजेत्॥
१२०६ देशान्तरमृतौ पुंसः शरीरास्थ्नोरभावतः।
अग्नौ स्थिते गृहे तस्य पालाशाविधिरुच्यते॥
१२०७ त्रयाणामप्यभावेऽपि देशान्तरमृतेरपाम्।
क्रियां कृत्वा विशुद्धः स्याद् अन्यथा नारको भवेत्॥
१२०८ देशान्तरं मृतं राजन् यज्वानं लौकिकाग्निना।
दहेत् तत्तु वृथा भूयाद् अग्निभिश्च त्रिभिर्विना॥

१२०९ सूतकद्वितये राजन् यो विप्रो मृतिमन्वगात्।
तस्यैव निष्कृतिर्नास्ति षडब्दात् कृच्छ्रसङ्ग्रहात्॥

१२१० रजस्वला यदा नारी मृतिं प्रायाद् यथा सती।
नरकं याति सा नारी रक्तकुण्डे निमज्जति॥
१२११ यदा पुष्पवती नारी दैवाद्यदि विपद्यते।
तस्या वै निष्कृतिर्नाऽस्ति रेतःकुण्डाद् भयङ्करात्॥
१२१२ यदा सा गर्भिणी नारी दैवाद्यदि विपद्यते।
ऊर्ध्वं षण्मासतस्तस्याः गर्भं छिन्द्यात् शिशुं हरेत्॥
१२१३ मातुः पादप्रदेशे वा शिरोभागे तदा खनेत्।
यदि जीवेत् तदा बालः गृहीत्वा पोषयेच्छनैः॥
१२१४ यदा मृतस्तदाऽऽदाय पूर्ववन् निक्षिपेद् भुवि।
गर्भं सूच्याऽथ सन्धाय जुहुयादाहुतित्रयम्॥
१२१५ प्राजापत्यद्वयं कृत्वा दहेत् तां शास्त्रमार्गतः।
भर्तुर्गर्भस्य शुद्ध्यर्थं तप्तकृच्छ्रमुदीरितम्॥
१२१६ सूत्वा पुत्रं यदा नारी दशाहाभ्यन्तरे मृता।
न तस्या पुनरावृत्ती रक्तकुण्डान् महाभयात्॥

[दैहिकम्]

१२१७ ब्रह्मचारी न कुर्वीत शववाहादिकाः क्रियाः।
यदि कुर्याच्चरेत् कृच्छ्रं पुनःसंस्कारमेव च॥
१२१८ आचार्यं स्वमुपाध्यायं पितरं मातरं गुरुम्।
निर्हृत्य तु ब्रह्मचारी न व्रतेन वियुज्यते॥
१२१९ विहितं तु सपिण्डानां प्रेतनिर्हरणादिकम्।
तेषां करोति यः कश्चित् तस्याघविध्वंसं न विद्यते॥
१२२० विप्रः सर्वत्र मूल्यं वै गृहीत्वा कुणपं वहेत्।
दग्ध्वा वापि महद् घोरं नरकं याति सर्वदा॥

१२२१ अग्निं चेद् दहनं कुर्यादूर्ध्वमस्तमयाद् रवेः।
स्नात्वा गृहं विशेद्विप्रो रात्रौ चेदुदयाद् रवेः॥
१२२२ श्लेष्मशृङ्खाणिका(शिङ्खाणिका)ऽश्रूणि रुदतां सम्पतन्ति हि।
कुणपोऽशुद्धिमाप्नोति उच्छिष्टः कर्मकार्यसौ॥
१२२३ शूद्रमार्जारिकाकाद्यैः स्पृष्टश्चेद् रजकादिभिः।
रजस्वलाभिः स्त्रीभिश्च श्वभिः पतितकुण्डजैः॥
न शवस्य परो लोकस्तत्कर्ता पापभाग् भवेत्॥
१२२४ ग्रामश्मशानयोर्मध्ये यदाऽऽसन्द्यवभञ्जनम्।
ग्रामारिष्टं कर्तृहानिर्भवत्येव हि सर्वदा॥
१२२५ आसन्द्याः शकटाद् वापि कुणपो भुवि यत् पतेत्।
तदाऽरिष्टं गृहे भूयात् व्याधितस्कर राजभिः॥
१२२६ श्मशानगृहयोर्मध्ये यदि वह्निः पतेद् भुवि।
तत्प्रेतस्य गतिर्नास्ति कर्तुरायुर्विनश्यति॥

१२२७ यो विप्रो मातरं तातं भ्रातरं भगिनीं तथा।
स्नुषां दुहितरं साध्वीं पुत्रीं वा पुत्रमेव वा॥
१२२८ प्रजावतीमात्मनश्च दाहयोग्यान् स्वबान्धवान्।
लोभाद् वा नास्तिकाद् वापि वाक्याद् वाऽधर्मचारिणः॥
१२२९ अदग्ध्वैतान् कर्म कुर्यात् मृतो नरकमेति सः।
तेऽपि वै प्रेतभूताः स्युर्न मुक्ताः सूर्यमालयात्॥
१२३० बालिकां बालकं वापि दाहार्हं प्रोथयेद् भुवि।
बालश्च याति नरकं तत्कर्ता बालघातकः॥
१२३१ बालिकां बालकं वापि दाहयोग्यं खनेद् भुवि।
यो विप्रः खनने योग्यं द्विवर्षात् किञ्चिदूनकम्॥
कर्ताऽसौ नरकं याति बालो याति पिशाचताम्॥

१२३२ मृतं पतिमनुव्रज्य पत्नी चेज्ज्वलनं गता।
न तत्र पक्षिणी कार्या पैतृकादेव शुध्यति॥

१२३३ पुत्रोऽन्यो वाऽग्निदस्तस्यास्तावदेवाशुचिस्तयोः।
नवश्राद्धं सपिण्डं च युगपच्च समाप्नुयात्॥

१२३४ भर्तुः पित्रादिभिः कुर्यात् भर्त्रा पत्न्यास्तु नैव हि।
सापत्न्या(त्या) वाऽनपत्न्या(त्या) वा न भेद इति गोभिलः॥

१२३५ संस्कार्यश्च पिता पुत्रैर्भ्रातरश्च कनीयसा।
मातुलस्याप्यपुत्रस्य स्वस्रीया अपि वा मताः॥

१२३६ न पुत्रस्य पिता कुर्यात् नानुजस्य तथाग्रजः।
यदि स्नेहेन कुर्यातां सपिण्डीकरणं विना॥

१२३७ प्रेताग्निश्च विवाहाग्निर्व्रताग्निर्जातकर्मणि।
नष्टो हृतश्चोपहतः शान्तश्चेत्तत्र दोषभाक्॥

१२३८ मृतां द्वितीयां यो भार्यां दहेद् वैतानिकाग्निभिः।
जीवन्त्यां प्रथमायां तु सुरापानसमं हि तत्॥

१२३९ अत्र भारद्वाजसूत्रम्॥

१२४० यद्याहिताग्निराधानं गच्छेत्, सहाग्निहोत्रेणाऽनुव्रजेत्, यावतो ग्राममर्यादा नद्यश्च तावतीर्नातिहरेयुः॥

१२४१ यद्यतिहरेयुः लौकिकाः सम्पद्येरन्॥

१२४२ यदि पत्नी सीमान्तरेऽभिनिम्रोचेदभ्युदियाद् वा पुनराधेयम्॥

१२४३ न तस्य प्रायश्चित्तिः॥

१२४४ यद्ग्रामन्यरण्ययोर्वा समारूढेष्वग्निषु यजमानो म्रियेत॥

१२४५ पूर्ववदग्न्यायतनानि कल्पयित्वा यजमानायतने प्रेतं निधाय गार्हपत्यायतने अरण्यौ सन्निधाय मन्थति॥

१२४६ प्रेतस्य दक्षिणपाणिमभिनिधाय तत्पुत्रो भ्राताऽन्यो वा प्रत्यासन्नबन्धुः

"उपावरोह जातवेद इमं मर्तं स्वर्गलोकाय प्रजानन्नायुः प्रजाँ रयिमस्मासु धेहि, प्रेताहुतिं चास्य जुषस्व स्वाहे" त्यरण्योर्वोपारोह्य मन्थेत्॥

१२४७ यद्यरण्योः समारूढः स्यादग्निर्वर्तमानं प्रेतमन्वारम्भयित्वा इमं मन्त्रं जपेत्॥

१२४८ पूर्वं गच्छामि निश्चित्य पत्न्या सह हुताशनम्।
दहनस्थानमागत्य पश्चाद् या विनिवर्तते॥
तस्या लोकान्तरं नास्ति पतिर्गच्छति नारकम्॥

१२४९ उत्तरीय-शिखापात्रकर्तृद्रव्यविपर्यये।
कृच्छ्रत्रयं तदा कृत्वा पुनः कर्म समाचरेत्॥

१२५० श्वशृगालखरैः पिण्डः स्पृष्टो भिन्नः प्रमादतः।
कर्तुरायुष्य(ष)नाशः स्यात् प्रेतत्वं नापसर्पति॥

[अस्थिसञ्चयनम्।]

१२५१ अस्थिसञ्चयनात् पूर्वमस्थीन्युपहतानि चेत्।
खरैः शृगालैः शुनकैः कङ्कगृध्रादिभिः क्वचित्॥
प्रेतोऽत्र नरकं याति कर्तुरायुर्विशङ्कितम्॥

१२५२ विप्रस्य कीकसानीह कर्ताऽम्भसि न निक्षिपेत्।
प्रेतो वैतरणीं याति तत्पुत्रोऽशुभमाप्नुयात्॥

[श्राद्धानि।]

१२५३ तृतीये पञ्चमे चापि सप्तमे नवमे तथा।
अहन्येकादशे चैव नवश्राद्धानि पञ्च वै॥

१२५४ एकोद्दिष्टे तु सम्प्राप्ते यदि विघ्नः प्रजायते।
मासेऽन्यस्मिन् तिथौ तस्मिन् श्राद्धं कुर्यात् प्रयत्नतः॥
१२५५ एकोद्दिष्टेषु शेषं तु ब्राह्मणेभ्यः समुत्सृजेत्।
ततः कामं तु भुञ्जीत स्वयं मङ्गलभोजनम्॥
१२५६ नवश्राद्धे नवश्राद्धे गृहीत्वाऽऽमं द्विजोत्तमः।
न तस्य पुनरावृत्तिर्यमलोकात् कदाचन॥
जायते भुवि दुष्टात्मा स्थावरत्वमवाप्नुयात्॥
१२५७ एकादशादिभिः श्राद्धैर्मृतस्याप्यायनं भवेत्।
सम्यक् संवत्सरे पूर्णे पितृणां स्थानमृच्छति॥
१२५८ मृताहैकादशे विप्रो भुक्त्वा कवलस इच्छया।
तावद् युगसहस्राणि रौरवं नरकं व्रजेत्॥
१२५९ तदन्ते भुवमासाद्य रक्तपास्तु भवेज्जले।
यावन्त्यन्नपुलकानि कवले कवले नृप॥
तावन्तः कृमयः सर्वे भक्षितास्तेन पार्थिव॥

१२६० आशौचद्वितये राजन् असगोत्रोऽथवा व्रती।
विधवा वाऽन्यगोत्रा वा यतिर्वा नियमस्थितः॥
सूतकद्वितये भुञ्जन् महान्तं नरकं व्रजेत्॥
१२६१ सूतकद्वितये राजन् जाते तस्य द्विजो यदि।
अज्ञानाद् भोजनं कुर्यात् सद्यः संस्कारमर्हति॥
१२६२ ज्ञात्वा तदन्नं सञ्छर्द्य पञ्चगव्यं पिबेत् ततः।
छर्द्यभावे तदा स्नात्वा पुनः कर्माऽपरेऽहनि॥
१२६३ उपोष्य रजनीमेकां पञ्चगव्येन शुध्यति।
अन्यथा नरकं घोरं यात्यत्रैव न संशयः॥

१२६४ क्रियां च कुरुते यस्तु तद्दिने तस्य मुण्डनम्।
ज्यायसां दशाहे तु पुत्राणां वपनं भवेत्॥
१२६५ दशमेऽहनि सम्प्राप्ते स्नानं ग्रामाद् बहिर्भवेत्।
तत्र त्याज्यानि वासांसि केशश्मश्रुनखानि च॥
१२६६ अघाहःसु निवृत्तेषु सुस्नाताः कृतमङ्गलाः।
आशौचाद् विप्रमुच्यन्ते ब्राह्मणान् स्वस्ति वाच्य च॥
१२६७ आद्यश्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनि।
कर्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः॥
१२६८ पुनर्दहनमारभ्य श्राद्धान्तं पैतृमेधिकम्।
कृत्वाऽन्ते प्रेतरूपस्य सपिण्डीकरणं चरेत्॥
१२६९ द्वादशाद् वत्सरादर्वाक् पौगण्डमरणे सति।
सपिण्डीकरणं न स्यादेकोद्दिष्टानि कारयेत्॥
१२७० सपिण्डीकरणात् प्रेते पैतृके पदम(मा)स्थिते।
आहिताग्नेः सिनीवाल्यां पितृयज्ञः प्रवर्तते॥
१२७१ एकाग्रमरणे पित्रोरन्यस्यान्यदिने मृतौ।
सपिण्डनं त्रिपक्षे स्यादनुयानमृतिं विना॥

१२७२ जीवद्भर्त्री तु या नारी म्रियते पुत्रिणी यदि।
सवत्सामङ्कितां धेनुमाचार्याय प्रदापयेत्॥
१२७३ पतिपुत्रवती नारी म्रियते चाग्रतस्तयोः।
वृषं नैवोत्सृजेत् पुत्रः पिता यावत्तु जीवति॥

१२७४ अमायां पैतृकश्राद्धे मासिश्राद्धे महालये।
श्राद्धे च षण्णवत्याख्ये सपिण्डीकरणे तथा॥
मासिकेषु तथा विप्रो न कुर्याच्छेषभोजनम्॥

१२७५ जन्महानौ वितानस्य कर्मत्यागो न विद्यते।
शालाग्नौ केवलो होमः कार्य स्त्वान्यगोत्रजैः॥
१२७६ पञ्चयज्ञविधानं तु न कुर्यान्मृतिजन्मनोः॥
१२७७ दानं प्रतिग्रहो होमः स्वाध्यायश्च निवर्तितः॥

१२७८ पित्रोरुपरमे पुत्राः क्रियाः कुर्युर्द्वयोरपि।
अनुवृत्तौ च नान्येषां सङ्घातमरणेऽपि च॥
१२७९ महागुरुनिपाते तु प्रेतकार्यं यथाविधि।
कुर्यात् संवत्सरादर्वाक् नैकोद्दिष्टं न पार्वणम्॥
१२८० परेद्युरनुयाने तु मरणाहः क्रमेण तु।
दहनादिसपिण्ड्यन्तं श्राद्धं कुर्याद् यथाविधि॥
१२८१ तद्दिने वाऽपरेद्युर्वा भर्तारमनुगच्छति।
नवश्राद्धं षोडशांच सपिण्डीकरणं तथा॥
यथाकाले तु कर्तव्यं प्रतिसंवत्सरं तथा॥
१२८२ पूर्वं देशान्तरं गत्वा भ्रमेद् भूमण्डलं पुनः।
द्वादशाब्दे गते तस्मिन् त्वक्त्वा स्वगृहमञ्जसा॥
१२८३ कृतक्रियश्चेत् पुत्रादिः कथं शास्त्रप्रवर्तनम्।
शृणुध्वं मुनयः सर्वे तस्य निष्कृतिमुत्तमाम्॥
१२८४ मृत्वा पूर्वं द्विजो दैवात् कृतप्रेतक्रियस्तदा।
ततः परं मृतिं त्यक्त्वा पुनरुज्जीवितो यदा॥
तदाऽस्पृश्यो भवेत् सर्वैर्ब्रह्मधर्मपरायणैः॥

[नारायणबलिः]

१२८५ विषाग्निजलपाषाणैर्दुर्मृतस्य प्रमादतः।
कर्मादौ देहशुद्ध्यर्थं नारायणबलिं चरेत्॥

१२८६ कर्मादौ पूर्वदिवसे मृतस्येह द्विजन्मनः।
प्रायश्चित्तं तदा कृत्वा धर्मशास्त्रोक्तमानतः॥
१२८७ आहूय विप्रानेकान्ते चतुर्विंशतिमादरात्।
तदर्धं वा तदर्धं वा सम्पाद्य श्रुतिपारगान्॥
१२८८ अभ्यर्च्य गन्धवस्त्राद्यैरामं वा स्वर्णमेव वा।
करिष्येऽहं मृतस्यास्य बलिं नारायणात्मकम्॥
१२८९ इत्युक्त्वा तान् नमस्कृत्य उपवेश्य सुखासने।
लौकिकाग्निं प्रतिष्ठाप्य परिस्तीर्य विधानतः॥
१२९० स्रुवेणाज्यं समादाय व्याहृतीरुच्चरंस्ततः।
पृथक् पृथक् तथा हुत्वा सङ्ख्यामेकां समुद्वहन्॥
१२९१ व्याहृतीनां त्रयं हुत्वा पृथगग्नौ विधानतः।
सङ्ख्यामेकां तथा कृत्वा अष्टोत्तरशतं क्रमात्॥
हुत्वैवं विधिवद् विप्रो होमशेषं समापयेत्॥
१२९२ ब्राह्मणान् समलङ्कृत्य पूर्वोक्तेन विधानतः।
चतुर्विंशतिनामानि केशवादीनि वै जपेत्॥
१२९३ तण्डुलाश्चैव मुद्गाश्च माषाः शाकघृतं दधि।
ताम्बूलं दक्षिणां चैव विप्रेभ्यः परिकल्पयेत्॥
१२९४ नाऽन्नेन तोषयेद् विप्रान् अधिकारो न दृश्यते।
यावत् सपिण्डकं न स्याद् दुर्मृतस्य द्विजन्मनः॥
१२९५ न तावदन्नं कर्तव्यं विप्रैरध्यात्मवेदिभिः।
तावद् विप्रैर्न भोक्तव्यं यदि भुङ्क्ते स पातकी॥
१२९६ जातकर्माणि विप्रस्य दुर्मृतस्य द्विजन्मनः।
नारायणबलौ चैव नाऽन्नश्राद्धं समाचरेत्॥
१२९७ हिरण्येनैव धान्यैर्वा कुर्यात् श्राद्धं विधानतः।
अन्नेन कारयेद्यस्तु स चाण्डालसमो भवेत्॥

१२९८ ये मृताः पापमार्गेण तेषां संवत्सरात् परम्।
नारायणबलिं कृत्वा कुर्यात् तत्रौर्ध्वदेहिकम्॥
१२९९ अब्दान्ते वाऽथ षण्मासे पुनःकृत्वा तु संस्कृतिम्।
त्रिरात्रमशुचिर्भूत्वा श्राद्धं कुर्यात् चतुर्दिने॥

१३०० द्रव्येणान्यायलब्धेन यः करोत्यौर्ध्वदेहिकम्।
न स तत्फलमाप्नोति तस्यार्थस्य दुरागमात्॥

१३०१ प्रमीतौ पितरौ यस्य देहस्तस्याशुचिर्भवेत्।
न दैवं नापि वा पित्र्यं यावत् पूर्णो न वत्सरः॥
१३०२ अन्यश्राद्धं परान्नं च गन्धं माल्यं च मैथुनम्।
वर्जयेद् गुरुपाते तु यावत् पूर्णो न वत्सरः॥
१३०३ महागुरुनिपाते तु काम्यं किञ्चिन्न चाचरेत्।
आर्त्विज्यं ब्रह्मचर्यं च श्राद्धं देवक्रियां तथा॥
१३०४ स्नानं चैव महादानं स्वाध्यायश्चाग्निपूजनम्।
प्रथमेऽब्दे न कर्तव्यं महागुरुनिपातने॥

१३०५ मृताहं समतिक्रम्य चण्डालः कोटिजन्मसु।
अतो विप्रैर्न तत् त्याज्यं प्राणैः कण्ठगतैरपि॥
१३०६ पितृकर्माणि सर्वाणि प्रेतकर्माणि यानि च।
रात्रावपि च कर्तव्यान्यत्र भुक्त्यादि नाचरेत्॥

# ॥ द्वादशं प्रकरणम् ॥

## ॥ श्राद्धम् ॥

[श्राद्धप्रशंसा]

१३०७ जीवतो वाक्यकरणात् प्रत्यब्दं भूरिभोजनात्।
गयायां पिण्डदानाच्च त्रिभिः पुत्रस्य पुत्रता॥
१३०८ पिता पितामहश्चैव तथैव प्रपितामहः।
उपासते सुतं जातं शकुन्ता इव पिप्पलम्॥
१३०९ मधुमांसैश्च शाकैश्च पयसा पायसेन च।
एष नो दास्यति श्राद्धं वर्षासु च मघासु च॥
१३१० अरोगः प्रकृतिस्थश्च चिरायुः पुत्रपौत्रवान्।
अर्थवानर्थभोगी च श्राद्धकामो भवेदिह॥
१३११ परत्र परमां तुष्टिं लोकांश्च विविधान् शुभान्।
श्राद्धकृत् समवाप्नोति यशश्च विपुलं नरः॥
१३१२ सर्वतः पितरः पूज्या देवतानां च देवताः।
शुचयो निर्मलाः पुण्या दक्षिणां दिशमाश्रिताः॥
१३१३ वसवः पितरो ज्ञेया रुद्रा ज्ञेयाः पितामहाः।
प्रपितामहास्तथाऽऽदित्याः श्रुतिरेषा सनातनी॥
१३१४ प्रेतानुद्दिश्य यत् कर्म क्रियते मानुषैरिह।
तुष्यन्ति पितरस्तेन न प्रेताः पितरः स्मृताः॥

१३१५ नामगोत्रं पितॄणां तु प्रापकं हव्यकव्ययोः।
अग्निष्वात्तादयस्तेषामाधिपत्ये व्यवस्थिताः॥
१३१६ नाममन्त्रास्तदादेशा भवान्तरगतानपि।
प्राणिनः प्रीणयन्त्येव तदाहारत्वमागतान्॥
१३१७ देवो यदि पिता जातः शुभकर्मानुयोगतः।
तस्यान्नममृतं भूत्वा देवत्वेऽप्यनुगच्छति॥
१३१८ गान्धर्वे भोगरूपेण पशुत्वे च तृणं भवेत्।
श्राद्धान्नं वायुरूपेण नागत्वेऽप्युपतिष्ठति॥
१३१९ पानं भवति यक्षत्वे राक्षसत्वे तथामिषम्।
दनुजत्वे तथा मद्यं प्रेतत्वे रुधिरोदकम्॥
मनुष्यत्वेऽन्नपानादि नाना(ना) भोगकरं भवेत्॥

१३२० विभक्ता अविभक्ता वा कुर्युः श्राद्धं पृथक् सुताः।
मघासु च ततोऽन्यत्र नाधिकारः पृथक् पृथक्॥

[श्राद्धकालाः]

१३२१ अयुग्मास्तिथयः सर्वा युग्माभ्यः प्रतिपूजिताः।
कालतः पूजितौ मासौ माघप्रौष्ठपदावुभौ॥
१३२२ पक्षयोः शुक्लपक्षाद्धि बहुलः श्राद्धपूजितः।
उक्तेयं तिथिपरीक्षेयं नक्षत्रेषु प्रवक्ष्यते॥
१३२३ उत्तराः श्रवणास्तिष्यो मृगशीर्षं प्रजापतिः।
हस्तः शतभिषक् स्वाती चित्रा पित्र्यमथाश्विनी॥
१३२४ नक्षत्राणि प्रशस्तानि सदैतानि तु पैतृके।
अपराणि च नक्षत्राण्युच्यन्ते कारणैः क्वचित्॥

१३२५ यस्मिन् गुणोदितं विप्रं पात्रभूतमवाप्नुयात्।
श्राद्धस्य पूजितः कालो भवेत् स एव वा पुनः॥
१३२६ तृतीया रोहिणीयुक्ता वैशाखस्य सिता तु या।
मघाभिः सहिता कृष्णा नभस्ये तु त्रयोदशी॥
१३२७ नवमी कार्तिकस्यापि शततारकसंयुता।
तथा तेनैव ऋक्षेण माघे पञ्चदशी युता॥
युगादयः स्मृता ह्येता दत्तस्याक्षयकारकाः॥
१३२८ इन्दुक्षयो गजच्छाया वैधृतिश्च युगादयः।
एते कालाः समुद्दिष्टाः पितॄणां प्रीतिवर्धनाः॥
१३२९ अर्के नभस्ये कन्यास्थे श्राद्धपक्षः प्रकीर्तिताः।
सिनीवालीमतिक्रम्य यदा कन्यां व्रजेद् रविः॥
तदा कालस्य वृद्धत्वात् अतीतैव पितृक्रिया॥
१३३० अहःषोडशकं यत्तु शुक्लप्रतिप्रदा सह।
चन्द्रक्षयाविशेषेण सापि दर्शात्मिका स्मृता॥
१३३१ पार्वणेन विधानेन नवसस्यागमे स्मृतम्।
विश्वेदेवास्तु तच्छ्राद्धे कालकामौ प्रकीर्तितौ॥

[श्राद्धदेशाः]

१३३२ श्राद्धस्य पूजितो देशो गया गङ्गा सरस्वती।
कुरुक्षेत्रं प्रयागश्च नैमिषं पुष्कराणि च॥
१३३३ नदीतटेषु तीर्थेषु शैलेषु पुलिनेषु च।
विविक्तेषु च तुष्यन्ति दत्तेनेह पितामहाः॥

## [अपाङ्क्तेयाः।]

१३३४ ब्राह्मणेष्वप्यपाङ्क्तेयान् हव्यकव्येषु वर्जयेत्।
परीक्ष्य बहुधा विप्रानाहरेत् पङ्क्तिपावनान्॥

१३३५ गोभर्तृविश्वस्तस्त्रीबालप्रव्रजितबन्धुमित्रघातकाः मातृपितृपुत्रदाराग्निहोत्र-त्यागिनो यज्ञोपहन्ता वृषलीपतिः सोमविक्रयी ब्रात्यो निष्क्रियश्चेति पतिताः॥

१३३६ जारोपपतिकुण्डाशिकुण्डगोलकभर्तृदिधिषूपतिमूल्(गुरो)र्भृतकाध्यापका-याज्ययाजकब्रह्मधर्मदुष्टद्रव्यविक्रयिकदर्यवर्णसम्भेदकानार्यभ्रष्टशौचा-धन्यदेवलकवार्धुषिकगोत्रभित्परिवित्तिपरिवेत्तृकृष्णपृष्ठकाण्डपृष्ठाधिकृत-निराकृत्यवकीर्णिम्लेच्छावरेटकरणाग्न्यागारदाहिनः षड्विधाः क्लीबाश्चेत्युपपातकिनः॥

१३३७ अनपत्यकूटसाक्षिपुंस्त्वोपघातिस्त्रीजितसेतुभेदकतालावचरण(?)रङ्गोपजी-विविधर्मपाठकजिह्मयाचकप्रायश्चित्तनिमित्तधूर्तसाहसिकमृगयुकितव-नास्तिकपिशुनशठवणिग्बन्दिपौनर्भवाभिशस्तशुल्किसमुद्रयायिकृत्या-भिचारशीलतैलिकश्वयुग्वैद्यभृतककन्यादूषककृतघ्नक्रूरकुहकमित्र-ध्रुग्दत्तापव्ययिसमयभेदकवाग्दण्डपरुषकारुकशिल्पकहस्त्यारोहाश्व-बन्धकाश्चेति वर्ज्याः पातनीयकाः॥

१३३८ अष्टाभिः पापरोगैरभिभूता विकलेन्द्रिया हीनाङ्गाधिकाङ्गाश्चेति पङ्क्तिदूषकाः॥

१३३९ उन्मादस्त्वग्दोषो राजयक्ष्मा श्वासो मधुप्रमेहो भगन्दरो महोदरमश्मरी-त्यष्टौ पापरोगाः॥

१३४० जडान्धकाणबधिरकुणि इति विकलेन्द्रियाः॥

१३४१ उभयभेदसङ्क्लेदा दुष्टव्रणाः पापिष्ठतमाश्चेति॥

१३४२ एते पञ्चविधाः प्रोक्ता वर्जनीया नराधमाः।
स्वसंज्ञालक्षणास्ते स्युर्विशेषश्चात्र वक्ष्यते॥
१३४३ एते दुर्ब्राह्मणाः सर्वे क्रमशः समुदाहृताः।
कर्मणा योनितश्चैव देहदोषैश्च कुत्सिताः॥
१३४४ एतेषां कर्मदोषेण पतिता ये नराधमाः।
यान्ति ते निरयान् घोरान् सक्ताः सद्भिरिहैव च॥
१३४५ योनिदोषेण ये दुष्टा ये च दोषैः शरीरजैः।
इहैव वर्जनं तेषां भवेदनपराधिनाम्॥
१३४६ कृतघ्नः पिशुनः क्रूरो नास्तिकः कुहकः शठः।
मित्रध्रुक् चेति सर्वेषां विशेषान्निरयालयाः॥
१३४७ सर्वे पुनरभोज्याः स्युरदानार्हाश्च कर्मसु।
ब्रह्मभावान्निरस्ताश्च पापदोषवशानुगाः॥

१३४८ वन्ध्या तु वृषली ज्ञेया वृषली च मृतप्रजा।
अपरा वृषली ज्ञेया कुमारी या रजस्वला॥
१३४९ यस्त्वेनामुद्वहेत् कन्यां ब्राह्मणो ज्ञानदुर्बलः।
अश्राद्धेयमपाङ्क्तेयं तं विद्यात् वृषलीपतिम्॥
१३५० अज्ञो वेदपरित्यागी व्रात्यो गायत्रीजपनाशकः(गायत्रीनाशकः)॥
१३५१ परदाराभिगो मोहात् पुरुषो जार उच्यते।
स एवोपपतिर्ज्ञेयो यः सदा संवसेद् गृहे॥
१३५२ चतुःषष्टिफलैः प्रस्थः कुण्डं प्रस्थचतुष्टयम्।
तावदाहारको विप्रः कुण्डाशीत्युच्यते बुधैः॥
१३५३ जीवतो जारजः कुण्डो मृते भर्तरि गोलकः।
यस्तयोरन्नमश्नाति स कुण्डाशीति कथ्यते॥
१३५४ अजारजौ च न कुण्डगोलकौ॥

१३५५ ज्येष्ठस्य भार्यां सम्प्राप्तः सकामाद् दिधिषूपतिः।
द्विजोऽग्रेदिधिषूश्चैव यस्य सैव कुटुम्बिनी॥
१३५६ ज्येष्ठायां यद्यनूढायां कन्यायामुह्यतेऽनुजा।
सा चाग्रेदिधिषूर्ज्ञेया पूर्वा तु दिधिषूर्मता॥
१३५७ यश्च दुष्टतपश्चर्यः स गूढो नाम संज्ञया॥
१३५८ भृतकाध्यापको यश्च भृतकाध्यापितश्च यः।
तावुभौ पतितौ विप्रौ स्वाध्यायक्रयविक्रयात्॥
१३५९ यः शूद्रान् पतितांश्चापि याजयेदर्थकारणात्।
याजितो वा पुनस्ताभ्यां ब्राह्मणोऽयाज्ययाजकः॥
१३६० दत्तानुयोगान् द्रव्यार्थं पतितान् मनुरब्रवीत्।
ब्रह्मविक्रयिणो ह्येते वर्जिताः सवनादिषु॥
१३६१ इष्टं पूर्तमधीतं वा तप्तं वाप्यात्मना तपः।
प्रयच्छत्यपरेभ्यश्च धनार्थं धर्मविक्रयी॥
१३६२ गोरसानां च विक्रेता गोविक्रेता च यो द्विजः।
गुडलवणतिलानां विक्रेता दुष्टविक्रयी॥
१३६३ आत्मानं धर्मकृत्यं च पुत्रदारांश्च पीडयन्।
लोभाद्यः प्राचिनोत्यर्थान् स कदर्य इति स्मृतः॥
१३६४ निकृष्टोत्कृष्टमध्येषु यो वर्णेष्वनवग्रहः।
आचरत्यपराचारं वर्णसम्भेदकस्तु सः॥
१३६५ अनाहिताग्निः शतगुरनीजानः सहस्रगुः।
शूद्राजीवोपजीवी च नार्हन्त्यर्घान् द्विजातयः॥
१३६६ कूपमात्रोदके ग्रामे विप्रः संवत्सरं वसन्।
शौचाचारपरिभ्रंशाद् ब्राह्मण्याद् विप्रमुच्यते॥
१३६७ अनुपासितसन्ध्या ये नित्यमस्नातभोजनाः।
भ्रष्टशौचाः पतन्त्येते शूद्रतुल्याश्च धर्मतः॥

१३६८ एकाकी व्यसनाक्रान्तोऽधन्य इत्युच्यते बुधैः॥
१३६९ देवार्चनपरो नित्यं वित्तार्थी वत्सरत्रयम्।
असौ देवलको नाम हव्यकव्येषु गर्हितः॥
१३७० देवकोशोपजीवी च नाम्ना देवलको भवेत्।
अपाङ्क्तेयः स विज्ञेयः सर्वकर्मसु सर्वदा॥
१३७१ विप्रं वार्धुषिकं विद्यादन्नवृद्ध्युपजीविनम्।
यः सगोत्रां समारूढो ब्राह्मणो गोत्रभिद् भवेत्॥
१३७२ ज्येष्ठे चाप्यनिविष्टे च ज्येष्ठमुत्क्रम्य यः पुनः।
विन्देत परिवित्तिश्च परिवेत्ता च तावुभौ॥
१३७३ वै(वे)श्यापतिः कृष्णपृष्ठः काण्डपृष्ठो नरो भवेत्।
राजप्रेष्यकरो नित्यं ब्राह्मणोऽवि(धि)कृतः स्मृतः॥
१३७४ अधीतविस्मृते वेदे भवेद् विप्रो निराकृतिः।
गूढलिङ्गोऽवकीर्णी स्याद् यश्च भग्नव्रतस्तथा॥
१३७५ धर्माधर्मविभागज्ञो निविष्टो वेदशासने।
कृपालज्ज्ञासमाधीमानार्यो म्लेच्छो विपर्यये॥
१३७६ द्वितीयस्य पितुर्योऽन्नं भुक्त्वा परिणतो द्विजः।
अवरेट इति ज्ञेयः शूद्रधर्मेण जीवनः॥
१३७७ भवेत् का(को)रणसंज्ञश्च सर्वेषु व्यवहारवान्।
क्षेत्रसस्यावनीनां च दग्धारोऽरण्यदाहिनः॥
१३७८ अगारदाही स ज्ञेयः प्रेतदग्धा धनेन यः।
स चाप्यगारदाही स्याद् द्वेषाद् यो वेश्मदाहकः॥
१३७९ षण्डको वातजः षण्डो षण्डः क्लीबो नपुंसकः।
कीलकश्चेति षट्कोऽयं षण्डभेदो विभाषितः॥
१३८० तेषां स्त्रीतुल्यवाक्चेष्टः स्त्रीधर्मा षण्डको भवेत्।
पुमान् भूत्वा स्वलिङ्गानि पश्चाच्छिन्द्यात् तथैव च॥

१३८१ स्त्री च पुम्भावमास्थाय पुरुषाचारवद्गुणा।
वातजो नाम षण्डः स्यात् स्त्रीषण्डो वाऽपि नामतः॥
१३८२ असाह्विड्गोऽपि षण्डः स्यात् षण्डस्तु म्लानमेहनः।
अमेध्याशी पुमान् क्लीबो नष्टरेता नपुंसकः॥
१३८३ स कीलक इति ज्ञेयो यः क्लैब्यादात्मनः स्त्रियम्।
अन्येन सह संयोज्य पश्चात्तामेव सेवते॥

[पङ्क्तिपावनाः]

१३८४ ज्येष्ठाश्रमानिविष्टश्च ज्ञातायुर्ज्येष्ठसामगः।
अग्निचित् सोमपाश्चेति ब्राह्मणाः पङ्क्तिपावनाः॥
१३८५ तेषां परः परः श्रेष्ठो विद्याद्यैरधिकोऽपि सन्।
चीर्णव्रता गुणैर्युक्ता भवेयुर्ये च कर्षकाः॥
१३८६ सावित्रीज्ञाः क्रियावन्तस्ते राजन् केतनक्षमाः।
क्षत्रधर्मिणमप्याजौ केतयेत् कुलजं द्विजम्॥
१३८७ न त्वेव वणिजं तात श्राद्धेषु परिकल्पयेत्॥
१३८८ पुरुषत्रयविख्यातं श्राद्धे विप्रं नियोजयेत्॥
१३८९ अथान्यांश्च प्रवक्ष्यामि ब्राह्मणान् पङ्क्तिपावनान्।
समर्थान् हव्यकव्येषु स्वगुणैरभिपूजितान्॥
१३९० वेदवेदाङ्गनिष्णाता विशुद्धान्वययोनयः।
स्वकर्मण्डुः(दि)स्थिता विप्रा स्वपङ्क्तिं पावयन्ति हि॥
१३९१ त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णः षडङ्गवित्।
छन्दोगः सोमयाजी च ब्राह्मणाः पङ्क्तिपावनाः॥
१३९२ ऋग्यजुःसामधर्मज्ञाः स्नातकाश्चाग्निहोत्रिणः।
ब्रह्मदेयानुसन्तानाः विज्ञेयाः पङ्क्तिपावनाः॥

१३९३ इष्टापूर्ते मृताहे च दर्शवृद्ध्यष्टकासु च।
पात्रेभ्यस्तेषु कालेषु देयं नैव कुभोजनम्॥

१३९४ कुष्माण्डालाबुवार्ताकुपालङ्क्यारजिकास्तथा।
पिप्पलीं मरिचं चैव रामठं पिण्डमूलकम्॥
कृतं च लवणं सर्वं वंशाग्रं च विवर्जयेत्॥

१३९५ राजमाषान् मसूरांश्च तथा वै कोरदूषकान्।
लोहितान् वृक्षनिर्यासान् श्राद्धकर्मणि वर्जयेत्॥

१३९६ अजाविमहिषीणां तु पयः श्राद्धेषु वर्जयेत्।
विकारान् पयसश्चैव माहिषं तु घृतं हितम्॥

१३९७ नियुक्तस्तु यदि श्राद्धे दैवे मांसं समुत्सृजेत्।
यावन्ति पशुरोमाणि तावन् निरयमृच्छति॥

१३९८ ये हि प्राण्यङ्गजा धूपा हस्तवाताहताश्च ये।
न ते श्राद्धे नियोक्तव्या ये च के चोग्रगन्धयः॥

१३९९ घृतं न केवलं दद्यात् दुष्टं वा तृणगुग्गुलम्॥

१४०० धानाश्च मधुसंयुक्ता इक्षूंश्चैव सगोरसान्।
शर्करा फलमूलं च सर्वं दद्यादमत्सरः॥

१४०१ विना मांसेन यच्छ्राद्धं कृतमप्यकृतं भवेत्॥

१४०२ अद्भिर्मूलफलैः शाकैर्व्रीहिमाषयवैरपि।
मासं तृप्यन्ति पितरः श्राद्धेष्विह निवेदितैः॥

१४०३ तृप्यन्ति मत्स्यैर्द्वौ मासौ त्रीन्मासान् रुरुभिर्मृगैः।
शाकुनैश्चतुरो मासान् पञ्च तृप्यन्ति पार्षतैः॥

१४०४ शशैः षाण्मासिकी तृप्तिः कूर्मैः स्यात् सप्तमासिकी।
अष्टौ मासान् वराहेण नव तृप्यन्त्यजेन च॥

१४०५ दश माहिषमांसेन तृप्यन्त्येकादशाविकैः।
संवत्सरं तु गव्येन पयसा पायसेन च॥
१४०६ वाध्रीणसस्य मांसे तु (सेन) तृप्तिर्द्वादशवार्षिकी।
आनन्त्याय भवेद् दत्तं खड्गमांसं पितृक्षये॥
१४०७ महाशकलिनो मत्स्याश्छागो वा सर्वलोहितः।
कालशाकमित्येतदानन्त्याय प्रकीर्तितम्॥

[श्राद्धकर्तृभोक्तृनियमाः]

१४०८ पूर्वं निमन्त्रितोऽन्येन कुर्यादन्यप्रतिग्रहम्।
भुक्ताहारोऽथ वा भुङ्क्ते सुकृतं तस्य नश्यति॥
१४०९ परपाकनिवृत्तस्य परपाकरतस्य च।
अपचस्य च भुक्त्वान्नं द्विजश्चान्द्रायणं चरेत्॥
१४१० गृहीत्वाऽग्निं समारोप्य पञ्चयज्ञान्न निर्वपेत्।
परपाकनिवृत्तोऽसौ मुनिभिः परिकीर्तितः॥
१४११ पञ्चयज्ञान् स्वयं कृत्वा परान्नमुपजीवति।
सततं प्रातरुत्थाय परपाकरतस्तथा॥
१४१२ गृहस्थधर्मवृत्तो यो ददाति परिवर्जितः।
ऋषिभिर्धर्मतत्त्वज्ञैरपचः परिकीर्तितः॥
१४१३ ब्राह्मणश्च यथा शुद्धः प्रसन्नेन्द्रियमानसः।
पैतृकान्नमुपाश्नीयादसम्भ्रान्तः प्रसन्नवान्(क्)॥
१४१४ अन्नपानकरीतोदं दद्यादेवावितोकितम्।
वक्तव्ये कारणे संज्ञां कुर्वन् भुञ्जीत पाणिना॥
१४१५ तां निशां ब्रह्मचारी स्यात् श्राद्धभोक्ता तथैव च।
अन्यथा वर्तमानौ तौ स्यातां नरकगामिनौ॥

१४१६ तस्मात् प्रदाता भोक्ता च श्राद्धे नियमितो भवेत्।
अर्चकश्चार्चितश्चोभौ भवेतां नाकगामिनौ॥
१४१७ प्रहसन्नपि यो भुङ्क्ते स च नाप्यायते पितॄन्।
यो वेष्टितशिरा भुङ्क्ते यो वा भुङ्क्ते विगर्हितान्॥
१४१८ योऽप्रसन्नमना भुङ्क्ते सोपानत्कोऽपि वा पुनः।
प्रलापशीलः क्रुद्धो वा स विप्रः पितृदूषकः॥
१४१९ तस्माद् दोषान् परित्यज्य त्रीनेतानपरानपि।
ब्रह्मचारी शुचिर्भूत्वा श्राद्धं भुञ्जीत शक्तिमान्॥
त्रीनेव यन्त्रितो दाता भुक्ताहारेण योजयेत्॥
१४२० श्राद्धभुग् वृषलीतल्पं तदहर्योऽधिगच्छति।
तस्याः पुरीषे तं मासं पितरस्तस्य शेरते॥
१४२१ श्राद्धे निमन्त्रितो विप्रो वृषलीं यदि गच्छति।
दातुः पापं समग्रं तत् क्षणेन प्रतिपद्यते॥
१४२२ अक्रोधो निभृतः स्वस्थः श्रद्धावानत्वरः शुचिः।
समाहितमनाः श्राद्धक्रियायामसकृद् भवेत्॥
१४२३ नाश्रु सम्पातयेच्छ्राद्धे न जल्पेन् न हसेन् मिथः।
न विभ्रंशेन्न सङ्क्रुध्येन्नोद्विजेन्नात्र कुत्रचित्॥
१४२४ प्राप्तेऽपि कारणे श्राद्धे नैव क्रोधं समुत्सृजेत्।
आश्रितः स्विन्नगात्रो वा न तिष्ठेत् पितृसन्निधौ॥
१४२५ न चात्र श्येनकाकादीन् पक्षिणः प्रतिषेधयेत्।
तद्रूपाः पितरस्तत्र समायान्तीति वैदिकम्॥
१४२६ शस्त्रग्रहणमुद्वेगं प्राणिहिंसां तथानृतम्।
द्यूतं चौर्यं विवादं च यानारोहणमुत्सृजेत्॥
१४२७ श्राद्धभोजी समुच्छिष्टं शूद्रेभ्यो ददाति चेत्।
स मूढोऽनिष्कृतिः प्राहुः प्रायश्चित्तेन शुध्यति॥

१४२८ दर्भास्तिला गजच्छाया दौहित्रो मधुसर्पिषी।
कुतपो नीलकण्ठश्च पवित्राणीह पैतृके॥
१४२९ हीनाङ्गः पतितः कुष्ठी व्रणी पुल्कसनास्तिकौ।
कुक्कुटः शूकरश्वानौ वर्ज्याः श्राद्धेषु दूरतः॥
१४३० बीभत्समशुचिं नग्नं मत्तं धूर्तं रजस्वलाम्।
नीलकाषायवसनं छिन्नकर्णं च वर्जयेत्॥
१४३१ शस्त्रं कालायसं सीसं मलिनाम्बरवाससम्।
अन्नं पर्युषितं वापि श्राद्धेषु परिवर्जयेत्॥
१४३२ दैवे वा यदि वा पित्र्ये सुराभ्यायतनं स्पृशेत्।
रजस्वला पुंश्चली वा रक्षः सङ्गच्छते हि तत्॥
१४३३ ललाटे पुण्ड्रकं दृष्ट्वा स्कन्धे भारं तथैव च।
निराशाः पितरो यान्ति दृष्ट्वा च वृषलीपतिम्॥
१४३४ सभादंसात् परिभ्रष्टमम्बरं यस्तु धारयेत्।
एकवस्त्रं तु तं विद्याद् दैवे पित्र्ये च वर्जयेत्॥
१४३५ प्राचीनावीतिना पित्र्यं दैवं चैवोपवीतिना।
देवानां नमसा देयं पितॄणां च स्वधेति च॥

१४३६ श्वः कर्तास्मीति निश्चित्य दाता विप्रान् निमन्त्रयेत्।
निरामिषं सकृद्भुक्त्वा सर्वभुक्तजने गृहे॥
१४३७ असम्भवे परेद्युर्वा ब्राह्मणांस्तान् निमन्त्रयेत्।
अज्ञातीनसमानार्षानयुग्मानात्मशक्तितः॥
१४३८ कामं प्रतिश्रवस्तेषामनिन्द्यामन्त्रणे कृते॥
१४३९ अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः।
भवितव्यं भवद्भिश्च मया च श्राद्धकर्मणि॥

१४४० तथैव यन्त्रितो दाता प्रातः स्नात्वा सहाम्बरः।
आरभेत नवैः पात्रैरन्नारम्भं च बान्धवैः॥
१४४१ पत्नीं नियोजयेत् पाके सपिण्डं वा स्वयं च वा॥
१४४२ तिलानवकिरेत् तत्र सर्वतो बन्धयेदजान्।
असुरोपहतं सर्वं तिलैः शुध्यत्यजेन च॥
१४४३ ततोऽन्नं बहुसंस्कारं नैकव्यञ्जनभक्ष्यवत्।
चोष्यपेयसमृद्धं च यथाशक्त्युपकल्पयेत्॥
१४४४ ततोऽनिवृत्ते मध्याह्ने लुप्तलोमनखान् द्विजान्।
अभिगम्य यथामार्गं प्रयच्छेद् दन्तधावनम्॥
१४४५ तैलमभ्यञ्जनं स्नानं स्नानीयं च पृथग्विधम्।
पात्रैरौदुम्बरैर्दद्यात् वैश्वदैवत्यपूर्वकम्॥
१४४६ ततः स्नात्वा निवृत्तेभ्यः प्रत्युत्थाय कृताञ्जलिः।
पाद्यमाचमनीयं च सम्प्रयच्छेद् यथाक्रमम्॥
१४४७ श्राद्धकाले समाहूतानलङ्कुर्वीत तान् द्विजान्।
श्मश्रुकर्मशिरःस्नानधूपजाभ्यञ्जनाञ्जनैः॥
१४४८ द्वौ दर्भौ प्राङ्मुखौ दैवे पित्र्ये त्रीन् दक्षिणामुखान्।
आसनेषु नियुञ्जीत प्रोक्षितेषु तिलोदकैः॥
१४४९ ये चात्र विश्वेदेवार्थं विप्राः पूर्वं निमन्त्रिताः।
प्राङ्मुखान्यासनान्येषां द्विदर्भोपहितानि च॥
१४५० दक्षिणामुखयुक्तानि पितॄणामासनानि तु।
दक्षिणाग्रैकदर्भाणि प्रोक्षितानि तिलोदकैः॥
१४५१ द्विजातयो यथोक्तानि नियताः स्युरुदङ्मुखाः।
पूजयेद् यजमानस्तु विधिवद् दक्षिणामुखः॥

१४५२ आसनं कुतपं दद्यादितरं वा पवित्रवत्।
ततः सिद्धमिति प्रोच्य कल्पितेष्वासनेषु तु॥
अत्रासिद्ध(सीध्व)मिति ब्रूयादासनं संस्पृशन्नपि॥
१४५३ अथ साञ्जलिरुत्थाय स्थित्वा चावाहयेत् पितॄन्।
पितरो मे प्रसीदन्तु प्र(प्रा)यान्तु च पितामहाः॥
१४५४ इति सङ्कीर्तयंस्तूष्णीं तिष्ठेत् क्षणमनुच्छ्वसन्।
आवाहयित्वा दर्भैस्तेषां स्थानानि कल्पयेत्॥
१४५५ तेष्वासीनेषु पात्रेण प्रयच्छेन् मार्जनोदकम्।
प्रक्षाल्य विकिरेत् तत्र नानावर्णास्तिलानपि॥
१४५६ अथ सङ्गृह्य कलशं सदर्भं पूर्णमम्भसा।
पुरस्तादुपविश्यैषां पिण्डावापं निवेदयेत्॥
१४५७ ततस्तैरभ्यनुज्ञातो दक्षिणां दिशमेत्य सः।
उपलिप्ते शुचौ देशे स्थानं कुर्वीत सैकतम्॥
मण्डलं चतुरस्रं वा दक्षिणावनतं महत्॥
१४५८ मूकदर्भेण तन्मध्यमुल्लिखेत् त्रिश्च तं त्यजेत्।
पवित्रपाणिश्च जपेन् मन्त्रं रक्षोघ्नमुत्तमम्॥
१४५९ निहन्मि सर्वं यदमेध्यवद् भवेद्
हताश्च सर्वेऽसुरदानवा मया।
रक्षांसि यक्षाः सपिशाचसङ्घा
हता मया यातुधानाश्च सर्वे॥
१४६० तस्मिन् स्थाने ततो दर्भानेकमूलान् शिवान् बहून्।
दक्षिणाग्रानुदक्पादान् सर्वांस्तांस्तृणुयात् समम्॥
१४६१ पात्राणां खड्गपात्रेण पिण्डदानं विधीयते।
राजतौदुम्बराभ्यां वा हस्तेनैवाथ वा पुनः॥

१४६२ ततश्चरुमुपादाय सपवित्रेण पाणिना।
चतुर्धा विभजेत् पिण्डान् घृताक्तान् भाजनेन वै॥
१४६३ मधुसर्पिस्तिलयुतांस्त्रीन् पिण्डान् निर्वपेद् बुधः।
जानूकृत्वा तथा सव्यं भूमौ पितृपरायणः॥
१४६४ अभ्यज्य मधुसर्पिभ्यां तान् वपेत् कुशसञ्श्रये।
छायायां हस्तिनश्चैव वस्तदौहित्रसन्निधौ॥
१४६५ पितृपूर्वं तु नामानि त्रयाणां कीर्तयेच्छनैः।
अपसव्यमपाङ्गुष्ठं मन्त्रपूर्वं स्वधेति च॥
१४६६ एतत्ते तत ये च त्वामन्वित्याद्यावपेत् पितुः।
तथा पितामहस्यापि तत्पितुश्च तथाचरेत्॥
१४६७ सामान्यमिति शेषाणां चतुर्थं पिण्डमावपेत्।
एवं निवेश्य पिण्डांस्तानलङ्कुर्याच्च पूर्ववत्॥
१४६८ अलङ्कृत्य यथाकल्पं जुहुयात् पावके बुधः।
हविर्भिः कव्यमन्त्रेण स्वधाकारं च घोषितम्॥
१४६९ हुत्वैवमग्निं पिण्डानां सन्निधौ तदनन्तरम्।
पक्वान्नेन बलिं तेभ्यः पिण्डेभ्यो दापयेद् द्विजः॥
१४७० ततो दत्तबलिभ्यश्च पिण्डेभ्यो मन्त्रपूर्वकम्।
पिण्डपात्रेण तेनैव दद्यादाचमनोदकम्॥
१४७१ हविःशेषं ततो मुष्टिमादायैकैकमादितः।
क्रमशः पितृपत्नीनां पिण्डनिर्वपणं चरेत्॥
१४७२ ततः पिण्डमुपादाय हविषः संस्कृतं महत्।
ज्ञातिवर्गस्य सर्वस्य सामान्यमिति निर्वपेत्॥
१४७३ दक्षिणां सर्वभोगांश्च प्रतिपिण्डं प्रदापयेत्।
भक्ष्यानपूपानिक्षूंश्च अञ्जनान्यशनानि च॥

१४७४ ततश्च पिण्डमा(पा)त्रेण समुद्धृत्य तिलोदकम्।
पिण्डांस्तांस्त्रिः परिक्रमेदजस्रमपसव्यतः॥
१४७५ ततोऽभिवाद्य प्रयतो वरान् याचेत तान् पितॄन्।
वंशो नो वर्धतां भूयो बहुदेयं च नोऽस्त्विति॥
१४७६ अघोराः पितरः सन्तु सन्त्वित्युक्ते पुनर्द्विजैः।
गोत्रं तथा वर्धतां नो तथेत्युक्तश्च तैः पुनः॥
१४७७ एता सत्याशिषः सन्तु सन्त्वित्युक्ते च तैः पुनः।
आशीः पूर्वं द्विजैर्दत्ता मूर्ध्ना धार्या ततोऽक्षता॥
१४७८ एकोद्दिष्टेऽप्यमासे वा तथा संवत्सरेऽपि च।
विधानं चैतदेव स्यात् पिण्डश्चैकोऽत्र पूज्यते॥
१४७९ एवं पिण्डान् समभ्यर्च्य हुत्वा चाग्निं यथाविधि।
अभेत्य ब्राह्मणस्थानं ब्राह्मणांस्तान् समर्चयेत्॥
१४८० पुष्पवतीति मन्त्रेण दद्यात् पुष्पाण्यतन्द्रितः।
इदं ज्योतिरिति ज्योतिः सुज्योतिरिति तेऽपि च॥
१४८१ यत् तत्र क्रियते कर्म पैतृके ब्राह्मणान् प्रति।
तत् सर्वं तस्य कर्तव्यं वैश्वदैवत्यपूर्वकम्॥
१४८२ पितृपाकात् समुद्धृत्य वैश्वदेवं तु होमयेत्॥
१४८३ अथ पिण्डावशिष्टान्नं विधिवद् भोजयेत् द्विजान्।
भोजनैः सतिलैः स्नेहैर्भक्ष्यापूपविमिश्रितैः॥
१४८४ ततोऽन्नं च यथाकामं भोजयेत् तान् द्विजोत्तमान्॥
१४८५ स्थित्वैवं निभृतः कर्ता मुदितः सादरः शुचिः।
ततो विशदमानीय भोजयेत् प्रयतो द्विजान्॥
१४८६ एवं तृप्तेषु पानीयं दद्यादाचमनं तथा।
उच्छिष्टं चाप्यपनयेद् पितॄणां नोपमार्जयेत्॥

१४८७ ततः सर्वाशनं पात्रे गृहीत्वा विधिवत् स्वयम्।
तेषामुच्छेषणस्थाने तेन पात्रेण निक्षिपेत्॥

१४८८ ततो मुष्टिमुपादाय हविषोऽन्तस्ततः स्वयम्।
कलशं जलपूर्णं च गृहीत्वोभयमेव च॥

१४८९ पितृणां ब्राह्मणानां च हस्ताग्रात् प्रभृति क्षरन्।
अपसव्यं क्रमेत् सर्वान् तांश्च पिण्डान् बहिर्मुखः॥

१४९० त्रिरेवं पतनं तोयं परीत्य श्रावयेच्छनैः।
परिक्रम्य तु तत्पात्रं तत्रैवाप्यवकुब्जयेत्॥

१४९१ यास्मिंस्ते संस्रवाः पूर्वं पितृपात्रे निवेशिताः।
पितृपात्रं तदुत्तानं कृत्वा विप्रान् विसर्जयेत्॥

१४९२ अथ वै वैश्वदेवस्यान् ब्राह्मणान् स्वस्ति वाचयेत्।
अक्षय्यं वाचयेत् पित्र्यांश्चरमं सतिलोदकम्॥

१४९३ आचान्तेभ्यो द्विजेभ्यस्तु प्रयच्छेदथ दक्षिणाम्।
हिरण्यरत्नभोगानामन्येषां च स्वशक्तितः॥

१४९४ दक्षिणां पितृविप्रेभ्यो दद्यात् पूर्वं ततो द्वयोः।
सर्वं कर्मापसव्येन दक्षिणादानवर्जितम्॥

१४९५ अथ विप्रान् गृहीतार्थान् सन्तृप्तानभिवादयेत्।
यथावद् वैश्वदेवस्यान् पितृपूर्वं पुनः पितॄन्॥

१४९६ पूर्वमुत्थापयेत् पित्र्यानृष्यतामिति च ब्रुवन्।
उत्थिताननुगच्छेच्च तेभ्यः शेषं च संहरेत्॥

१४९७ पश्चात्तु वैश्वदेवस्यान् विप्रानुत्थापयेत् तथा।
एते हि पूर्वमासीनाः समुत्तिष्ठन्ति पश्चिमाः॥

१४९८ निवृत्ते पितृमेधे तु दीपं प्रच्छाद्य पाणिना।
आचम्य पाणी प्रक्षाल्य ज्ञातीन् शेषेण तोषयेत्॥

१४९९ ततो ज्ञातिषु तुष्टेषु स्वान् भृत्यान् प्रतिपूजयेत्।
पश्चात् स्वयं च पत्नीभिः पितृशेषमुदाहरेत्॥
१५०० ततः कर्मणि निर्वृत्ते तान् पिण्डांस्तदनन्तरम्।
ब्राह्मणोऽग्निरजो गौर्वा भक्षयेदप्सु वा क्षिपेत्॥
१५०१ तेषां वा मध्यमं पिण्डं पुत्रकामा हि भक्षयेत्।
पितृप्रसादात् पुत्रं सा लभते हि महागुणम्॥
१५०२ यदेव तर्पयत्यद्भिराहिताग्निर्दिने दिने।
पित्र्यं तेनैव चाप्नोति वार्षिकादिक्रियाफलम्॥
१५०३ पिण्डमात्रं प्रदातव्यमभावे द्रव्यविप्रयोः।
श्राद्धाहनि तु सम्प्राप्ते भवेन् निरशनोऽपि वा॥
अद्भिर्वा विप्रसंवादात् पितॄणां तृप्तिमावहेत्॥
१५०४ पात्राभावे परं कृत्वा पितृयज्ञविधिं नरः।
निर्दिश्याप्यन्नमुद्धृत्य यत्र पात्रं ततो गतिः॥
१५०५ निधाय वाथ दर्भेषु आसनेषु समाहितः।
प्रेषानुप्रैषसंयुक्तं विधानं प्रतिपादयेत्॥
१५०६ सर्वाभावे क्षिपेदग्नौ गवे दद्यादथाप्सु वा।
न तु प्राप्तस्य लोपोऽस्ति पैतृकस्य विशेषतः॥
१५०७ एकेनापि हि विप्रेण षट्पिण्डं श्राद्धमाचरेत्।
षडर्घान् दापयेत् तस्मै षड्भ्यो दद्यात् तथाऽशनम्॥
१५०८ पिता भुङ्क्ते द्विजकरे मुखे भुङ्क्ते पितामहः।
प्रपितामहस्तु तालुस्थः कण्ठे मातामहः स्मृतः॥
प्रमातामहस्तु हृदये वृद्धो नाभौ तु संस्थितः॥
१५०९ एवमप्याचरेच्छ्राद्धं षड्दैवत्यं महामुने।
विप्लुतिं कारयेद्यस्तु पितृहा स प्रजायते॥

१५१० एतेन विधिना श्राद्धं कुर्यात् संवत्सरं सकृत्।
त्रिश्चतुर्वा यथा श्राद्धं मासे मासे दिने दिने॥
१५११ मानवः श्राद्धकल्पोऽयं मनुना समुदाहृतः।
बहुपिण्डाष्टका च स्यादेकपिण्डा तु नाष्टका॥

१५१२ श्राद्धं कृत्वा तु यो विप्रो न भुङ्क्तेऽथ कदाचन।
देवा हविर्न गृह्णन्ति कव्यानि पितरस्तथा॥
१५१३ दैवाद्यं नैव कुर्वीत दैवान्तं नैव कुत्रचित्।
दैवाद्यन्तं हि कुर्वीत श्राद्धं रक्षणहेतुना॥
१५१४ पङ्क्त्यां चैवोपविष्टेभ्यः समं गन्धादिभोजनम्।
न पङ्क्त्यां विषमं कुर्यात् न याचेन्न च दापयेत्॥
१५१५ देये प्रत्याब्दिके श्राद्धे त्वन्तरा मृतसूतके।
आशौचानन्तरं कुर्यात् तन्मासीन्दुक्षयेऽपि वा॥
१५१६ द्व्यामुष्यायणका दद्युर्द्वाभ्यां पिण्डोदके पृथक्।
षण्णां देयास्तु षट् पिण्डा एवं कुर्वन्न मुह्यति॥
१५१७ स्वेन भर्त्रा समं श्राद्धं माता भुङ्क्ते सुधासमम्॥
१५१८ तीर्थद्रव्योपपत्तौ च न कालमवधारयेत्।
पात्रं च ब्राह्मणं प्राप्य सद्यः श्राद्धं समाचरेत्॥

१५१९ आमश्राद्धं गृहीत्वा तु योऽन्यश्राद्धेऽतिमोहतः।
पतन्ति पितरस्तस्य लुप्तपिण्डोदकक्रियाः॥
१५२० आमश्राद्धं यदा कुर्यात् पिण्डदानं कथं भवेत्।
गृहपाकात् समुद्धृत्य सक्तुभिः पायसेन वा॥
१५२१ आमं शूद्रस्य पक्वान्नं पक्वमुच्छिष्टमुच्यते॥

१५२२ यागादौ च तुलादाने प्रायश्चित्तेषु कर्मसु।
श्राद्धं कुर्याद् वैष्णवाख्यं सर्वदोषोपशान्तिदम्॥

१५२३ पितृकार्यपरो यस्तु प्रमादाद् विस्मरेदिह।
अर्घ्यपात्रादिकं विप्रः पाणौ पैतृककर्माणि॥
१५२४ कर्ता याति महाघोरं पितरो यान्त्यधोगतिम्।
तदन्नं राक्षसं प्रोक्तं तद्भोक्तारो विनाशिनः॥
१५२५ श्राद्धकर्ता यदा विप्रो गृह्याग्नौ दक्षिणानले।
अन्नहोमं न कुर्याच्चेत् पार्वणे समुपस्थिते॥
१५२६ निराशाः पितरो यान्ति कर्ता याति यमालयम्।
तच्छ्राद्धं राक्षसं ज्ञेयं त्रीण्येतानि वृथा वृथा॥
१५२७ श्राद्धपङ्क्तौ तु भुञ्जानो ब्राह्मणो ब्राह्मणं स्पृशेत्।
तदन्नमत्यजन् भुक्त्वा गायत्र्यष्टशतं जपेत्॥
१५२८ द्विजो यः पार्वणश्राद्धं विस्मृत्य वर्तते यदि (यादि वर्तते)।
श्राद्धहन्ता स विज्ञेयः सर्वदा तं न भाषयेत्॥
१५२९ पैतृके पार्वणश्राद्धे पिण्डनिक्षेपणे यदा।
स पिण्डो द्विदलो भूयात् तदा कर्तुर्महद्भयम्॥

१५३० मृताहं समतिक्रम्य चाण्डालः कोटिजन्मसु।
अतो विप्रैर्न तत् त्याज्यं प्राणैः कण्ठगतैरपि॥

# ॥व्यवहाराध्यायः॥ २॥

# ॥प्रथमं प्रकरणम्॥

# ॥राजधर्माः॥

१५३१ नास्ति राज्ञां समरतनुत्यागसदृशो धर्मः॥
१५३२ गोब्राह्मणमित्रधनरक्षणार्थं मृतास्ते स्वर्गलोकभाजः॥
१५३३ तृणखादी परप्रेप्सुरलसः शरणं गतः।
षण्ढः परार्दितो लिङ्गी स्थविरः पतितः शिशुः॥
न धर्मयुद्धे हन्तव्या ज्ञेया योधैरनापदि॥
१५३४ प्रजार्थं क्षत्रियो युध्येत् स्वान् प्राणान् सम्परित्यजेत्।
अश्वमेधफलं कृत्स्नं निसर्गेणाऽधिगच्छति॥
१५३५ शस्त्रेण निहतः सङ्ख्ये द्विषाद्भिरपराङ्मुखः।
शक्रलोकमवाप्नोति स्ववीर्याद् विजितं शुभम्॥
१५३६ आहवेऽभिमुखं शूरं प्रहितानि द्विषद्गणैः।
भिन्द्युर्यावन्ति शस्त्राणि तावन्तः क्रतवोऽस्य ते॥
१५३७ क्षतेभ्यः प्रस्रुतं रक्तं क्षितिपांसुषु संस्पृशेत्।
स देवलोके तावन्तं कालं तिष्ठति वै ध्रुवम्॥

१५३८ तत्र जात्यन्तरालानां प्रतिलोमानुलोमयोः।
स्वे स्वे च योनिसम्बन्धांस्तांस्तान् सम्पादयेत् पृथक्॥
१५३९ तथैव चतुरो वर्णान् स्वे स्वे धर्मे नियोजयेत्।
राज्ञो भूतिर्यशस्तुष्टिर्धर्मश्च परिवर्धते॥

# ॥द्वितीयं प्रकरणम्॥

## ॥आततायिनः॥

१५४० आत्मानं बुद्धिसम्पन्नं योग्यं सर्वार्थसिद्धिषु।
श्रमदुःखभये त्यक्त्वा रौरवे परिपच्यते॥
१५४१ उद्यम्य शस्त्रमायान्तं भ्रूणमप्याततायिनम्।
निहत्य भ्रूणहा न स्यादहत्वा भ्रूणहा भवेत्॥
१५४२ आत्मत्यागः परत्यागात् पापीयान् पातकादपि।
पातके निष्कृतिः प्रोक्ता कथमात्मघ्ननिष्कृतिः॥

# ॥तृतीयं प्रकरणम्॥

## ॥स्त्रीपुंधर्मः॥

१५४३ तस्मात् सर्वप्रयत्नेन कर्तव्यो दारसङ्ग्रहः॥

१५४४ पितरं भ्रातरं पुत्रं पुत्रिकां भगिनीं स्नुषाम्।
न त्यजेद् द्वेषलोभाभ्यां दारानपतितानपि॥
१५४५ मातृत्यागो हि शास्त्रेषु नोपदिष्टः कथञ्चन।
पतिता वाऽभिशस्ता वा माता न त्यागमर्हति॥
१५४६ निष्कारणतया पत्नीं यस्त्यजेत् पूर्वजो नृप।
न तस्येह परत्रापि, निन्दितस्त्यज्यते जनैः॥
१५४७ स्वदारांस्त्यजतो मोहान् नरस्यान्याय मोचिनः।
धर्मवंशपरित्यक्तुर्निष्कृतिर्न विधीयते॥
१५४८ कुष्ठिनीं पतितां वन्ध्यामुन्मत्तां विगतार्तवाम्।
अदुष्टां लभते त्यक्तुं तीर्थान्न त्वेव कर्मणः॥
[कुष्ठिनी पतिता वन्ध्या उन्मत्ता विगतार्तवा।
अदुष्टा लभते त्यागं तीर्थतो न तु धर्मतः॥]
१५४९ नष्टः प्रव्रजितः क्लीबः पतितः राजकिल्बिषी।
लोकान्तरगतो वापि परित्याज्यः स्त्रिया पतिः॥

१५५० मृते भर्तरि जीवे वा स्त्री विन्देतापरं पतिम्।
सन्तत्यनाशार्थतया न स्वातन्त्र्येण योषितः॥
१५५१ अष्टौ वर्षाण्युदीक्षेत ब्राह्मणी प्रोषितं पतिम्।
अप्रसूता च चत्वारि परतोऽन्यं समाश्रयेत्॥
१५५२ अष्टौ वर्षाण्युदीक्षेत ब्राह्मणी तु पतिं तथा।
क्षत्रिया षट्समास्तिष्ठेदप्रसूता समा त्रयम्॥
१५५३ वैश्या प्रसूता चत्वारि द्वे समे त्वप्रसूतिका।
न शूद्रायाः स्मृतः कालो न च धर्मव्यतिक्रमः॥
१५५४ विशेषतोऽप्रसूतायाः संवत्सरपरा स्थितिः।
अप्रवृत्तौ स्मृतः काल एष प्रोषितयोषिताम्॥
१५५५ जीवति श्रूयमाणे च स्यादेष द्विगुणो विधिः।
प्रजाप्रवृत्तौ नारीणां वृत्तिरेषा प्रजापतेः॥
अतोऽन्यगमने स्त्रीणामेष दोषो न विद्यते॥

१५५६ आकाङ्क्षेताष्टवर्षाणि भर्ताऽतिप्रसवां स्त्रियम्।
दश वन्ध्यां च निन्द्यां च द्वादश स्त्रीप्रसूतिनीम्॥
१५५७ ततो विन्देत विधिना पुत्रार्थी धर्मतः स्त्रियम्।
पुत्रलाभात् परं लोके नास्त्यतिप्रसवा हि ताः॥
१५५८ या रोहिणी स्यात्तु(द्व)निता सम्पन्ना चैव शीलतः।
सानुज्ञाप्याऽधिवेत्तव्या नावमान्या च कर्हिचित्॥
१५५९ एकामुत्क्रम्य कामार्थमन्यां लब्धुं य इच्छति।
समर्थस्तोषयित्वाऽर्थैः पूर्वोढामपरां वहेत्॥
१५६० एका शूद्रस्य वैश्यस्य द्वे तिस्रः क्षत्रियस्य तु।
चतस्रो ब्राह्मणस्य स्युर्भार्या राज्ञो यथेष्टतः॥

१५६१ अधिविन्दन् स्त्रियै दद्यादाधिवेदनिकं समम्।
न दत्तं स्त्रीधनं यस्यै दत्ते त्वर्धं प्रकीर्तितम्॥
१५६२ [आज्ञासम्पादिनीं दक्षां वीरसूं प्रियवादिनीम्।
त्यजन् दाप्यस्तृतीयांशम् -] अद्रव्यो भरणं स्त्रियाः॥

# ॥ चतुर्थं प्रकरणम् ॥

## ॥ दायविभागः ॥

१५६३ पितर्युपरते पुत्रा विभजेरन् पितुर्धनम्।
अस्वाम्यं हि भवेत्तेषां निर्दोषे पितरि स्थिते॥
१५६४ पित्रोरभावे भ्रातॄणां विभागः सम्प्रदर्शितः।
मातुर्निवृत्ते रजसि जीवन्त्यामपि शस्यते॥
१५६५ पत्नौ जीवति नारीणां दासानां स्वामिनि स्थिते।
तद्वन्नियतमस्वाम्यं सर्वार्थेष्वब्रवीन् मनुः॥
१५६६ विश्रब्धं ब्राह्मणः शूद्राद् द्रव्योपादानमाचरेत्।
न हि तस्यास्ति किञ्चित् स्वं भर्तृहार्यधनो हि सः॥

१५६७ अविभक्तविभक्तानां कुल्यानां वसतां सह।
भूयो दायविभागः स्यादाचतुर्थादिति स्थितिः॥
१५६८ तावत् कुल्याः सपिण्डाः स्युः पिण्डभेदस्त्वनन्तरम्।
समभिच्छन्ति पिण्डानां दायार्थस्य विभाजनम्॥
१५६९ विधिरेष सवर्णानां बहूनां समुदाहृतः।
एक एक सवर्णः स्याद् दायोऽन्त्र न विभज्यते॥
१५७० ततो दायमपुत्रस्य विभजेरन् सहोदराः।
कुल्या दुहितरो वापि ध्रियमाणः पिताऽपि वा॥

१५७१ सवर्णा भ्रातरो माता भार्या चेति यथाक्रमम्।
तेषामभावे गृह्णीयुः कुल्यानां सहवासिनः॥
१५७२ सर्व एव विकर्मस्था नार्हन्ति भ्रातरो धनम्॥
१५७३ मृते न पितरि क्लीबकुष्ठ्युन्मत्तजडान्धकाः।
पतितः पतितापत्यं लिङ्गी दायांशभागिनः॥
१५७४ तेषां पतितवर्ज्येभ्यो भक्तं वस्त्रं प्रदीयते।
तत्पुत्राः पितृदायांशं लभेरन् दोषवर्जिताः॥

१५७५ औरस-पुत्रिका-क्षेत्रज-कानीन-गूढोत्पन्न-अपविद्ध-सहोढ-पौनर्भव-दत्तक-स्वयमुपगत-कृत्रिम-क्रीता द्वादश [पुत्राः॥] ॥

१५७६ औरसः पुत्रिका बीजक्षेत्रजौ पुत्रिकासुतः।
पौनर्भवश्च कानीनः सहोढो गूढसम्भवः॥
१५७७ दत्तः क्रीतः स्वयंदत्तः कृत्रिमश्चापविद्धकः।
यत्र क्वचोत्पादितश्च पुत्राख्या दश पञ्च च॥
१५७८ एक एवौरसः पित्र्ये धने स्वामी प्रकीर्तितः।
तत्तुल्या पुत्रिका प्रोक्ता द्वावेतावुत्तमौ स्मृतौ॥
१५७९ दत्तोऽपविद्धः क्रीतश्च कृतः शौद्रस्तथैव च।
जातिशुद्धाः कर्मशुद्धाः मध्यमास्ते सुताः स्मृताः॥
१५८० क्षेत्रजो गर्हितः सद्भिस्तथा पौनर्भवः सुतः।
कानीनश्च सहोढश्च गूढोत्पन्नस्तथैव च॥
१५८१ अनेनैव क्रमेणैषां पूर्वाभावे परः परः।
पिण्डदोंऽशहरश्चेति युक्ता गुणवशात् स्थितिः॥
१५८२ एते द्वादशपुत्रास्तु सन्तत्यर्थमुदाहृताः।
आत्मजाः परजाश्चैव लब्धा यादृच्छिकास्तथा॥

१५८३ तेषां षड्बन्धुदायादाः पूर्वेऽन्ये पितुरेव षट्।
विशेषश्चापि पुत्राणामानुपूर्व्याद् विशिष्यते॥
१५८४ सर्वे ह्यनौरसस्यैते पुत्रा दायहराः स्मृताः।
औरसे पुनरुत्पन्ने तेषु ज्यैष्ठ्यं न तिष्ठति॥
१५८५ तेषां सवर्णा ये पुत्रास्ते तृतीयांशभागिनः।
हीनास्तमुपजीवेयुर्ग्रासाच्छादनसम्भृताः॥
१५८६ संस्कृतायां च भार्यायां स्वयमुत्पादितो हि यः।
औरसो नाम पुत्रः स प्रधानः पितृवंशधृक्॥
१५८७ तत्तुल्यः पुत्रिकापुत्रो दायादः सोऽथवा भवेत्।
पितुर्मातामहस्यापि निरपत्यस्य पुत्रवत्॥
स एव दद्यात् पिण्डं तु पित्रे मातामहाय च॥
१५८८ पौत्रदौहित्रयोर्लोके न विशेषोऽस्ति धर्मतः।
तयोर्हि मातापितरौ सम्भूतौ तस्य देहतः॥
१५८९ अकृता वा कृता वापि यं विन्देत् सदृशात् सुतम्।
पौत्री मातामहस्तेन (स्यैव) दद्यात् पिण्डं हरेद् धनम्॥
१५९० पुत्राणां मध्यमो दायः समानानामपीष्यते।
ज्येष्ठस्य दशमं भागं न्यायवृत्तस्य निर्दिशेत्॥
१५९१ बहिर्वर्णेषु चारित्र्याद् यमयोः पूर्वजन्मतः।
यस्य जातस्य यमयोः पश्यन्ति प्रथमं मुखम्।
सन्तानः पितरश्चैव तस्मिन् ज्यैष्ठ्यं प्रतिष्ठितम्॥
१५९२ शूद्रायां द्विजातिभिर्जातो न भूमेर्भागमर्हति।
सजातावाप्नुयात् सर्वमिति धर्मो व्यवस्थितः॥
१५९३ आनुलोम्यकपुत्रस्तु पितुः सर्वस्वभाग् भवेत्॥
१५९४ निषाद एकपुत्रस्तु विप्रस्वस्य तृतीयभाक्।
द्वौ सपिण्डः सकुल्यो वा स्वधादाताऽथ संहरेत्॥

१५९५ कुल्याभावे स्वधादाता आचार्यः शिष्य एव वा।
सर्वस्वापत्सु तान् वर्णान् स्वगोत्रान् प्रतिपादयेत्॥
१५९६ धर्मार्थं वर्धिताः पुत्राः तद्तद्गोत्रेण पुत्रवत्।
अंशपिण्डविभागित्वं तेषु केवलमीरितम्॥
१५९७ रिक्थं मृतायां कन्यायां गृह्णीयुः सोदराः समम्।
तदभावे भवेन् मातुः पितुर्मातुश्च तत्क्रमात्॥

१५९८ कन्याभ्यश्च पितृद्रव्याद् देयं वैवाहिकं वसु।
अपुत्रकस्य कन्या स्वं धर्मजा पुत्रवद् हरेत्॥
१५९९ भर्त्रा प्रतिश्रुतं देयमृणवत् स्त्रीधनं सुतैः॥
१६०० अथ चेत् स द्विभार्यः स्यान्न च तां भजते पुनः।
प्रीत्या निसृष्टमपि च पतिर् (प्रति)दाप्यश्च तद्बलात्॥
१६०१ ग्रासाच्छादनवासानामाच्छेदो यत्र योषितः।
तत्र स्वमाददीत स्त्री विभागं रिक्थिनस्तदा॥
१६०२ अपकारक्रियायुक्ता निर्मर्यादाऽर्थनाशिका।
व्यभिचाररता या च स्त्रीधनं न च साऽर्हति॥
१६०३ यज्ञार्थं द्रव्यमुत्पन्नं तस्माद् द्रव्यं नियोजयेत्।
स्थानेषु धर्मयुक्तेषु न स्त्रीमूर्खविधर्मिषु॥
१६०४ वृत्तिराभरणं शुल्कं लाभश्च स्त्रीधनं भवेत्।
भोक्त्री च स्वयमेवेदं पतिर्नार्हत्यनापदि॥
१६०५ वृथा मोक्षे च भोगे च स्त्रियै दद्यात् सवृद्धिकम्।
पुत्रार्तिहरणे वापि स्त्रीधनं भोक्तुमर्हति॥
१६०६ द्वौ सुतौ विवदेयातां द्वाभ्यां जातौ स्त्रिया धने।
तयोर्यद् यस्य पित्र्यं स्यात् तत्स गृह्णीत नेतरः॥

१६०७ यद्दत्तं दुहितुः पत्ये स्त्रियमेव तदान्वियात्।
मृते जीवति वा पत्यौ तदपत्यमृते स्त्रियः॥
१६०८ तदेव यद्यनुज्ञाप्य भक्षयेत् प्रीतिपूर्वकम्।
मूलमेव स(प्र)दाप्यः स्याद् यदा स धनभाग् भवेत्॥
१६०९ आधितं व्यसनस्थं च धनिकैश्चोपपीडितम्।
ज्ञात्वा निसृष्टं सम्प्रीत्या दद्यादात्मेच्छया हि सः॥
१६१० जजन्यस्वधना पुत्रैर्विभागेंऽशं समं हरेत्॥
१६११ सामान्यं पुत्रकन्यानां मृतायां स्त्रीधनं स्त्रियाम्।
अप्रजायां हरेद् भर्ता माता भ्राता पिताऽपि वा॥
१६१२ अथ चेत् स दक्षिणार्थी स्यात् संस्कर्ता मृतवित्ततः।
गोसहस्रं शतं वापि विन्दते यदि पञ्च वा॥
१६१३ सर्वत्रादायकं राजा हरेद् ब्रह्मस्ववर्जितम्।
अदायकं तु ब्रह्मस्वं श्रोत्रियेभ्यः प्रदापयेत्॥

# ॥ प्रायश्चित्ताध्यायः ॥ ३ ॥

# ॥प्रथमं प्रकरणम्॥

# ॥प्रायश्चित्तम्॥

१६१४ ब्रह्महत्या सुवर्णस्तेयं गुरुतल्पगमनं सुरापानं चेति महापातकानि॥

१६१५ ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः।
तत्संयोगश्च पञ्चैते, महापातकमीरितम्॥

१६१६ पञ्चैतानि महापातकानि कृत्वा ब्राह्मणः सद्भिर्नाभिभाष्यो नानुग्राह्योऽभिशस्तः सर्वकर्मपरिवर्जितः पतितसमो भवति॥

१६१७ गुरुपितृमातृभ्रूणवधो गर्भिण्या वधश्च ब्रह्महत्यायां तीव्रतमानि भवन्ति॥

१६१८ मासोपवासिसोमपाय्यग्निहोत्रिणां सुवर्णस्तेयं पातकतमम्॥

१६१९ उपाध्यायराजपितृभार्यागमनानि गुरुतल्पगमने कष्टतमानि भवन्ति॥

१६२० पैष्टिकगौडिकमाध्वीकानां प्रमोहनीनां पानं सुरापाने कष्टतमम्॥

१६२१ यौनमौखश्रौवाणि पतितसंप्रयोगे तत्तुल्यानि भवन्ति॥

१६२२ तीर्थे पुण्यतमे यथावद् देहसंन्यासाद् ब्राह्मणो महापातकात् प्रमुच्यते॥

१६२३ धर्मयुद्धे गोग्रहणग्रामघातादिषु प्राणत्यागात् पूयते क्षत्रियः शस्त्रोपजीविनश्च॥

१६२४ स याति नरकं घोरं मत्सराद् द्रव्यलोभतः।
यो विप्रो ब्राह्मणं हन्ति रज्जुदण्डादिपीडनैः॥

१६२५ विप्रहत्यां रहः कृत्वा पश्चात्तापपरायणः।
तटाकं वा ह्रदं गत्वा प्रातःस्नानं समाचरेत्॥

१६२६ मनसा नित्यकर्माणि अर्घ्यदानं समन्त्रकम्।
कृत्वा जलमुपागम्य कण्ठदघ्नजले वसन्॥
१६२७ आर्द्रेण वाससाऽऽच्छाद्य मूर्धानं स्वेन पाणिना।
प्राङ्मुखोऽदङ्मुखो वापि जपन् नारायणात्मकम्॥
१६२८ प्रत्यहं यावती सङ्ख्या मनसा तां निधाय वै।
जपेदस्तं यदा भानुस्तावत् पर्यन्तमाचरेत्॥
१६२९ तत्तीरे च कुटीं कृत्वा नारायणपरायणः।
प्रत्यहं कवलं भुञ्जन् नारायणनिवेदितम्॥
१६३० स्वपेच्च स्थण्डिले तत्र शालग्रामसमीपतः।
पुनः प्रभाते विमले पूर्ववन् नियमं चरेत्॥
१६३१ एवं ऋतुत्रयं कृत्वा पुनःसंस्कारपूर्वकम्।
शुद्धिमाप्नोति राजेन्द्र तन्मध्ये म्रियते शुचिः॥
१६३२ अन्यथा दोषमाप्नोति क्षयरोगी भवेद् भुवि।
तस्य वै निष्कृतिर्नास्ति जन्मजन्मनि भूमिप॥

१६३३ सुरापाने ब्राह्मणो रूप्यताम्रत्रपुसीसानामन्यतममग्निकल्पं पीत्वा
शरीरपरित्यागात् पूयते॥
१६३४ अकामापन्नं मधु वाजसनेये न दुष्यति॥
१६३५ रहसि ब्राह्मणः पीत्वा मद्यमेकादशं मृतः।
न तस्य पुनरावृत्तिर्यमलोकात् कदाचन॥

१६३६ रहो मुषित्वा पारक्यं सुवर्णं मुनिपुङ्गव।
राज्ञा शिक्षा प्रकर्तव्याऽऽमरणान्तं द्विजोत्तम॥
१६३७ मत्या गत्वा पुनर्भार्यां गुरोः क्षत्रसुतां द्विजः।
अण्डाभ्यां वर्जितं लिङ्गमुत्कृत्य च मृतः शुचिः॥

१६३८ यो रहो जननीं गच्छेत् तत्सपत्नीमथापि वा।
प्रजावतीं गुरोर्दारान् विप्रः कामातुरो यदि॥
१६३९ स्वमुष्कं रहसि छित्वा पूर्ववद् दक्षिणामुखः।
गच्छन् मृत्वा विशुद्धः स्याद् अन्यथा पतितो भवेत्॥

१६४० पतितस्तु द्विधा प्रोक्तो महापातकसम्भवान्।
नित्यकर्मपरित्यागी द्वितीयः सद्भिरुच्यते॥
१६४१ नित्यकर्मपरित्यागात् नानायोनिनिवेशनात्।
गीतवाद्यानुरागाच्च कुण्डगोळकसङ्गमात्॥
१६४२ देवद्विजविरोधाच्च नानासत्रादिभोजनात्।
चरणायुधयुद्धेन मल्लयुद्धेन वारतः।
१६४३ द्यूतासक्तः सदाकोपी हास्यवीणाविनोदवान्।
गन्धताम्बूलवस्त्राद्यैर्देवादीनामनर्पितैः॥
१६४४ विटगायकसंयुक्तः पतितोऽसौ द्वितीयकः।
महापातकसंसर्गान् महापतित उच्यते॥
१६४५ पतितेन सहोषित्वा जानन् संवत्सरं नरः।
मिश्रितस्तेन सोऽब्दान्ते स्वयं च पतितो भवेत्॥
१६४६ संलापस्पर्शनिश्वाससहयानासनाशनात्।
याजनाध्यापनाद् यौनात् पापं सङ्क्रमते नृणाम्॥
१६४७ एकशय्यासनं पङ्क्तिभाण्डपक्वान्नमिश्रणम्।
याजनाध्यापनं योनिस्तथा च सहभोजनम्॥
नवधा सङ्करः प्रोक्तो न कर्तव्योऽधमैः सह॥
१६४८ संवत्सरेण पतति पतितेन सहाचरन्।
भोजनाश(स)नशय्यादि कुर्वाणः सार्वकालिकम्॥

१६४९ याजनं योनिसम्बन्धं स्वाध्यायं सहभोजनम्।
कृत्वा सद्यः पतत्येव पतितेन न संशयः॥

१६५० गोघ्नः षण्मासांस्तच्चर्मपरिवृतो गोव्रजनिवासी गोभिरेव सह चरन् प्रमुच्यते॥
१६५१ चौरः श्वपाकश्चाण्डालो विप्रेणाभिहतो यदि।
अहोरात्रोषितो भूत्वा घृतं प्राश्य विशुध्यति॥

१६५२ विप्रः सतीं स्वकुलजां विप्रपत्नीं हरेद् यदि।
तोषयित्वा सुवार्ताभिरुत वाऽपथिया खलः॥
तस्यैव निष्कृतिर्नास्ति कारीषदहनाद् ऋते॥

१६५३ व्याघ्रं वराहं भल्लूकमेणीं कृष्णमृगं तथा।
राज्ञां क्रीडार्थमानीतं हत्वा विप्रः कथं भवेत्॥
१६५४ प्राजापत्यं दुष्टमृगे हरिण्यां तत्प्रमुच्यते।
चान्द्रं कृष्णमृगे प्रोक्तं प्रायश्चित्तं विशोधनम्॥
१६५५ पूर्वजो हरते वत्सं पारक्यं गोतनूद्भवम्।
मृत्वा नरकमासाद्य चाण्डालत्वमवाप्नुयात्॥
१६५६ उत्तमाश्वं द्विजो हत्वा पारक्यं तरुणं मुदा।
यमलोकमुपागम्य पङ्गुर्भूयाद् भुवस्तले॥
१६५७ यो विप्रस्तु खरं हत्वा पारक्यं धनकाम्यया।
सङ्गदोषादयं पापी मृगचाण्डालमाप्नुयात्॥
यमलोकमुपागम्य हीनजातिर्भवेद् भुवि॥
१६५८ स्वदत्तां परदत्तां च यो हरेच्च वसुन्धराम्।
षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः॥

१६५९ एकैकभागिनो लोके सर्वेषामेव भूभुजाम्।
न भोज्या न करग्राह्या विप्रदत्ता वसुन्धरा॥
१६६० भूमिं क्षेत्रं धनं धान्यं वस्त्रं कन्यां विभूषणम्।
सालग्रामं च लिङ्गं च गृहं शय्यां महोन्नतिम्॥
१६६१ पूर्वं दत्त्वा द्विजेभ्यश्च पश्चात् लोभपरायणः।
स्वयं हृत्वा महाघोरं रौरवं नरकं व्रजेत्॥
१६६२ मुक्ताः प्रवालं वैदूर्यं वज्रं नीलं तथैव च।
पद्मरागं मरकतं पुष्परागमतःपरम्॥
१६६३ एतानि रत्नजातानि विप्रो हरति भूबिलात्।
प्रत्यक्षं वाऽथ चौर्याद् वा स पापी नरकं व्रजेत्॥
पश्चात् भूमिं समागम्य कुरूपो जायते भुवि॥
१६६४ ब्राह्मणः क्षत्रियो वैश्यस्तल्पं सोपस्करं हरेत्।
महाधनं सखट्वं च चौरबुद्ध्या बलादिह॥
१६६५ सोऽन्ते कृतान्तशरणे व्रजेदङ्गारतल्पताम्।
न तस्य पुनरावृत्तिः पृष्ठे व्रणभयादिभिः॥
१६६६ उपानत्पादुके राजन् पारक्यं यो द्विजो हरेत्।
स चाण्डालसमो भूयात् कण्टकास्तरणं व्रजेत्॥
१६६७ छत्रं हरेत् द्विजो नैव महातपनिवारणम्।
यमप्रीतिकरं पुण्यं सर्वसौख्यप्रदायकम्॥
१६६८ चामरं सर्वदेवानां भूतानां भूपतेरपि।
राजचिह्नं हरेद् यस्तु सद्यो भवति पातकी॥
१६६९ कदलीं मातुलिङ्गं च नालिकेरं च पानसम्।
द्राक्षाखर्जूरजम्बीरचूतजम्बूफलानि च॥

१६७० फलानि विविधानीह देवप्रियकराणि वै।
हृत्वा विप्रस्तु पारक्यं भुक्त्वा नरकमश्नुते॥
पुनर्भुवमुपागम्य फलहीनोऽपि जायते॥
१६७१ हृत्वा विप्रस्तु पारक्यं प्रायश्चित्तमिदं चरेत्।
ऋतुत्रये पराकं स्यात् वत्सरे चान्द्रमुच्यते॥
१६७२ सूरणं शृङ्गवेरं च हरिद्रामूलकं तथा।
अन्यानि मूलवस्तूनि देवयोग्यानि यानि च॥
१६७३ विप्रो मुषित्वा लोभेन तेन यद्यत् समाचरेत्।
तत्सर्वं स्वामिनः प्रोक्तं द्वीप(दोष)वानिह जायते॥
१६७४ अलाबुं घृतकोषं च वृन्ताकं शिग्रुजं तथा।
तथैव तिन्त्रिणीकोषं कपित्थं कदलीं तथा॥
१६७५ एवमादीनि कोषाणि हृत्वा पापमवाप्नुयात्।
उपोष्य रजनीमेकां स्वगृह्योक्तविधानतः॥
१६७६ महाव्याहृतिभिर्होमः पञ्चगव्यं पिबेत् ततः।
एतेन शुद्धिमाप्नोति अभ्यासे द्विगुणं चरेत्॥
१६७७ शाकान्यरण्यजातानि तथैव ग्रामजान्यपि।
नानानामानि शाकानि नानावर्णानि पूर्वजः॥
१६७८ अपहृत्य यदा लोभात् महाशोकमवाप्नुयात्।
भारमात्रे महापापमितरेष्वल्पपापभाक्॥
१६७९ अपूपं माषसम्भूतं तथा मुद्गसमुद्भवम्।
गोधूमानां विकाराणि भक्ष्याणि विविधानि वै॥
१६८० संयावं परमान्नं च चित्रान्नानि रुचीनि च।
चोष्यं लेह्यं च पेयं च चित्रशाकानि यानि च॥

१६८१ परकीयं द्विजो मोहात् जिह्वाचापमतो हरेत्।
तस्यैव जिह्वा पतति यमलोके सुदारुणे॥
स पश्चाद् भुवमासाद्य वायसोऽभून्न संशयः॥
१६८२ मरीचं पिप्पलीं शुण्ठिं सर्वरोगहरं वरम्।
सर्वपापहरं दिव्यं पारक्यं यो द्विजः हरेत्॥
न तस्य पुनरावृत्तिर्यमलोकात् कदाचन॥
१६८३ पारक्यमाग्निहोत्रार्थमानीतं क्षीरमुत्तमम्।
द्विजो गोद्रव्यलोभेन मुषित्वा पापमाप्नुयात्॥
१६८४ इन्धनं दारुकाष्ठं वा समिधो दर्भसञ्चयान्।
स्रुक्स्रुवादीनि पात्राणि यज्ञसाधनहेतवे॥
१६८५ अरणीं यूपस्तम्भं वा परकीयं द्विजो हरेत्॥
स गत्वा नरकं घोरं कृमिः समिधपूरितः (सम्पद्यते ततः)॥
१६८६ रुद्राक्षान् क्रमुकान् पूगान् परकीयान् द्विजो हरेत्।
सद्य एव द्विजन्मासौ शिवद्रोही प्रजायते॥
महान्तं नरकं गत्वा जायते भुवि कीटकः॥
१६८७ शतादूर्ध्वं तु रुद्राक्षं हृत्वा चान्द्रत्रयं स्मृतम्।
शते पराकमत्रे तु गायत्रीजपमाचरेत्॥
१६८८ शालग्रामशिलां लिङ्गं प्रतिमां चक्रपाणिनः।
घण्टामुपस्करं विप्रो यो हरेत् पापबुद्धिमान्॥
१६८९ देवद्रोही स विज्ञेयः सर्वधर्मबहिष्कृतः।
मृत्वा नरकमाप्नोति जायते भुवि रौरवात्॥
१६९० सालग्रामे तु चान्द्रं स्याच्छिवलिङ्गे तथैव च।
प्राजापत्यं चक्रपाणेरितरेषु तथैव च॥
१६९१ कुन्तं खड्गं च परशुं भिन्दिपालं धनुस्तथा।
शस्त्रं खनित्रं मुसलं चक्रं खेटकसंज्ञितम्॥

१६९२ तूणीरं भिन्दिपालं च गदां दण्डं तथैव च।
एतानि शस्त्रजालानि हरेद् विप्रः सकृद् यदा॥
महापातकमासाद्य नरके वासमश्नुते॥
१६९३ यो विप्रः पतितैः सार्धमरण्ये मार्गमध्यतः।
वस्त्रं धान्यं धनं ताम्रं पात्रादिकमुपाहरेत्॥
१६९४ स विप्रो नरकं गत्वा कालसूत्रमवाप्नुयात्।
तदन्ते भुवमासाद्य जायते भुवि रोगवान्॥
१६९५ तटाकं कूपकासारो वनं क्षेत्रं द्विजो हरेत्।
बलाद् वा चौर्यरूपेण हीनमूल्येन वा नृप॥
१६९६ तस्य वै निष्कृतिर्नास्ति यमलोकात् कदाचन।
तदन्ते भुवमासाद्य जायते कुक्षिरोगवान्॥
१६९७ पुस्तकं फलकं सूत्रं लेख्यं बन्धनमेव च।
अपहर्ता द्विजो यस्तु स महापापमाप्नुयात्॥
भूलोकं समुपागम्य महामूको भवेदिह॥

१६९८ सूनोः परिग्रहं गत्वा विप्रः पापपरायणः।
कुम्भीपाके महाघोरे वसत्याचन्द्रतारकम्॥
१६९९ समानगोत्रजामूढ्वा समानप्रवरां तथा।
यदि पुष्पवतीं गच्छेत् लोभात् कामातुरः सकृत्॥
मातृगामी स विज्ञेयः सर्वकर्मबहिष्कृतः॥
१७०० गुरुतल्पव्रतं कुर्यान्मुष्कच्छेदविवर्जितम्।
पुत्रोत्पत्तौ तयोः पुत्रा अन्त्यजत्वमवाप्नुयुः॥
१७०१ अप्रौढां कन्यकां विप्रो यभेत् कामातुरोऽन्वहम्।
तस्यैव नरके वासः कानीनः स्याद् तदुद्भवः॥

१७०२ राजन् पुष्पवतीं भार्यां द्विजः कामातुरो व्रजेत्।
महान्तं नरकं गत्वा रक्तस्राविगुदो भवेत्॥
१७०३ ब्राह्मणो मदलोभेन विधवां विप्रनन्दिनीम्।
गच्छेत् कामातुरः पश्चात् ज्ञात्वाऽसौ पतिवर्जिताम्॥
१७०४ इति तत्र व्रजेद् गन्धमादनं पर्वतोत्तमम्।
तत्र चापाग्रमासाद्य प्रातः स्नायाद् दिने दिने॥
मासमात्रेण शुद्धिः स्यादन्यथा दोषभाग् भवेत्॥
१७०५ बौद्धपाषण्डपतितशूद्रस्त्रीणां सकृद् द्विजः।
रतिं कृत्वा दिनाभ्यासे चान्द्रायणमथाऽऽचरेत्॥
१७०६ दिनत्रये यावकं तु तप्तं मासे प्रकीर्तितम्।
अत ऊर्ध्वं न सम्भाष्यः पतितः सर्वकर्मसु॥
१७०७ मद्यपानरतां नारीं द्विजः कामातुरः सकृत्।
गच्छेद् यदिह पापात्मा चाण्डालत्वमवाप्नुयात्॥
१७०८ दासीं द्विजो यदा गत्वा स्वधर्मं नावलोकयन्।
महापापमवाप्नोति महाहानिश्च जायते॥
१७०९ भोगासक्तस्तु यो वेश्यां विप्रः पापपरायणः।
रमेत्तां यदि दुष्टात्मा महान्तं नरकं व्रजेत्॥
१७१० द्विजः कामातुरो वेश्यां यभेदेकदिनं मुदा।
न तस्य सन्ति पुण्यानि तिष्ठन्त्यत्र न संशयः॥
१७११ द्विजः कामातुरो नित्यं वेश्यां यदि यभेद् भुवि।
तस्य नित्यविधिर्नष्टः सद्य एव न संशयः॥
१७१२ नित्यकर्मपरित्यागात् पतितः स्यान् न संशयः।
यदीच्छेत् शुद्धिमतुलां षडब्दं कृच्छ्रमाचरेत्॥
पुनस्तत्रैव संस्कारं कृत्वा शुद्धिमवाप्नुयात्॥

1613 कुलालकस्य यो नारीं विप्रः कामातुरः सकृत्।
अङ्गीकारेण वा राजन् बलात्कारेण वा पुनः॥
1614 रमेद् दिनं तदर्धं वा मासमृतुमथाऽपि वा।
तस्यैव निष्कृतिर्नास्ति पुनःसंस्कारकर्मणः॥
1615 नापितस्य स्त्रियं गत्वा कारुकस्य द्विजाधमः।
कामातुरो महापापी न पुनर्भुवि जायते॥
1616 रजकीं युवतीं ग्रामचाण्डालीं यो द्विजो रमेत्।
सकृदज्ञानतो राजन् ज्ञात्वा शुद्धिमथाचरेत्॥
1617 पूर्वेण वयसा राजन् विद्याधनविवर्जितः।
द्विजो यश्चर्मकारस्य पत्नीं यदि व्रजेदिह॥
1618 स चाण्डालसमो ज्ञेयो नालपेत् तं कदाचन।
सकृदज्ञानतो गत्वा मृत्वा नरकमश्नुते॥
1619 नटिनीं ब्राह्मणो गच्छेत् पञ्चबाणातुरः सकृत्।
तस्यैव पितरो यान्ति रेतःकुण्डं महद्भयम्॥
1620 कारागृहे दिनमात्रं सकृद् गत्वा दिनत्रयम्।
अष्टौ वा वेशानं कृत्वा नास्यं कृत्वा दिनत्रयम्॥
1621 भृतिमादाय विप्रोऽसौ सद्यः पातित्यमर्हति।
तस्माद् भृतिं परित्यज्य द्विजो वर्तयतेऽन्यतः (वर्तेत चान्यतः)॥
1622 चान्द्रायणद्वयं कुर्यात् पुनःसंस्कारपूर्वकम्।
विप्रो गत्वा प्रमादाद् वा ज्ञात्वा वा बहुवार्षिकम्॥
1623 कुक्कुटीं यो द्विजो गच्छेत् सकृत् कामातुरः स्थितौ।
स एव नरकं गत्वा हीनजातिमवाप्नुयात्॥
1624 कैवर्तस्य सतीं विप्रः सकृद् गत्वाऽविचारयन्।
महान्तं नरकं गत्वा तज्जातिषु भवेद् भुवि॥

१७२५ वेणुकारसतीं गत्वा द्विजः कामातुरः सकृत्।
नरकं कालकूटाख्यं याति पापी सदा श्वसन्॥
१७२६ सौचिको वस्त्रसन्धाने जनेभ्यो भृतिमुद्वहन्।
जीवन् तया वस्त्रहारी सौचिकोऽयमुदीरितः॥
१७२७ तदङ्गना महापापकारिणी लोकनाशिनी।
तां रमेद् ब्राह्मणो यस्तु पञ्चबाणातुरः सकृत्॥
तस्य वै निष्कृतिर्नास्ति सूचिकारस्य जन्मनः॥
१७२८ मांसविक्रयिणः पत्नीं पुत्रीं वा भगिनीमपि।
स्नुषां वा भुसजः पापी रमेत् कामातुरः सकृत्॥
१७२९ न तस्य पुनरावृत्तिः कुम्भीपाकाद् भयङ्करात्।
पुनर्भुवमुपागम्य जायते हीनजातिमान्॥
१७३० चण्डालश्च तुरुष्कश्च द्वावेतौ तुल्यपापिनौ।
तदङ्गना तथा ज्ञेया विप्रैः पापभयातुरैः॥
१७३१ ज्ञात्वाऽज्ञात्वा तुरुष्कीं यो द्विजः कामातुरः सकृत्।
गत्वा शुद्धिमवाप्नोति चाण्डालीगमने यथा॥
१७३२ चाण्डालीं ब्राह्मणो गत्वा पञ्चबाणातुरः सकृत्।
तस्यैव निष्कृतिर्नास्ति करीषाग्निवधाद् ऋते॥
१७३३ यो विप्रो पुरुषं गच्छेत् पञ्चबाणातुरः खलः।
स्वदारेषु मुखे वापि यभेत् पापपरायणः॥
तस्य वीर्यं क्षयं याति मृतो नरकमश्नुते॥
१७३४ खरीमुष्ट्रीं च वडवां विप्रो मोहमदान्धवान्(तः)।
यभेद् यदि स पापात्मा रौरवं नरकं व्रजेत्॥
१७३५ बस्तं वा महिषीं बस्तामजमेणादिकं तथा।
गच्छेद् द्विजो महापापी सद्यः पतितुमर्हति॥

१७३६ वेदान्तं मन्त्रशास्त्रं वा वेदं वा तत्त्वमेव वा।
ब्रह्मबन्धुश्च यो विप्रो विस्मृत्य यदि वर्तते॥
१७३७ सर्वेण चाभिमानेन ऐश्वर्यमदवत् तथा।
सद्यो वै नरकस्थायी पतितः सर्वकर्मसु॥
१७३८ विवाहार्थं धनं गृह्णन् यं कं वा व्याजमाश्रितः।
तदेव विक्रये मौल्यं विप्रस्तस्मात् तु सन्त्यजेत्॥
१७३९ न तस्य निष्कृतिर्वास्ति त्रिभिश्चान्द्रायणैर्विना।
रोहिणीविक्रये राजन् महाचान्द्रायणं स्मृतम्॥
१७४० गौरीविक्रयणे तात महासान्तपनत्रयम्।
रजस्वलाविक्रयणे कारीषघ्न ध्रुव हि॥
१७४१ एतासां च चतसृणां मूल्यं धृत्वा विवाहयेत्।
न तत्र विप्रो भुञ्जीत तत्तत्पापार्धमाप्नुयात्॥
१७४२ दासीं क्रीत्वा द्विजो यस्तु महाक्षामादिसम्भवे।
पुनस्तां विक्रयेन्मोहाद् रौरवं नरकं व्रजेत्॥
१७४३ सम्पाद्य दासीं विप्रोऽयं रूपलावण्यविभ्रमाम्।
युवतीं विक्रयेद् यस्तु स चण्डालसमो भवेत्॥
१७४४ द्विजः सम्पाद्य यो दासीं गृहधर्मसुखाप्तये।
पश्चात् तां विक्रयेद् यत्नात् स चण्डालो भवेद् भुवि॥
१७४५ तस्य निष्कृतिरुत्पन्ना स्कान्दे षण्मुखलोपिते॥
बालिकाविक्रये चान्द्रं पौगण्डे तद्द्वयं चरेत्॥
१७४६ युवतीविक्रये तात षडब्दं कृच्छ्रमाचरेत्।
पञ्चगव्यं पिबेत् पश्चात् शुद्धिमाप्नोति पूर्वजः॥
१७४७ सालग्रामं शिवलिङ्गं (शालग्रामशिलां लिङ्गं) प्रतिमां चक्रपाणिनम्(नः)
द्विजः सम्पाद्य सहसा तत्पूजापरायणः॥

१७४८ पश्चान्नास्तिकभावेन लोकसादृश्यगौरवात्।
विक्रयेद् यदि मौल्येन स पापी नरकं व्रजेत्॥
पश्चाद् भवति लोकेऽस्मिन् नास्तिको भवति ध्रुवम्॥
१७४९ खड्गं कुन्तं धनुर्बाणं खेटं क्रीत्वा द्विजश्चरेत्।
विक्रयेद् यदि तान् पश्चात् रौरवं नरकं व्रजेत्॥
१७५० न तस्य निष्कृतिर्नास्ति जन्मनः कारणं भवेत्।
पश्चात्तापमवाप्याथ य इच्छेत् शुद्धिमात्मनः॥
१७५१ प्राजापत्यद्वयं चैव षण्मासे वत्सरे स्मृतम्।
ततः संवत्सरादूर्ध्वं कारुकस्य समो भवेत्॥
१७५१(अ) कटकं भूषणं काचास्तुलास्थाणुं च वैणवम्।
भाण्डानि कटकादीनि सिन्दूरं कज्जलं तथा॥
१७५२ कञ्चुकं गन्धपात्राणि सुधा भूतिं च चन्दनम्।
एवमादीनि द्रव्याणि क्रीत्वा वा स्वकृतानि वै॥
विक्रयेद् यदि लोभेन स विप्रो नरकं व्रजेत्॥
१७५३ पितृमातृपरित्यागो सोदराणां हि वाग्विशात्।
सामर्थ्ये सर्वबन्धूनां त्यागो(गे) दोषो महत्तरः॥
१७५४ ब्रह्महत्यामवाप्नोति यत्रोपेक्षापरायणः।
मातरं च स्वसारं च अनाथां गतभर्तृकाम्॥
१७५५ पुत्रीमनाथां विधवां यस्त्यजेत् कारणं विना।
भगिनीभागिनेयादीन् गर्भिण्यातुरकन्यकाः॥
बाला(लाँ)श्च कुलवृद्धा(द्धाँ)श्च अतिथीनागतान् प्रभो॥
१७५६ पितृभगिनीं मातृभगिनीमपुत्रां गतभर्तृकाम्।
अबलां यस्त्यजेत् शक्तः स वै नरकमश्नुते॥
१७५७ चाण्डालसंयोगे जातश्चाण्डाल एव स्यात्॥
१७५८ ब्रह्मघोदिष्टं प्रायश्चित्तं वार्षिकम्॥

१७५९ षाण्मासिकं कृच्छ्रं वा ब्राह्मणस्य॥
१७६० चतुस्त्रिद्व्येकमासाः शेषाणाम्॥
१७६१ अविज्ञातचाण्डालसम्पर्के विद्यमान एव दम्पत्योः संयोगतया जातो ब्राह्मणः,
स वार्षिकं ब्रह्महत्याव्रतं प्राजापत्यं वा षण्मासान् कुर्यात्॥
१७६२ वार्षिकब्रह्महत्याव्रताशक्तौ पञ्चदश धेनवो दातव्याः॥
१७६३ षाण्मासिकप्राजापत्यव्रताशक्तावपि॥
१७६४ चण्डालधर्मसंयोगे प्राजापत्यं समाचरेत्।
चरेत् त्रिरात्रं चण्डालकूपतीर्थनिषेवणात्॥
१७६५ चण्डालकूपभाण्डस्थं यस्तु कामाज्जलं पिबेत्।
चरेत् सान्तपनं विप्रः शुध्येन्मोहात् त्रिरात्रतः॥
१७६६ चाण्डालकूपभाण्डस्थमज्ञानदुदकं पिबेत्।
स तु त्र्यहेण शुध्येत्तु शूद्रस्त्वेकेन शुध्यति॥
१७६७ चाण्डालस्पर्शने राजन् सवस्त्रं स्नानमाचरेत्।
सम्भाषणे द्विजैर्भाषा दर्शने भानुदर्शनम्॥
१७६८ तच्छायास्पर्शने चैव पूर्ववत् स्नानमाचरेत्।
तदुच्छिष्टेन संस्पृष्टः प्रायश्चित्तमिदं चरेत्॥
१७६९ शि(शिं)खाणिकायां लालायां श्लेष्मसङ्गे विशेषतः।
मृद्भिः प्रक्षालयेत् यत्नात् तं देशं द्वित्रिसङ्ख्यया॥
१७७० शि(शिं)खाणिकायामेक(का) मृद्, लालायां तु द्वयं स्मृतम्।
श्लेष्मसङ्गे त्रयः(यं) प्रोक्ताः(क्तं) तदेव क्षालनक्रमः॥
१७७१ आस्यस्पर्शे महत्पापं मृन्मयैस्त्वेकविंशतिम्।
तद्देशं क्षालयित्वा तु गण्डूषान् द्वादशाऽऽचरेत्॥
उपोष्य रजनीमेकां पञ्चगव्येन शुध्यति॥

१७७२ परार्थं काशिकायायी दत्ताग्निः कीकसानुगः।
त एव ब्रह्मचाण्डाला वाङ्मात्रेणापि नार्चयेत्॥

१७७३ मूर्खश्च पिशुनश्चैव मद्यपो दुर्जनस्तथा।
स्तेयी च कितवश्चैव त एते दुर्जनाः स्मृताः॥
१७७४ एतेषां यो द्विजः सेवां प्रत्यहं समुपाचरेत्।
तस्यैव निष्कृतिर्नास्ति तप्तकृच्छ्रत्रयाद् विना॥
१७७५ पराकस्त्वेकदिवसे पक्षे तप्तमुदीरितम्।
प्राजापत्यं ततो मासे वर्षे चान्द्रस्य भक्षणम्॥
कृत्वा शुद्धिमवाप्नोति वर्षादूर्ध्वं पतत्यसौ॥

१७७६ द्विजो यो रक्षितां कन्यां सभामध्ये विनिन्दयेत्।
स एव पापकर्मा स्यान्मृत्वा नरकमश्नुते॥

१७७७ आश्रमाणां पुरोवर्ती ब्रह्मचारीह दैवतः।
रेतोत्सर्गं यदा कुर्यात् स्वप्ने वा मुष्टिमैथुने॥
१७७८ अवकीर्णी स विज्ञेयः सर्वधर्मबहिष्कृतः।
महापापमवाप्नोति तपः क्षरति तत्क्षणात्॥

१७७९ ब्राह्मणस्तु शुना दष्टो गायत्र्यष्टसहस्राभिमन्त्रितं कृत्वा तीर्थोदकेन नवभिश्चतुर्भिर्वा कलशैः स्नातः शुध्यति॥
१७८० नदीसङ्गमे वा बालकस्याज्ञस्याशक्तस्य वा तत्र पिताऽस्यानुध्यायन् मनसा सर्वकर्माणि कुर्वीत॥
१७८१ पितुरभावे सत्याचार्यः॥
१७८२ श्वदष्टः सागरगायां नद्यां स्नातो निराहारः प्राणायामशतमावर्तयेत्

त्रिरात्रादपगतपाप्मा भवति॥

१७८३ विषाणिदंष्ट्रिश्वशृगालविड्वराहखरनरवानरपुंश्चलीभिर्दष्टः स्रवन्तीमासाद्य षोडशप्राणायामान् कुर्यात्॥

१७८४ दिवा वा यदि वा रात्रौ शुना विप्रोऽथ दंशितः।
दिवा सचैलः स्नायीत न रात्रौ स्नानमाचरेत्॥

१७८५ बहुधान्योद्भवस्याथ तटाकस्य विभेदने।
ब्रह्महत्याव्रतं कृत्वा कपालध्वजवर्जितम्॥

१७८६ पुनःसंस्कारकृत् पश्चाच्छुद्धिमाप्नोति नैष्ठिकीम्।
अन्यथा पतितं विद्यात् नालपेत् तं कदाचन॥

१७८७ द्विजः पापी पुनर्बुद्ध्या चरेच्चान्द्रायणं सकृत्।
चान्द्रायणं पराकं च तद्द्वयं पूर्णशून्ययोः॥

१७८८ स्पृष्ट्वा रजस्वलाऽन्योन्यं ब्राह्मणी क्षत्रिया तथा।
त्रिरात्रेण विशुद्धिः स्याद् देवलस्य वचो यथा॥

१७८९ स्पृष्ट्वा रजस्वलाऽन्योन्यं ब्राह्मणी शूद्रजा तथा।
पञ्चरात्रं निराहारा पञ्चगव्येन शुध्यति॥

१७९० ब्राह्मण्यनशनं कुर्यात् क्षत्रिया स्नानमाचरेत्।
सचैलं वैश्यजातीनां नक्तं शूद्रे विनिर्दिशेत्॥

१७९१ ग्रामणीः प्राड्विवाकश्च राजद्वारे पुरोहितः।
मन्त्री राजगृहे राजन् स वा यजनमार्गतः(सर्वार्थार्जनमार्गतः)॥

१७९२ प्रजाभ्यः कार्यसिद्ध्यर्थं मूल्यं भागार्हतः क्रमात्।
यो हरेत् सततं पापी स वै नरकमश्नुते॥
एकवारे तु चान्द्रं स्यात् महाचान्द्रं द्विवारतः॥

१७९३ व्यवहारादिकलहे प्रायश्चित्तादिकर्मसु।
धनं गृहीत्वा यो विप्रो कौटसाक्ष्यं वदेत(त्स) चेत्॥
तस्य पुत्राश्च पौत्राश्च तदा नाशमवाप्नुयुः॥
१७९४ यमलोकमुपागम्य अनुभूय महद्भयम्।
पुनर्भुवमुपागम्य पुत्रहीनो हि जायते॥
१७९५ तस्य देहविशुद्ध्यर्थं महाचान्द्रमुदीरितम्॥

१७९६ पर्षत्स्थितस्य विप्रस्य दोषबाहुल्यमास्ति चेत्।
तत्पापस्य विशुद्ध्यर्थं प्राजापत्यत्रयं चरेत्॥

१७९७ विधायकं च पापानां तदर्थं दोषभाग् भवेत्।
तत्कृच्छ्रद्वयं कृत्वा शुद्धिमाप्नोति पूर्वजः॥
१७९८ पापान्यनुवदेद् यस्तु सभामध्ये तु पापिनः।
तुल्यपापो भवेत् सोऽपि नात्र कार्या विचारणा॥

१७९९ यो विप्रो साधुवृत्तेषु पुण्यवत्सु द्विजेषु च।
मिथ्यारोपी महादोषः अस्ति विप्रो वदन् मृषा॥

१८०० पूर्ववन्निन्दयाऽन्वेशो अभिशस्तः स उच्यते।
अयोग्यो हव्यकव्येषु निन्दितः सर्वदा जनैः॥
१८०१ नास्त्यकीर्तिसमो मृत्युरिहलोके परत्र च।
अस्ति वा नास्ति वा दोषः अयशः परिवर्तते॥
१८०२ तस्मादेतद्विशुद्ध्यर्थं प्राजापत्यद्वयं चरेत्।
अभिशस्तो महादोषान् मुच्यते नात्र संशयः॥

१८०३ कुग्रामवासिनां पुंसां द्वावनर्थौ प्रकीर्तितौ।
अपूर्वस्याऽऽगमो नास्ति पूर्वविद्या विनश्यति॥

१८०४ खरमुष्ट्रं च महिषमनड्वाहमजं तथा।
वस्तमारुह्य मुखजः क्रोशमात्रं प्रवर्तयेत्॥
महान्तं दोषमासाद्य भुवि भूयात् स वानरः॥
१८०५ कारागृहे बलात्कारात् स्थित्वा मासमतन्द्रितः।
न स्नानं न च सन्ध्यादि न देवपितृतर्पणम्॥
न स्वाध्यायो न वा होमः शूद्र एव न संशयः॥

१८०६ यस्य कस्य व्रणेऽसाधुकृमयः सम्भवन्ति हि।
न तस्य पुनरावृत्तिर्यमलोकात् कदाचन॥

१८०७ शङ्खपुष्पीं घृतं क्षीरं पद्मनालं सकेसरम्।
पीत्वा पुष्करपर्णं च मुच्यते वारिसङ्करात्॥

१८०८ स्वभार्यां तु यदा क्रोधादगम्येति नरो वदेत्।
प्राजापत्यं चरेद् विप्रः क्षत्रियो दिवसान्नव॥
षड्रात्रं तु चरेद् वैश्यः त्रिरात्रं शूद्र आचरेत्॥

१८०९ सिन्धुसौवीरसौराष्ट्रांस्तथा प्रत्यन्तवासिनः।
अङ्गवङ्गकलिङ्गांश्च गत्वा संस्कारमर्हति॥
१८१० कर्मनासाजलस्पर्शात् करतोयाविलङ्घनात्।
गण्डकीबाहुतरणात् पुनः संस्कारमर्हति॥

१८११ यत्र यत्र पुनःकर्म मुनिभिः परिकीर्तितम्।
तत्रैव पटगर्भेण विरजा होम एव च॥
१८१२ ब्रह्मोपदेशो गायत्री पञ्चगव्यमतः परम्।
पाहि त्रयोदशं चैव पुनःसंस्कार उच्यते॥

# ॥द्वितीयं प्रकरणम्॥

## ॥म्लेच्छितशुद्धिः॥

१८१३ सिन्धुतीरे सुखासीनं देवलं मुनिसत्तमम्।
समेत्य मुनयः सर्वे इदं वचनमब्रुवन्॥
१८१४ भगवन् म्लेच्छनीता हि कथं शुद्धिमवाप्नुयुः।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैवानुपूर्वशः॥
१८१५ कथं स्नानं कथं शौचं प्रायश्चित्तं कथं भवेत्।
किमाचारा भवेयुस्ते तदाचक्ष्व सविस्तरम्॥

देवल उवाच।

१८१६ त्रिशङ्कुं वर्जयेद् देशं सर्वं द्वादशयोजनम्।
उत्तरेण महानद्या दक्षिणेन तु कीकटम्॥
१८१७ प्रायश्चित्तं प्रवक्ष्यामि विस्तरेण महर्षयः॥
१८१८ पञ्चाहान् सहवासेन सम्भाषणसहाशनैः।
सम्प्राश्य पञ्चगव्यं तु दानं दत्त्वा विशुध्यति॥
१८१९ एकाहेन तु गोमूत्रं द्व्यहेनैव तु गोमयम्।
त्र्यहात् क्षीरेण संयुक्तं चतुर्थे दधिमिश्रितम्॥

१८२० पञ्चमे घृतसम्पूर्णं पञ्चगव्यं प्रदापयेत्।
पञ्चसप्तदशाहानि पञ्चदशाच्च विंशतिः॥
१८२१ संवासं च प्रवक्ष्यामि देहशुद्धिं द्विजन्मनाम्।
पञ्चाहं पञ्चगव्यं स्यात् पादकृच्छ्रं दशाहिके।
१८२२ पराकं पञ्चदशभिर्विंशेऽतिकृच्छ्रमेव च॥
उदरं प्रविशेद् यस्य पञ्चगव्यं विधानतः॥
यत्किञ्चिद् दुष्कृतं तस्य सर्वं नश्यति देहिनः॥
१८२३ पञ्च सप्ताष्ट दश वा द्वादशाहोऽपि विंशतिः।
म्लेच्छैर्नीतस्य विप्रस्य पञ्चगव्यं विशोधनम्॥
१८२४ वत्सरं वत्सरार्धं वा मासं मासार्धमेव वा।
बलान्म्लेच्छैस्तु यो नीतस्तस्य शुद्धिस्तु कीदृशी॥
१८२५ संवत्सरोषिते शूद्रे शुद्धिश्चान्द्रायणेन तु।
पराकं वत्सरार्धे च पराकार्धं त्रिमासिके॥
१८२६ मासिके पादकृच्छ्रश्च नखरोमविवर्जितः।
१८२७ पादोनं क्षत्रियस्योक्तमर्धं वैश्यस्य दापयेत्।
प्रायश्चित्तं द्विजस्योक्तं पादं शूद्रस्य दापयेत्॥
१८२८ प्रायश्चित्तावसाने तु दोग्ध्री गौर्दक्षिणा मता।
तथाऽसौ तु कुटुम्बान्ते ह्युपविष्टो न दुष्यति॥

१८२९ अपेयं येन सम्पीतमभक्ष्यं चापि भक्षितम्।
म्लेच्छैर्नीतेन विप्रेण अगम्यागमनं कृतम्॥
१८३० तस्य शुद्धिं प्रवक्ष्यामि यावदेकं तु वत्सरम्।
चान्द्रायणं तु विप्रस्य सपराकं प्रकीर्तितम्॥
१८३१ पराकमेकं क्षत्रस्य पादकृच्छ्रेण संयुतम्।
पराकार्धं तु वैश्यस्य शूद्रस्य दिनपञ्चकम्॥

१८३२ नखलोमविहीनानां प्रायश्चित्तं प्रदापयेत्।
चतुर्णामपि वर्णानामन्यथाऽशुद्धिरस्ति हि॥
१८३३ प्रायश्चित्तविहीनं तु यदा तेषां कलेवरम्।
कर्तव्यस्तत्र संस्कारो मेखलादण्डवर्जितः॥
१८३४ म्लेच्छैर्नीतेन शूद्रैर्वा हारिते दण्डमेखले।
संस्कारप्रमुखं तस्य सर्वं कार्यं यथाविधि॥
१८३५ संस्कारान्ते च विप्राणां दानं धेनुश्च दक्षिणा।
दातव्यं शुद्ध(द्धि)मिच्छद्भिश्च गोभूमिकाञ्चनम्॥
१८३६ तदासौ तु कुटुम्बानां पङ्क्तिं प्राप्नोति नान्यथा।
स्वभार्यां च यथान्यायं गच्छन्नेव विशुध्यति॥

१८३७ बलाद् दासीकृता ये च म्लेच्छचाण्डालदस्युभिः।
अशुभं कारिताः कर्म गवादिप्राणिहिंसनम्॥
१८३८ उच्छिष्टमार्जनं चैव तथा तस्यैव भोजनम्।
खरोष्ट्रविड्वराहाणामामिषस्य च भक्षणम्॥
१८३९ तत्स्त्रीणां च तथा सङ्गं ताभिश्च सह भोजनम्।
मासोषिते द्विजातौ तु प्राजापत्यं विशोधनम्॥
१८४० चान्द्रायणं त्वाहिताग्नेः पराकस्त्वथवा भवेत्।
चान्द्रायणं पराकं च चरेत् संवत्सरोषितः॥
१८४१ संवत्सरोषितः शूद्रो मासार्धं यावकं पिबेत्।
मासमात्रोषितः शूद्रः कृच्छ्रपादेन शुध्यति॥

१८४२ म्लेच्छान्नं म्लेच्छसंस्पर्शो म्लेच्छेन सह संस्थितिः
वत्सरं वत्सरादूर्ध्वं त्रिरात्रेण विशुध्यति॥

१८४३ अथ संवत्सरादूर्ध्वं म्लेच्छैर्नीतो यदा भवेत्।
प्रायश्चित्ते तु सञ्चीर्णे गङ्गास्नानेन शुध्यति॥
१८४४ एकद्वित्रिचतुःसङ्ख्यान् वत्सरान् संवसेद् यदि।
म्लेच्छवासं द्विजश्रेष्ठः क्रमतो द्रव्ययोगतः॥
१८४५ ऊर्ध्वं संवत्सरात् कल्प्यं प्रायश्चित्तं द्विजोत्तमैः।
संवत्सरैश्चतुर्भिश्च तद्भावं सोऽधिगच्छति॥
१८४६ ह्रासो न विद्यते तस्य प्रायश्चित्तैर्दुरात्मनः॥
१८४७ गुह्यकक्षाशिरोभ्रूणां कर्तव्यं केशवापनम्।
प्रायश्चित्तं समारभ्य प्रायश्चित्तं तु कारयेत्॥
१८४८ स्नानं त्रिकालं कुर्वीत धौतवासा जितेन्द्रियः।
कुशहस्तः ससवक्ता देवलेन ह्युदाहृतम्॥

१८४९ गृहीतो यो बलान् म्लेच्छैः पञ्च षट् सप्त वा समाः।
दशादि विंशतिं यावत् तस्य शुद्धिर्विधीयते॥
१८५० प्राजापत्यद्वयं तस्य शुद्धिरेषा विधीयते।
अतः परं नास्ति शुद्धिः कृच्छ्रमेव सहोषिते॥
१८५१ म्लेच्छैः सहोषितो यस्तु पञ्चप्रभृति विंशतिः
वर्षाणि शुद्धिरेषोक्ता तस्य चान्द्रायणद्वयम्॥
१८५२ कक्षागुह्यशिरःश्मश्रुभ्रूलोमपरिकृन्तनम्।
प्राहृत्य पाणिपादानां नखलोम ततः शुचिः॥
१८५३ यो दातुं न विजानाति प्रायश्चित्तं द्विजोत्तमः।
शुद्धिं ददाति चान्यस्मै तदशुद्धेः स भोजनम्॥

१८५४ म्लेच्छैर्हृतानां चौरैर्वा कान्तारेषु प्रवासिनाम्।
भुक्त्वा भक्ष्यमभक्ष्यं वा क्षुधार्तेन भयेन वा॥

१८५५ पुनः प्राप्य स्वकं देशं चातुर्वर्ण्यस्य निष्कृतिः।
कृच्छ्रमेकं चरेद् विप्रस्तदर्धं क्षत्रियश्चरेत्॥
पादोनं च चरेद् वैश्यः शूद्रः पादेन शुध्यति॥
१८५६ सभायां स्पर्शने चैव म्लेच्छेन सह संविशेत्।
कुर्यात् स्नानं सचैलं तु दिनमेकमभोजनम्॥
१८५७ माता म्लेच्छत्वमापन्ना पिता वापि कदाचन।
न श्राद्धं सूतकं नैव इत्येवं देवलोऽब्रवीत्॥
१८५८ मातरं च परित्यज्य पितरं च तथा सुतः।
ततः पितामहं चैव शेषपिण्डं तु निर्वपेत्॥

१८५९ अतः परं प्रवक्ष्यामि प्रायश्चित्तमिदं शुभम्।
स्त्रीणां म्लेच्छैश्च नीतानां बलात् संवेशने क्वचित्॥
१८६० ब्राह्मणी क्षत्रिया वैश्या शूद्रा नीता यदाऽन्त्यजैः।
ब्राह्मण्याः कीदृशं न्याय्यं प्रायश्चित्तं विधीयते॥
१८६१ ब्राह्मणी भोजयेन् म्लेच्छमभक्ष्यं भक्षयेद् यदि।
पराकेण ततः शुद्धिः पादेनोत्तरतोत्तरान् (दानेनोत्तरतोत्तरा)॥
१८६२ न कृतं मैथुनं ताभिरभक्ष्यं नैव भक्षितम्।
शुद्धिस्तदा त्रिरात्रेण म्लेच्छान्नेनैव भक्षिते॥
१८६३ रजस्वला यदा स्पृष्टा म्लेच्छेनान्येन वा पुनः।
त्रिरात्रमुषिता स्नाता पञ्चगव्येन शुध्यति॥
१८६४ गृहीता स्त्री बलादेव म्लेच्छैर्गुर्वीकृता यदि।
गुर्वी न शुद्धिमाप्नोति त्रिरात्रेणेतरा शुचिः॥
१८६५ योषा गर्भं विधत्ते या म्लेच्छात् कामादकामतः।
ब्राह्मणी क्षत्रिया वैश्या शूद्रा वर्णेतरा च या॥

१८६६ अभक्ष्यभक्षणं कुर्यात् तस्याः शुद्धिः कथं भवेत्।
कृच्छ्रं सान्तपनं शुद्धिर्घृतैर्योनेश्च पाचनम्॥
१८६७ असवर्णेन यो गर्भः स्त्रीणां योनौ निषिच्यते।
अशुद्धा सा भवेन् नारी यावच्छल्यं न मुञ्चति॥
१८६८ विनिःसृते ततः शल्ये रजसो वापि दर्शने।
तदा सा शुध्यते नारी विमलं काञ्चनं यथा॥
१८६९ स गर्भो दीयतेऽन्यस्मै स्वयं ग्राह्यो न कर्हिचित्।
स्वजातौ वर्जयेत् यस्मात् सङ्करः स्यादतोऽन्यथा॥

१८७० स्त्रीणां चैव तु शूद्राणां पतितानां तथैव च।
पञ्चगव्यं न दातव्यं दातव्यं मन्त्रवर्जितम्॥
१८७१ वरुणो देवता मूत्रे गोमये हव्यवाहनः।
सोमः क्षीरे दध्नि वायुर्घृते रविरुदाहृतः॥
१८७२ गोमूत्रं ताम्रवर्णायाः श्वेतायाश्चैव गोमयम्।
पयः काञ्चनवर्णाया नीलायाश्चापि गोर्दधि॥
१८७३ घृतं वै कृष्णवर्णाया विभक्तिवर्णगोचरा।
उदकं सर्ववर्णं स्यात् कस्य वर्णो न गृह्यते॥
१८७४ षण्मात्रिकं तु गोमूत्रं गोमयं च कुशोदकम्।
त्रिमात्रिकं घृतं क्षीरं दधि स्याद् दशमात्रिकम्॥
१८७५ व्रते तु सर्ववर्णानां पञ्चगव्यं तु सङ्ख्यया।
प्रायश्चित्तं यथोक्तं तु दातव्यं ब्रह्मवादिभिः॥
१८७६ अन्यथा दापयेद् यस्तु प्रायश्चित्ती भवेद् द्विजः॥
१८७७ कपिलायाश्च गोर्दुग्ध्वा धारोष्णं यः पयः पिबेत्।
एष व्यासकृतः कृच्छ्रः श्वपाकमपि शोधयेत्॥

१८७८ अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः।
प्रायश्चित्तार्धमर्हन्ति स्त्रियो रोगिण एव च॥
१८७९ ऊनैकादशवर्षस्य पञ्चवर्षात् परस्य च।
प्रायश्चित्तं चरेद् भ्राता पिता वाऽन्योऽपि बान्धवः॥
१८८० स्वयं व्रतं चरेत् सर्वमन्यथा नैव शुध्यति॥
१८८१ तिलहोमं प्रकुर्वीत जपं कुर्यादतन्द्रितः।
विष्णोः रराटमन्त्रेण प्रायश्चित्ती विशुध्यति॥
१८८१(अ) सुवर्णदानं गोदानं भूमिदानं गवाह्निकम्।
विप्रेभ्यः सम्प्रयच्छेत प्रायश्चित्ती विशुध्यति॥
१८८२ बहुनात्र किमुक्तेन तिलहोमो विधीयते।
तिलान् दत्त्वा तिलान् भुक्त्वा कुर्वीताघनिवारणम्॥
१८८३ सम्पादयन्ति यद् विप्राः स्नानं तीर्थफलं तपः।
सम्पादी क्रमते पापं तस्य सम्पद्यते फलम्॥
१८८४ प्रायश्चित्तं समाख्यातं यथोक्तं देवलेन तु।
इतरेषामृषीणां च नान्यथा वाक्यमर्हति॥

# ॥तृतीयं प्रकरणम्॥

## ॥अनुग्रहप्रायश्चित्तम्॥

१८८५ प्रायश्चित्तं यथोद्दिष्टमशक्यं दुर्बलादिषु।
इष्यतेऽनुग्रहस्तेषां लोकसङ्ग्रहकारणात्॥
१८८६ पापानां तारतम्येन विप्राणां गुरुलाघवम्।
एको नार्हति तत्कर्तुमनूचानोऽप्यनुग्रहम्॥
१८८७ धर्मज्ञा बहवो विप्राः कर्तुमर्हन्त्यनुग्रहम्।
सुशान्तानां च विदुषां कलौ सङ्घः प्रशस्यते॥
१८८८ स्नेहाद् वा यदि वा लोभाद् भयादज्ञानतोऽपि वा।
कुर्वन्त्यनुग्रहं ये तु तत्पापं तेषु गच्छति॥
१८८९ शरीरस्यात्यये कार्यः संयमे नियमो द्विजैः।
महतो नोपरोधेन न सुस्थस्य कदाचन॥
१८९० याचितास्तेन ते चापि ब्राह्मणाः पापभीरुणा।
निष्कृतिं व्यवहारार्थं कुर्युस्तस्मै नृपाज्ञया॥
१८९१ स्वयं तु ब्राह्मणा ब्रूयुरल्पदोषेषु निष्कृतिम्।
राजा च ब्राह्मणाश्चैव महत्सु च परीक्षितम्॥
१८९२ परिषद् या ब्राह्मणानां राज्ञां सा द्विगुणा मता॥
१८९३ कृच्छ्राणां दापको राजा निर्दिष्टा धर्मपालकः।
अपराधी प्रयोक्ता च रक्षिता कृच्छ्रपालकः॥

१८९४ कर्तारं देशकालौ च प्रमाणं कारणं क्रियाम्।
अवेक्ष्य च बलं चैव प्रायश्चित्तं विधीयते॥
१८९५ जातिशक्तिगुणापेक्षं सकृद्बुद्धिकृतं तथा।
अनुबन्धादि विज्ञाय प्रायश्चित्तं प्रकल्पयेत्॥
१८९६ प्रकाशे उक्तं यत् किञ्चिद् विंशभागो रहस्यके।
त्रिंशद्भागः षष्टिभागः कल्प्यो जात्याद्यपेक्षया॥
१८९७ विहितं यदकामानां कामात्तु द्विगुणं भवेत्॥
१८९८ स्यात् कामचारवादोक्तिर्महतः पातकाद् ऋते॥
१८९९ विप्रार्धं क्षत्रिये प्रोक्तं तदर्धं वैश्यजातिषु।
तदर्धमेव शूद्राणां प्रायश्चित्तं विदुर्बुधाः॥
१९०० कालातिरेके द्विगुणं प्रायश्चित्तं समाचरेत्।
द्विगुणं राजदण्डं च दत्त्वा शुद्धिमवाप्नुयात्॥
१९०१ प्रख्याप्य पापं वक्तृभ्यस्तोषयित्वा द्विजोत्तमान्।
१९०२ पापकृत् स्वकृतं पापं कृत्स्नमाख्याय संसदि।
ततः स्नात्वैव याचेत निष्कृतिं तस्य कर्मणः॥
१९०३ विचारस्तादृशः कार्यो यथा सर्वे सभासदः।
एकवाक्यतया ब्रूयुस्तथा श्रेयोऽधिगच्छति॥
१९०४ बान्धवोऽपि पृथक् भूत्वा तत्पापं नाप्नुयात् क्वचित्।
पृथग्जनोऽपि संयोगात् भजते तुल्यदोषताम्॥
१९०५ विधेः प्राथमिकादस्मात् द्वितीये द्विगुणं भवेत्।
तृतीये त्रिगुणं प्रोक्तं चतुर्थे नास्ति निष्कृतिः॥
१९०६ अभिसन्धिकृते पापेऽसकृद् वा नेह निष्कृतिः।
अपरे निष्कृतिं प्राहुरभिसन्धिकृतेऽपि च॥
१९०७ यत् स्यादनभिसन्धाय पापं कर्म सकृत् कृतम्।
तस्येयं निष्कृतिर्दृष्टा धर्मविद्भिर्मनीषिभिः॥

# ॥चतुर्थं प्रकरणम्॥

## ॥व्रतानि॥

१००८ प्राजापत्यं तप्तकृच्छ्रं पराकं यावकं तथा।
ततः सान्तपनं कृच्छ्रं महासान्तपनं तथा॥
१००९ कायकृच्छ्रं तथा प्रोक्तमतिकृच्छ्रं विशुद्धिदम्।
उदुम्बरं च पर्णं च फलकृच्छ्रमतः परम्॥
१०१० कृच्छ्रं माहेश्वरं चैव ब्रह्मकृच्छ्रं तथैव च।
धान्यं स्वर्णमयं कृच्छ्रं दश पञ्चैव कीर्तितम्॥

१०११ कन्यापहरणं चैव धेनुभूहरणादिकम्।
मलिनीकरणं चैतत् कृच्छ्रसाध्यं प्रयत्नतः॥
१०१२ चाण्डालीगमनादीनि अपात्रीकरणानि च।
कृच्छ्रैर्विशोधनीयानि विप्रैर्दोषपराङ्मुखैः॥
१०१३ दुरन्नभोजनं चैव दुष्टभक्षणमेव च।
दुष्टशाकादिकं चैव जातिभ्रंशकरं महत्॥
१०१४ एतदतिकृच्छ्रसाध्यं तथा दुर्मरणादिकम्।
प्रकीर्णकं कृच्छ्रसाध्यं गर्भाधानादिकर्मणाम्॥
१०१५ कृच्छ्रमिति प्राजापत्यम्॥
१०१६ अत्र सर्वत्र पञ्चगव्यप्राशनमपि कर्तव्यम्॥

[चान्द्रायणम्।]

१९१७ तिथिवृद्ध्या चरेत् पिण्डान् शुक्ले शिख्यण्डसम्मितान्।
एकैकं ह्रासयेत् पिण्डान् कृच्छ्रं चान्द्रायणं चरेत्॥
१९१८ यथाकथञ्चित् पिण्डानां चत्वारिंशच्छतद्वयम्॥
१९१९ अक्षमात्रतृतीयांशैस्तण्डुलैः पाचयेद् हविः।
तावदन्नं मयूराण्डमिति सन्तो वदन्ति हि॥
१९२० चान्द्रायणं द्विविधम्॥
१९२१ यवमध्यं पिपीलिकामध्यं चेति॥
१९२२ एकग्रासममावास्यादि यवमध्यम्॥
१९२३ पञ्चदशग्रासं पौर्णमास्यादि पिपीलिकामध्यम्॥

[यवमध्यम्।]

१९२४ इदं चान्द्रायणं कृत्वा यवमध्यं सुपावनम्।
ब्रह्महत्यादिभिः पापैर्मुक्तो भवति तत्क्षणात्॥
१९२५ यवमध्यमिदं चान्द्रं कर्तुं यस्तदुपकु(क्र)मेत्।
तस्य पापानि नश्यन्ति किं पुनर्व्रतचारिणाम्॥
१९२६ विष्णुप्रियकरं चैतत् सर्वदुःखप्रणाशनम्।
नारीणां विधवानां च यतीनां ब्रह्मचारिणाम्॥
गृहस्थानां विशेषेण महापातकनाशनम्॥

[पिपीलिकामध्यम्।]

१९२७ पूर्ववत् कृष्णपक्षस्य प्रतिपद्दिवसे व्रती।
प्रातःस्नानं नदीतोये दन्तधावनपूर्वकम्॥

१९२८ कृत्वा धौतं परीधाय सन्ध्यावन्दनमाचरेत्।
ब्रह्मयज्ञादिकान् कृत्वा देवपूजापरायणः॥
१९२९ पठेदुपनिषद्वाक्यं नारायणमथापि वा।
सहस्रनाम विष्णोर्वा गजेन्द्रस्यैव मोक्षणम्॥
१९३० आपन्नारायणधिया यदा मन्दायते रविः।
तदैव देवतापूजां पुरुषसूक्तविधानतः॥
१९३१ कृत्वा पञ्चदशग्रासान् निवेद्य परमात्मने।
ततस्तान् भक्षयेत् पश्चान्मौनव्रतपरायणः॥
१९३२ प्रक्षाल्य पूर्ववत् पाणी गण्डूषादीन् प्रकल्पयेत्।
स्वयमेव पुनः कृत्वा शुद्धिं गोमयवारिणा॥
१९३३ पुनः प्रक्षाल्य तं पाणिं देवं नत्वाऽथ संविशेत्।
पाषण्डादीन् न पश्येच्च न भाषेत कदाचन॥
१९३४ सायं सन्ध्यामुपास्याऽथ सायं होममथाचरेत्।
स्वपेच्च स्थण्डिले देवसमीपे नियतो व्रती॥
१९३५ ततः प्रातः समुत्थाय परेद्युः स्नानमाचरेत्।
पूर्ववन् नियमं कृत्वा भक्षयेदेकह्रासतः॥
१९३६ एकह्रस्व(ह्रास)तया भक्षेत् कवलान् तानशेषतः।
अमायां केवलैकाशी पूर्ववन् नियतो व्रती॥
१९३७ परेद्युः प्रतिपद्दिवसे कृत्वा नियममादरात्।
ग्रासमेकं तदा भुक्त्वा पूर्ववद् विधिपूर्वकम्॥
१९३८ द्वितीयायां द्वयं भक्षेत् तृतीयायां त्रयं तथा।
एकवृद्धितया राजन् यावता पूर्णिमादिनम्॥
१९३९ तावत् पञ्चदशं भुक्त्वा व्रतशेषं समापयेत्।
व्रतान्ते गौः प्रदातव्या व्रतस्य परिपूर्तये॥

१८४० पञ्चगव्यं पिबेत् पश्चान् मन्त्रमध्यमुदाहृतम्।
एतदाचरणेनैव ब्रह्महत्यां व्यपोहति॥
इतराणि च पापानि नश्यन्तीति किमद्भुतम्॥
१८४१ गृहीतेऽस्मिन् व्रते देव पञ्चत्वं यदि मे भवेत्।
तदा भवतु सम्पूर्णं त्वत्प्रसादात् जगद्गुरो॥

[यतिचान्द्रायणम्।]

१८४२ यतिचान्द्रायणं वक्ष्ये सर्वपापप्रणाशनम्।
सर्वपातकशमनमगम्यागमनाशनम्॥

[शिशुचान्द्रायणम्।]

१८४३ शृणु राम महाबाहो सर्वपापहरं परम्।
शिशुचान्द्रायणं नाम सर्वर्षिगणसेवितम्॥
१८४४ पुरा तूद्दालको नाम मातुर्गर्भाद् विनिर्गतः।
नाभिनालमुपादाय स्वाङ्गजौ पर्यटन् महीम्॥
१८४५ गर्भाष्टमे समायाते स्वगोत्रेणाऽऽचरद् व्रतम्।
तदा प्रभृत्यसौ योगी सायाह्ने भैक्ष्यमाचरन्॥
१८४६ श्रोत्रियाणां द्विजातीनां त्रिषु वेश्मसु सञ्चरन्।
कवलत्रयमानीय प्रक्षाल्य शुचिभिर्जलैः॥
१८४७ भागत्रयं तदा कृत्वा भागमेकं हरेर्ददौ।
द्वितीयमग्नौ निक्षिप्य तृतीयं चात्मनि न्यसेत्॥
१८४८ रात्रौ स्वपेत् स्थण्डिलेऽसौ गन्धपुष्पादिवर्जितः।
प्रत्यहं त्वेवमकरोद् यावत् पुत्रसमागमम्॥

१९४९ तदा प्रभृति लोकेऽस्मिन् शिशुचान्द्रायणं स्मृतम्।
कलौ युगे विशेषेण महापातकनाशनम्॥
महापापविशुद्धः स्यात् कृत्वैतद्व्रतमुत्तमम्॥

१९५० मासादौ प्रातिपद्दिवसे प्रातःस्नानं समाचरेत्।
. . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . .

१९५१ पुटे पर्णपुटे वाऽपि अपश्यन् पापिनः खलान्।
श्रोत्रियाणां द्विजातीनां त्रिषु वेश्मसु सञ्चरेत्॥
१९५२ कवलत्रयमानीय प्रक्षाल्य शुचिभिर्जलैः।
भागत्रयं तदा कृत्वा भागमेकं हरौ क्षिपेत्॥
१९५३ द्वितीयमग्नौ निक्षिप्य अवशेषं स्वयं हरेत्।
प्रक्षाल्य पूर्ववद् हस्तौ द्विराचम्य शुचिर्भवेत्॥
१९५४ रात्रौ स्वपेद्धरेरग्रे स्थण्डिले गन्धवर्जितः।
पुनः परेद्युरेवं हि कुर्यात् पापविशुद्धये॥
१९५५ एवं मासव्रतं कृत्वा मासान्ते गौर्यथार्हतः।
देया विप्राय विदुषे पञ्चगव्यं पिबेत् ततः॥
१९५६ एवं कुर्यान्नरो यस्तु सर्वपापैः स मुच्यते।
शिशुचान्द्रायणं सम्यक् कुर्याद् यः पूर्वजः शुचिः॥
सर्वान् कामानवाप्नोति स याति विष्णुमन्दिरम्॥

[महाचान्द्रायणम्।]

१९५७ शृणु राम प्रवक्ष्यामि महाचान्द्रायणं परम्।
ब्रह्महत्यादिपापानां शोधनं सर्वमङ्गलम्॥

१९५८ गुरुद्रोहे च यत् पापं यत् पापं परवञ्चने।
यत्पापं पुत्रहत्यायां यत् पापं पशुमारणे॥
१९५९ पित्रोरन्नपरित्यागे विष्णुद्रोहे च यद् भवेत्।
यत् पापं शिवनिन्दायां यत् पापं चक्रधारिणे॥
यत् पापं शिवनिर्माल्यभक्षणे तस्य धारणे॥
१९६० चाण्डालीगमने पापं यत् पापं विधवागमे।
परस्त्रीषु च यत् पापं यत् पापं परभोजने॥
१९६१ यत् पापं वृषलीसङ्गे यत् पापं कुण्डगोलयोः।
शूद्रापत्युश्च यत् पापं यत् पापं परदारके॥
१९६२ यत् पापं पर्वसंसर्गे यत् पापं धेनुविक्रये।
यत् पापं रजकीसङ्गे यत् पापं यतिनिन्दया॥
१९६३ यत् पापं विप्रनिन्दायां कन्याया दूषणेऽपि च।
एवमादीनि पापानि गुरूणि च लघूनि च॥
१९६४ आर्द्राणि च प्रशुष्काणि यानि पापान्यनेकशः।
तेषां नाशकरं चेदं महाचान्द्रं महाफलम्॥
१९६५ यत् श्रुत्वा मुच्यते पापैर्गुरुभिर्लघुभिस्तथा॥

१९६६ शुक्लप्रतिपदि स्नात्वा पूर्ववच्छुद्धतोयतः।
पूर्ववन्नियमं कृत्वा चतुर्थे काल आगते॥
१९६७ विष्णुपूजापरो भूत्वा पूर्वं सङ्कल्पमाचरेत्।
पूर्ववन् मन्त्रमुच्चार्य निराहारः स्वपेत् तदा॥
१९६८ ततः प्रभात उत्थाय स्नात्वाऽऽचम्य यथाविधि।
पूर्ववन्नित्यकर्माणि समाप्य विधिपूर्वकम्॥
१९६९ चतुर्थकाल आयाते पूर्ववद् देवमर्चयेत्।
तदोपोष्य यथापूर्वं पूर्ववन् नियतः स्वपेत्॥

१९७० एवं कुर्यात् प्रतिदिनं राका यावत् प्रवर्तते।
तत्रापि पूर्ववत् कृत्वा नित्यकर्माणि सर्वशः॥
१९७१ तत्रैव भक्षयेत् पञ्चदश ग्रासान् व्रताप्तये।
तत्रापि हरिसान्निध्ये स्वपेद् गन्धादिवर्जितः॥
१९७२ उपोषणं प्रकर्तव्यममा यावत् प्रवर्तते।
तत्रापि पूर्ववत् पिण्डान् भक्षयेत् पूर्वसङ्ख्यया॥
१९७३ शुक्लप्रतिपदि स्नात्वा गौर्दद्या व्रतपूर्तये।
पञ्चगव्यं पिबेत् पश्चात् महाचान्द्रमुदीरितम्॥
१९७४ अशक्यः सर्वलोकानामत्यागो महत्तरः।
कृते चर्माश्रिताः प्राणाः त्रेतायां कीकसाश्रयाः॥
द्वापरे रक्तमाश्रित्य कलावन्नाश्रिताः सदा॥
१९७५ महाचान्द्रस्य महिमा कथितोऽयं मयाऽनघ।
यत् कृत्वा मुच्यते पापैर्महद्भिरपि पातकैः॥

[प्रसाम्नायः।]

१९७६ अथ वक्ष्यामि राजेन्द्र महापातकनाशनम्।
प्रसाम्नायं हि चान्द्रस्य विष्णुलोकप्रदायकम्॥
१९७७ अशक्तत्वाद् दुर्बलत्वाद् तथाऽऽयुर्नाशहेतुतः।
भक्तिश्रद्धाविहीनत्वात् आलस्यान् नास्तिकादपि॥

१९७८ पुरा देवेन्द्रसदने मेधाः प्राह पुरन्दरम्।
चान्द्रायणेऽशक्तश्चेत् प्रसाम्नायं कुरुष्व वै॥
१९७९ शुक्लप्रतिपदि स्नात्वा नित्यकर्म समाप्य च।
सङ्कल्पं पूर्ववत् कृत्वा करिष्येऽहमिदं व्रतम्॥

१९८० इति सङ्कल्प्य मनसा पूर्ववद्विधिपूर्वकम्।
गावो देयाः प्रयत्नेन पञ्चाशत् स्वर्णपूरणीः॥
१९८१ सवत्सा बहुक्षीरिण्यो विप्रेभ्यो जपपूर्वकम्।
अनेक कृतवान् चात्र शास्त्रमार्गेण धेनुदः॥

[प्राजापत्यम्।]

१९८२ त्रिदिनं च दिवाऽश्नीयात् त्रिदिनं रात्रिभोजनम्।
अयाचितं स्यात् त्रिदिनं निराहारो दिनत्रयम्॥
१९८३ कृच्छ्रमेतद् विजानीयात् गोदानं गव्यभक्षणम्।
ब्रह्महत्यादिपापानामेतत् कृच्छ्रं विशोधनम्॥

[प्रत्याम्नायाः। गोदानम्।]

१९८४ गवामभावे निष्कं स्यात् तदर्धं पादमेव वा।
पादं दरिद्रः कुर्वीत धनिकः पूर्णमाचरेत्॥
अन्यथा तत्फलं नास्ति प्राजापत्यं न सिध्यति॥

[समुद्रगानदीस्नानम्।]

१९८५ भागीरथी च यमुना नर्मदा च सरस्वती।
गोदावरी कृष्णवेणी तुङ्गभद्रा पिनाकिनी॥
१९८६ मलहारी भीमरथी वञ्जुला भवनाशिनी।
अखण्डा चैव कावेरी ताम्रपर्णी महानदी॥
धनुष्कोटिः प्रयागश्च गङ्गासागरसङ्गमः

१९८७ एताः पुण्यतमा नद्यो दर्शनात् पापहारिकाः।
स्पर्शनात् मोक्षदा नृणां स्नाने मुक्तिप्रदाः स्मृताः॥

[द्वादशब्राह्मणभोजनम्।]

१९८८ प्राजापत्यस्य कृच्छ्रस्य प्रत्याम्नायममुं शृणु।
यं कृत्वा मुच्यते पापैर्महद्भिरपि नारद॥

[वेदपारायणम्।]

१९८९ प्राजापत्यस्य कृच्छ्रस्य वेदपारायणं महत्।
प्रत्याम्नायं प्रशंसन्ते शाखामात्रं सहाऽऽरणम्॥
१९९० पारायणेन भगवान् परितुष्टो भवेत् तदा।
फलं सम्पूर्णकृच्छ्रस्य प्रददाति न संशयः॥
१९९१ प्रातःकाले शुचिर्भूत्वा नित्यकर्म समाप्य च।
स्वगृहे देवतागारे नद्यां वा देवतालये॥
१९९२ प्राङ्मुखोदङ्मुखो वापि सङ्कल्पं पूर्ववच्चरेत्।
पारायणादौ प्रणवं कृत्वा पारायणं पठेत्॥
१९९३ दिशश्चानवलोक्यैव असम्भाष्यैव पापिनः।
मौनव्रतं समागम्य पठेद् वेदं शनैः शनैः॥
१९९४ शीघ्रपाठी शिरःकम्पी तथा लिखितपाठकः।
गद्गदी स्वरहीनश्च पञ्चैते पाठकाधमाः॥
१९९५ ततः शनैः शनैर्विद्यामभ्यसेदात्मशुद्धये।
यावत् समाप्तिर्भवति तावत् कृच्छ्रफलं लभेत्॥

१९९६ स्वयमेव पठेद् वेदमुत्तमं परिकीर्तितम्।
प्रत्याम्नायो मध्यमः स्याद् भृतके निष्फलं भवेत्॥

[अयुतगायत्रीजपः]

१९९७ प्राजापत्यस्य कृच्छ्रस्य प्रत्याम्नायो जपो महान्।
अयुतं वेदमातुश्च सर्वपापप्रमोक्षदः॥
१९९८ प्रातःस्नात्वा यथाचारं दन्तधावनपूर्वकम्।
अग्निहोत्रालये देवगृहे वापि नदीतटे॥
१९९९ गोष्ठे वृन्दावने देशे जपेदयुतसङ्ख्यया।
पर्वभिर्जपमालाभिः कुशाग्रग्रन्थिभिरेव वा॥
२००० स्वयं मौनमुपास्थाय दिशश्चानवलोकयन्।
जपेन्महापापजालदहनार्थं दिने दिने।
अव्यग्रचित्तः प्रजपेद् अन्यथा दोषमश्नुते॥

[तिलहोमः]

२००१ प्राजापत्यस्य कृच्छ्रस्य प्रत्याम्नायविधिस्त्वयम्।
होमस्तिलैरकोटैश्च घृताक्तैः पापनाशकृत्॥
२००२ मृत्युञ्जयेन मन्त्रेण न्यासध्यानपुरःसरम्।
मन्त्रान्ते जुहुयाद् वह्नौ आहुतीर्बीजपूरणैः॥
२००३ सहस्रहोमं कृत्वाऽपि पूतो भवति तत्क्षणात्।
स्वयं वा ऋत्विगेको वा तिलहोमसहस्रकम्॥
कुर्यान् मौनेन मेधावी प्राजापत्यफलं लभेत्॥

२००४ अन्नमात्रातिलैर्होमः सर्वपापविनाशकृत्।
प्राजापत्यस्य कृच्छ्रस्य प्रत्याम्नायो महत्तरः॥

[प्राणायामशतद्वयम्]

२००५ प्राजापत्यस्य कृच्छ्रस्य प्रत्याम्नायो महत्तरः।
धर्मशास्त्रोक्तमार्गेण प्राणायामशतद्वयम्॥
२००६ महापातकयुक्तो वा युक्तो वा सर्वपातकैः।
पूतो भवति संसाध्य प्राणायामशतद्वयम्॥
२००७ जपसङ्कल्पहोमेषु सन्ध्यावन्दनकर्मसु।
प्राणायामांश्चरेद् विप्रस्तदाऽऽनन्त्याय कल्पते॥

[तप्तकृच्छ्रम्]

२००८ तप्तक्षीरघृताम्बूनामेकैकं प्रत्यहं पिबेत्।
एकरात्रोपवासश्च तप्तकृच्छ्रस्तु पावनः॥
२००९ वार्युष्णं त्रिदिनं विप्रो दुग्धमुष्णं दिनत्रयम्।
त्रिदिनं घृतमुष्णं च पीत्वा शुद्धिमवाप्नुयात्॥

[प्रत्याम्नायः]

२०१० तप्तकृच्छ्रस्य महतः प्रत्याम्नायो मनीषिभिः।
अशक्तानां च कृपया कर्तुमुक्तः पुराऽनघाः॥
२०११ तमेवाहं ब्रवीम्यद्य शृण्वन्तु द्विजसत्तमाः।
कलौ युगे विशेषेण अन्नसागाल्लयं गताः(तः)॥

[पराककृच्छ्रम्]

२०१२ अथ वक्ष्यामि कृच्छ्रस्य पराकस्य महात्मनः।
सर्वदोषनिवृत्तस्य सर्वशास्त्रानुवर्तिनः॥
२०१३ पराकः कृच्छ्र इत्युक्तो विष्णुना प्रभविष्णुना।
यस्याऽऽचरणमात्रेण सर्वपापैः प्रमुच्यते॥
२०१४ ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः।
सङ्कलीकरणं चैव जातिभ्रंशकरं तथा॥
२०१५ उपपातकमित्येतद् बहुधा परिकीर्तितम्।
तुला हिरण्यगर्भश्च ब्रह्माण्डोऽयं घटस्तथा॥
२०१६ तथा कल्पतरुश्चैव गोसहस्रमनन्तरम्।
हिरण्यकामधेनुश्च हिरण्याश्वस्तथैव च॥
२०१७ हिरण्याश्वरथश्चैव हेमहस्तिरथस्तथा।
पञ्चलाङ्गलकं चैव धरादानमतःपरम्॥
२०१८ विश्वचक्रं कल्पलता सप्तसागरमेव च।
चर्मधेनुश्च महती महाभूतघटस्तथा॥
२०१९ कालपुरुषं कालचक्रं राशिचक्रमनन्तरम्।
कोटिलक्षतिलैर्होमो द्विमुखी सुरभिस्तथा॥
२०२० आर्द्रकृष्णाजिनं चैव शकटं पर्वसङ्गमे।
छागादिपञ्चकं चैव तथैव दशधेनवः॥
२०२१ तथा दशमहादानमञ्चलाः सप्तनामकाः।
रहस्यकृतपापानि ब्रह्महत्यादिकानि च॥
२०२२ पापानां नवधोक्तानामितरेषां मुनीश्वराः।
तुलादिसङ्ग्रहीतॄणां पराकः कृच्छ्रनामकः॥

२०२३ सर्वपापहरो नृणां देवर्षीणां प्रियङ्करः।
सर्वेष्वयं तु कृच्छ्रेषु महान् प्रोक्तः स्वयम्भुवा॥
२०२४ कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिम्।
द्वादशाहोपवासेन पराकः परिकीर्तितः॥

[प्रत्याम्नायः]

२०२५ प्रत्याम्नायं पराकस्य वक्ष्याम्यहमनुत्तमम्।
सर्वपापोपशमनं महापापनिकृन्तनम्॥

[यावकम्]

२०२६ अथातः सम्प्रवक्ष्यामि कृच्छ्रं यावकसंज्ञितम्।
तस्याऽऽचरणमात्रेण ब्रह्महत्या विमुच्यते॥
२०२७ यवानामप्सु साधितानां सप्तरात्रं पक्षं मासं वा प्राशनं यावकः॥
२०२८ एतेन यावकपायसौदकानि व्याख्यातानि॥

[प्रत्याम्नायः]

२०२९ कृच्छ्रस्य यावकस्याऽस्य प्रत्याम्नायमिमं शृणु।
सकृत् कुर्यात् द्विजो यस्तु स सद्यः पापमुक्तिमान्॥
२०३० प्रत्याम्नायं प्रवक्ष्यामि यावकस्य महात्मनः।
सर्वपापप्रशमनं सर्वकृच्छ्रफलं नृणाम्॥
२०३१ गावो दश प्रदातव्याः प्रत्याम्नायप्रकल्पिताः।
सवत्सा दुग्धसम्पन्नाः सुशीलाः समलङ्कृताः॥

२०३२ विप्रेभ्यः प्रतिदातव्या व्रतिना तु पृथक् पृथक्।
पञ्चगव्यं ततः पश्चात् पिबेद् देहविशुद्धये।
एतत् कृच्छ्रस्य तु फलं पावकस्य सुखाप्तये॥

[सान्तपनम्।]

२०३३ कृच्छ्रसान्तपनस्याऽस्य लक्षणं सर्वपापहम्॥
२०३४ प्रत्यहं शास्त्रविधिना द्वादशाहं पयः पिबेत्।
शुद्धिमाप्नोति राजेन्द्र त्यागिनामपि दुर्लभाम्॥
२०३५ पञ्चगव्यं च गोक्षीरं दधि मूत्रं घृतं पयः
प्राश्याऽपरेऽह्न्युपवसेत् कृच्छ्रं सान्तपनं चरेत्॥

[प्रसाम्नायः]

२०३६ प्रसाम्नायं प्रवक्ष्यामि कृच्छ्रस्यैतस्य पापहम्।
सर्वपापोपशमनं धर्मकामार्थसिद्धिदम्॥
२०३७ व्यासेन कथितं पूर्वं कृष्णायाऽमिततेजसे।
परस्वहारिणो ये च परदाररताश्च ये॥
२०३८ मद्यपानरता ये च अगम्यागमिनश्च ये।
असच्छास्त्ररता ये च ये च दुष्टप्रतिग्रहाः॥
२०३९ मिथ्याभिवादिनो ये च ये च मित्रविभेदिनः।
दीपनिर्वापिणो ये च याश्च कुष्माण्डभेदिकाः॥
२०४० दिवा कपित्थच्छायासु रात्रौ चलदलेषु च।
तमालवृक्षच्छायासु रात्रौ वा यदि वा दिवा॥

२०४१ स्वपतां पापनाशाय प्रत्याम्नायो महत्तरः।
सदा निष्ठुरवक्तारः सदा याञ्चापरायणाः॥
२०४२ परान्ननिरता ये च नित्यकर्मविरोधिनः।
तेषामियं विशुद्धिः स्यात् प्रत्याम्नायः परात् परः॥

[महासान्तपनम्।]

२०४३ महासान्तपनं नाम कृच्छ्रं सर्वफलप्रदम्।
पुरा पुरन्दरः साक्षात् गौतमस्य सतीं व्रजन्।
२०४४ तेन पापेन महता स पापमलदूषितः।
वृक्षमूलमुपागम्य वृद्धभावमुपाश्रितः॥
२०४५ तदा प्रसन्नवदनश्चक्रपाणिः सवाहनः।
दृष्ट्वा पुरन्दरं प्राह दयया भक्तवत्सलः॥
२०४६ एतत्पापविशुद्ध्यर्थं महासान्तपनं चर।
गुरुदारांस्तु यो गच्छेत् चाण्डालीगमनं चरेत्॥
२०४७ स्वदारगमनं कुर्याद् भगिनीं यः प्रवर्धयेत्।
चरेद् वा रजकीं ग्रामे ग्रामचाण्डालदारगः॥
२०४८ विप्रश्चाण्डालदारेषु रेतः सिक्त्वा द्विजाधमः।
एतेषां निष्कृती राम महासान्तपनं परम्॥

२०४९ सत्यस्याऽभाषणे पापमसत्यानां च भाषणे।
परदत्तापहारे च स्वदत्तापहरे तथा॥
२०५० असूयानिरति(तिः)र्नैव सदा भैषज्यवर्तनम्।
व्रतकाले श्राद्धकाले पश्येद् देवार्चने यदि॥
पाषण्डं पतितं व्रात्यं तुलास्वकृतनिष्कृतिम्॥

२०५१ पृथक् सान्तपनं द्रव्यैः षडहः सोपवासकः।
सप्ताहेन तु कृच्छ्रोऽयं महासान्तपनः(नं) स्मृतम्॥

[प्रत्याम्नायः।]

२०५२ महासान्तपनकृच्छ्रस्य(च्छ्र प्र)प्रत्याम्नायं शृणुष्व मे।
यदाङ्कचरणमात्रेण विप्रः पापात् प्रमुच्यते॥

[कायकृच्छ्रप्रत्याम्नायः।]

२०५३ शृणु राम प्रवक्ष्यामि कायकृच्छ्रस्य धीमतः।
प्रत्याम्नायं महापुण्यं शृण्वतां पापनाशनम्॥
२०५४ दश गावः प्रदातव्याः सवत्सा भूषिता नृभिः।
पयस्विन्यः सुशीलाश्च स्वर्णशृङ्ग्यो महत्तराः॥
एतस्य कायकृच्छ्रस्य प्रत्याम्नायो मुनीरितः॥

[अतिकृच्छ्रम्।]

२०५५ अथाऽतिकृच्छ्रं वक्ष्यामि सर्वपापोपशान्तये।
सर्वकृच्छ्रव्रतं नृणां शृणु राम प्रयत्नतः॥
२०५६ अतिकृच्छ्रस्य माहात्म्यं वर्णितुं केन शक्यते।
पुरा हि कौशिको नाम ऋषिर्धर्मपरायणः॥
२०५७ वसिष्ठाभजघात्यासीत् कस्मात् कारणतः प्रभो।
तस्य हत्याविनाशार्थं कृच्छ्रमाह प्रजापतिः॥

२०५८ ब्रह्महत्या गुरोर्हत्या भ्रूणहत्या महत्तरा।
कन्याहत्या सतीहत्या तथा हत्या महत्यपि॥
२०५९ वीरहत्या धेनुहत्या गजाश्वमहिषीवधः।
तृणकाष्ठद्रुमच्छेदः शय्यारामादिभेदनम्॥
२०६० तटाककूपकासारभेदनं देववेश्मनाम्।
गृहदाहो द्विजक्षेत्रहरणं पापवर्धनम्॥
२०६१ धान्यारामादिदहनं दाहनं महिषीगवाम्।
शृङ्गलाङ्गूलविच्छेदस्तथा तेषां विमर्दनम्॥
२०६२ शुकचाषभुजङ्गानां मीनहंसशुनामपि।
कुक्कुटानां च काकानां हिंसनं मृगमारणम्॥
२०६३ दारुच्छेदः कपाटस्य पापौघानां विभेदनम्।
दाहनं वनपर्णानामार्द्राणामिह भूमिप॥
२०६४ सर्वासामेव हिंसानामतिकृच्छ्रं विशोधनम्।
सर्वकृच्छ्रप्रदं चैव सर्वोपद्रवनाशनम्॥

[प्रत्याम्नायः।]

२०६५ अतिकृच्छ्रस्य कृच्छ्रस्य प्रत्याम्नायो मनीषिभिः।
प्रोक्तः सर्वहितार्थाय सर्वपापप्रणाशनः॥
२०६६ सङ्कलीकरणानां च कन्याधेन्वादिविक्रये।
तिलतण्डुलधान्यानां फलानां रसविक्रये॥
महापातकभूतानां शोधनं पापनाशनम्॥

[उदुम्बरकृच्छ्रम्।]

२०६७ उदुम्बरस्य कृच्छ्रस्य लक्षणं वच्मि तत्त्वतः।
कृच्छ्रं महत्तरं भूप सर्वपापहरं परम्॥

[प्रत्याम्नायः।]

२०६८ उदुम्बरस्य कृच्छ्रस्य प्रत्याम्नायं परं नृणाम्।
यस्याऽऽचरणमात्रेण सम्पूर्णफलमश्नुते॥

[पर्णकृच्छ्रम्।]

२०६९ पर्णकृच्छ्रं द्विजश्रेष्ठाः शृण्वन्तु परमं शुभम्।
सर्वपापप्रशमनं सर्वदोषोपशान्तिदम्॥
२०७० ब्रह्महा क्षयरोगी स्यात् सुरापी श्यावदन्तकः।
स्वर्णस्तेयी तु कुनखी दुश्चर्मा गुरुतल्पगः॥
२०७१ अन्नहर्ता भवेद् गुल्मी शाकस्तेयी तु दर्दुरः।
स्तेयिनो धान्यराशीनां कण्डूतिः सततं द्विजाः॥
२०७२ ताम्रस्तेयी दीर्घवृषणः प्रमेही पर्वमैथुनी।
शिरोव्रणी स्नानहीनः पित्तवान् त्रपुसीसहा॥
२०७३ गजचर्मा नागहन्ता अश्वहन्ता महाव्रणी।
कण्ठभूषणहारी स्याद् गण्डमाली महान् भुवि॥
रक्तप्रमेही मनुजो पुष्पवस्त्वङ्गनागमः॥
२०७४ भगिनीगमनाद् भूमौ मधुभक्षी भवेन्नरः।
मातुः सपत्नीं भगिनीं गच्छेत् कामातुरो नरः॥

२०७५ स पापमनुभूयाऽऽशु रोगी भूयाद् भगन्दरः।
स्वसारं यः पुमान् गच्छेत् जायते मूत्रकृच्छ्रवान्॥
२०७६ धेनुहन्ता महापापी अर्शोरोगी भवेद् भुवि।
गोवत्सहननात् मर्त्यः स भूयादर्शवान् भुवि॥
२०७७ शिवनिर्माल्यभुक् पापी जायते हिक्कु(क्का)वान् सदा।
अजीर्णरोगी हठकृद् गृहदाही प्रशूलिमान्॥
२०७८ बन्धोर्ग्रहणजाद् दोषात् जायते श्वासकासवान्।
स्रवद्गर्भा भवेत् सा तु बालकं हन्ति या विषैः॥
२०७९ अन्यमालिङ्गते नारी सा स्फोटस्तनी भवेत्।
क्षीरं मुष्णाति या नारी तेन हीनाऽन्यजन्मनि॥
२०८० पतिव्रतापहारी च वृषणव्रणरोगवान्।
विधवासङ्गजाद् दोषात् शिश्नदेशव्रणी भवेत्॥
२०८१ पुष्पस्तेयी वक्रनासः कोशस्तेयी तु पाट(शो)वान्।
गन्धस्तेयी तु दुर्गन्धः कामुकः सन्ततज्वरी॥
२०८२ विवाहविघ्नकृन्मर्त्यो जायते कृष्णबिन्दुकः।
तटाकाराममेदी च सदा दुःखी भवेन्नरः॥
२०८३ इत्येवमादयो दोषा महानरकदा नृणाम्।
एतेषां शोधनार्थाय पर्णकृच्छ्रं समाचरेत्॥
२०८४ महापातकजालानां लघूनां तु द्विजन्मनाम्।
आर्द्राणां चैव शुष्काणां पर्णकृच्छ्रं विशोधनम्॥
२०८५ पर्णोदुम्बरराजीवबिल्वपत्रकुशोदकैः।
प्रत्येकं प्रत्यहं पीतैः पू(प)र्णकृच्छ्र उदाहृतः॥

[प्रत्याम्नायः।]

२०८६ पर्णकृच्छ्रस्य राजर्षे प्रत्याम्नायं वक्ष्यामि ते।
पूर्णपापोपशमनं सर्वोपद्रवनाशनम्॥
२०८७ सर्वकामप्रदं नृणां सर्वकृच्छ्रफलप्रदम्।
पञ्च गावः प्रदातव्याः सालङ्काराः सवत्सकाः॥
२०८८ हेमशृङ्ग्यो रौप्यखुराः कांस्यदोहनसंयुताः।
साधुशीला युवत्यश्च विप्रेभ्यश्च पृथक् पृथक्॥
पर्णकृच्छ्रस्य विप्रर्षे प्रत्याम्नायो महत्तरः॥

[फलकृच्छ्रम्।]

२०८९ फलकृच्छ्रस्य देवर्षे लक्षणं कथ्यते मया।
शृणु ब्रह्ममुने चित्रं सर्वपापप्रणाशनम्॥
२०९० ये मातृघातिनो लोके ये चापि पितृघातकाः।
ये च स्वभ्रातृहन्तारस्तेषामेतद् विनिष्कृतिः॥
२०९१ ये वा गर्भविभेत्तारो ये वा स्वर्गविदायिनः।
ये वा ग्रामादिभेत्तारो ये वा कुटजभेदिनः॥
२०९२ येऽपीह पिशुना लोके ये वा स्युः स्तेयिनः सदा।
ये वाऽऽचारविभेत्तारस्तेषामेतद् विनिष्कृतिः॥
२०९३ याश्च नार्यः पतिं त्यक्त्वा रमन्तेऽन्यान् जनान् सदा।
तासामपीदं शुद्ध्यर्थं पुरा सृष्टं स्वयम्भुवा॥
२०९४ ब्रह्मस्वहारिणो नित्यं नित्यकर्मविभेदिनः।
पितृश्राद्धविभेत्तारस्तेषामेतद् विनिष्कृतिः॥

२०९५ उच्छिष्टभोजिनो ये च ये च मिथ्याभिवादिनः।
ये वै कुणपहन्तारस्तेषामेतद् विनिष्कृतिः॥
२०९६ मद्यपानरता नित्यं नैमित्तिकविभेदिनः।
सर्वश्राद्धविभेत्तारस्तेषामेतद् विनिष्कृतिः॥
२०९७ महापातकयुक्तो वा युक्तो वा सर्वपातकैः।
कृच्छ्रेणैतेन महता सर्वपापैः प्रमुच्यते॥
२०९८ महान्ति पापकर्माणि महापापरताः सदा।
एतेन कृच्छ्रराजेन पुनन्ति सततं द्विजाः॥
२०९९ फलकृच्छ्रं महापापहारि सम्पत् प्रवर्धनम्।
दिने दिने मुनीन्द्राश्च कृत्वैतत् शुद्धिमाप्नुयुः॥
२१०० कायशुद्धिप्रदं कृच्छ्रं सर्वकृच्छ्रफलप्रदम्।
सर्वपापहरं पुण्यं फलकृच्छ्रं महत्तरम्॥

२१०१ प्रातः स्नात्वा शुचिर्भूयात् पूर्ववत् शुद्धिहेतवे।
तावज्जपन् सदा तिष्ठेद् यावदस्तं गतो रविः॥
२१०२ तावद् व्रती स्थिरमनाः नित्यकर्म समापयेत्।
कदलीफलमेकं च विष्णवे तन्निवेदयेत्॥
२१०३ तदेव भक्षयेत् पूर्वं तद्व्रती मौनपूर्वकम्।
एकैकं बीजसम्पूर्णं भक्षयेच्च फलत्रयम्॥
२१०४ एवं द्वादशरात्राणि स्वपेन् नारायणाग्रतः।
गौर्देया विप्रवर्याय ब्रह्मकूर्चं पिबेत् ततः॥
२१०५ फलकृच्छ्रमिदं सर्वं कथितं ब्रह्मणोदितम्।
कृच्छ्रस्यैतस्य माहात्म्यान्नश्यत्येव महद्भयम्॥

[प्रसाम्नायः।]

२१०६ कृच्छ्रस्य तस्य मुनयः प्रसाम्नायं महोन्नतम्।
शृण्वन्तु सर्वपापघ्नं सर्वश्रेयःप्रदं नृणाम्॥
२१०७ पुरा हि गालवो नाम ब्रह्महत्याभयातुरः।
विष्णुं शरणमापेदे सर्वलोकहितैषिणम्॥
२१०८ अनुग्राह्योऽस्मि भगवन् त्वया लोकहितैषिणा।
रक्ष मां देवदेवेश त्वदङ्घ्रिशरणागतम्॥
२१०९ ब्रह्महत्यादिपापानां स्मरणं नाशहेतुकम्।
अतस्त्वद्पादयुगलं द्रक्ष्यामि पुरुषोत्तम॥
२११० विप्रहत्या महत्यस्मिन् मयि दुर्निद(न्द)या प्रभो।
नास्ति निन्दासमं पापं नास्ति क्रोधसमो रिपुः।
नास्ति मोहसमो पाशः न दैवं(देवो) केशवात् परम्(रः)॥
२१११ नास्ति क्रोधसमो मृत्युर्नास्त्यकीर्तिसमं भयम्।
नास्ति कीर्तिसमं सौख्यं तपो नाऽनशनात् परम्॥
२११२ प्रत्यहं त्रिषवणस्नानं कृत्वा मां मनसि स्मरन्।
फलकृच्छ्रं तदा कर्तुमशक्तो यदि गालव॥
२११३ प्रसाम्नायमिदं कृत्वा शुद्धो भवति पातकात्।
गास्तिस्रः साधुसंयुक्ताः धूपदीपनिवेदनैः॥
२११४ परिक्रम्य नमस्कृत्य सवत्साः पयसाऽऽवृताः॥
यो दद्याद् विप्रवर्याय प्रसाम्नायफलप्रदम्॥
सम्पूर्णफलकृच्छ्रस्य अखण्डं लभते फलम्॥
२११५ एवं कुरु त्वं विप्रर्षे पूतो भवसि तत्क्षणात्।
इत्याज्ञप्तस्तदा तेन प्रसाम्नायं तदा चरेत्॥
शुद्धिमाप्नोति महतीं योगिनामपि दुर्लभाम्॥

[माहेश्वरकृच्छ्रम्]

२११६ कृच्छ्रं माहेश्वरं नाम सर्वपापप्रणाशनम्।
पुरा कन्दर्पदहने महान् दोषो भवत्यथ॥
२११७ तद्दोषपरिहारार्थं ब्रह्माणं पर्यपृच्छत।
पञ्चबाणस्य दहनात् महान् दोषो मयि स्थितः॥
तद्दोषपरिहारार्थं निष्कृतिर्देव कथ्यताम्॥
२११८ सर्वदोषप्रशमनं सर्वोपद्रवनाशनम्।
सर्वपुण्यप्रदं नृणां सर्वस्नानफलं महत्॥
२११९ प्रातःस्नात्वा यथाचारं दन्तधावनपूर्वकम्।
शुद्धवस्त्रमतं धृत्वा कृत्वा पुण्ड्रादिकं मुदा॥
२१२० नित्यकर्म समाप्याऽऽदौ सङ्कल्पं पूर्ववच्चरेत्।
तावन्नारायणं स्मृत्वा पूर्ववत् पापमोचनम्॥
२१२१ यदा मन्दायते भानुस्तदा कपालमुद्वहन्।
श्रोत्रियाणां च विप्राणां गृहेषु त्रिषु सङ्ख्यया॥
२१२२ शाकं भिक्षेत् फलं वापि यथासम्भवमादरात्।
आनयित्वाऽथ देवाय समर्प्य विधिपूर्वकम्॥
२१२३ भक्षयेत्तानि सर्वाणि वाग्यतोऽन्नमकुत्सयन्।
हस्तौ पादौ च प्रक्षाल्य द्विराचम्य शुचिस्ततः॥
२१२४ सायङ्काले स्वपेद् देवसमीपे नियतो वसन्।
ततः प्रातः समुत्थाय पूर्ववत् सर्वमाचरेत्॥
२१२५ गौरेका द्विजवर्याय देया कर्मफलाप्तये।
पञ्चगव्यं पिबेत् पश्चात् कृच्छ्रं माहेश्वरं त्विदम्॥

२१२६ कुरु त्वमेवं भगवन् सर्वदोषोपशान्तये।
एवं श्रुत्वा तदा देवो महेशानस्तदाकरोत्॥
एतस्याऽऽचरणेनैव द्विजः पापात् प्रमुच्यते॥

[प्रत्याम्नायः।]

२१२७ माहेश्वरस्य कृच्छ्रस्य प्रत्याम्नायं शृणुष्व मे।
सर्वपापोपशमनं सर्वकृच्छ्रफलप्रदम्॥
२१२८ ब्रह्महत्यादिदमनं सर्वग्रहनिवारणम्।
तुलाप्रतिग्रहीतॄणां पापनाशनमेव च॥
२१२९ सन्ध्यादिनित्यकर्माणि परित्यक्तानि सूरिभिः।
तेषां विशोधने दक्षं सर्वपापहरं नृणाम्॥
२१३० गावो देया द्विजातिभ्यः स्वर्चिता वस्त्रभूषणैः।
हेमघण्टादिभिः शुभैरलङ्कारैरलङ्कृताः॥
२१३१ स्वर्णशृङ्ग्यो रौप्यखुराः कांस्यदोहनसंयुताः।
रुद्रसङ्ख्याः सवत्साश्च पयस्विन्यः पृथक् पृथक्॥
२१३२ प्रत्याम्नाये च धेनूनां रुद्रसङ्ख्याः महत्तराः।
रुद्रकृच्छ्रफलप्राप्त्यै सर्वपापापनुत्तये॥
२१३३ एवं कुर्याद् द्विजो यस्तु प्रत्याम्नायं यथार्हतः।
तस्य सम्पूर्णकृच्छ्रस्य फलं मुनिभिरीरितम्॥

[ब्रह्मकृच्छ्रम्।]

२१३४ शृणुध्वमृषयः सर्वे ब्रह्मकृच्छ्रस्य लक्षणम्।
दुरन्नेनैव यत् पापं यत् पापं दुष्प्रतिग्रहे॥

२१३५ अपेयपाने यत् पापं यत् पापं दुष्टभोजने।
वान्तपानेषु यत्पापं यत् पापं शूद्रभोजने॥
२१३६ संन्यासिनो मठपतेर्भोजने यद्भवेन् नृणाम्।
यत् पापं रजकस्याऽन्ने यत् पापं वृषलभोजने॥
२१३७ यत् पापं पुष्पवत्यन्ने यत् पापं विधवाकृतौ।
अमन्त्रके पैतृकान्ने तथा नारायणे बलौ॥
२१३८ चौले च पैतृके चैव दीक्षितस्यैव भोजने।
दम्पत्योर्यदनूच्छिष्टे तथा सन्न्या(संन्या)सिनो द्विजाः॥
२१३९ प्रेतसंस्थितवीथ्यायां यदान्नभोजने नृप।
सूतकद्वितये चैव तथा दुष्पङ्क्तिभोजने॥
तथैव दुष्टसन्धाने तथा क्रीतान्नभोजने॥
२१४० यत् पापं पर्युषे चैव (यच्च पर्युषिते पापं) तथाम्लस्य च भोजने।
यत् पापं पूतिगन्धे च यत् पापं क्रूरभोजने॥
२१४१ यत् पापमनृते प्रोक्तमौपासनविसर्जने।
एवमादीनि पापानि लघूनि च महान्ति च॥
२१४२ शुष्काण्याद्राणि पापानि मनोवाक्कायकर्मभिः।
सर्वेषां परिनाशाय ब्रह्मकृच्छ्रं प्रकीर्तितम्॥

[प्रत्याम्नायः]

२१४३ शृणु ब्रह्ममुने चित्रं प्रत्याम्नायं प्रजापतेः।
यत् कृत्वा मुच्यते पापैर्महद्भिरुपपातकैः॥
२१४४ आचरेद् ब्रह्मकृच्छ्राख्यं महापातकशोधनम्।
असमर्थः प्रकुर्वीत प्रत्याम्नायं फलाप्तये॥
२१४५ प्रत्याम्नायान् महाकृच्छ्रफलमाप्नोति मानवः॥

२१४६ अष्टौ गावः प्रदातव्याः स्वर्णशृङ्ग्यो पयोन्विताः।
विप्रेभ्यो वेदविद्भ्यश्च पूर्ववत् स्वर्णभूषिताः॥
२१४७ विप्रेभ्यो वेदविद्भ्यश्च प्रदेयास्ताः पृथक् पृथक्।
पयस्विन्यः शीलवत्यः सर्वदोषविमुक्तये॥

[धान्यकृच्छ्रम्।]

२१४८ धान्यकृच्छ्रस्वरूपं च लक्षणं प्रवदामि वः।
सर्वेषामेव कृच्छ्राणामशक्तो धान्यमाचरेत्॥

[सुवर्णकृच्छ्रम्।]

२१४९ ब्रह्महत्यादिपापानामितरेषां मुनीश्वराः।
तुलादिष्विह दानेषु ग्रहीतॄणां विशोधनम्॥
२१५० स्वर्णकृच्छ्रं ब्रह्ममयं ब्रह्मणा परिकीर्तितम्।
पुरा हि जाह्नवीतीरे ऋषिभ्यः पापनाशनम्॥
२१५१ महाप्रभोर्वराहः स्यात् तदर्धं मध्यमस्य च।
तदर्धमितरेषां च ततो न्यूनं न कारयेत्॥

२१५२ एकभक्तेन नक्तेन तथैवायाचितेन तु।
उपवासेन चैकेन पादकृच्छ्र उदाहृतः॥
२१५३ पिण्याकशाकतक्राम्बुसक्तूनां प्रतिवासरम्।
एकरात्रोपवासश्च कृच्छ्रः सौम्यः प्रकीर्तितः॥
२१५४ एषां त्रिरात्रमभ्यासादेकैकस्य यथाक्रमम्।
तुलापुरुष इत्येष ज्ञेयः पञ्चदशाहिकः॥

# ॥पञ्चमं प्रकरणम्॥

## ॥तीर्थयात्रा॥

२१५५ कृत्वा पापमविज्ञातं भ्रूणहत्यादि तत्पुनः।
विनश्यति महायज्ञैरथवा तीर्थचर्यया॥

२१५६ अथ गङ्गा सरस्वती यमुना नर्मदा विपाशा वितस्ता कौशिकी नन्दावरी चन्द्रभागा शरयूः-उत्पलावती सिन्धुः-अर्जुनीया पर्णाशा शोणः-तापी-ऐरावती पाषाणतीर्था गोमती गण्डकी बाहुदा पम्पा देविका गोदावरी कावेरी ताम्रपर्णी-चर्मण्वती वेत्रवती भीमा तुङ्गभद्रा सुचक्षुः अरुणा चेति महानद्यः पुण्यतमाः॥

२१५७ गङ्गाद्वारं कनखलं शौकरं प्रयागो गङ्गासागर इति गङ्गायास्तीर्थानि॥

२१५८ प्लक्षप्रस्रवणं वृद्धकन्याकं सारस्वतमादित्यतीर्थं कौबेरं वैजयन्तं पृथूदकं नैमिषं विनशनं वंशोद्भेदं प्रभासमिति सारस्वतानि॥

२१५९ कावेरीसङ्गमं सरस्वतीसङ्गमं गन्धमादनमिति सामुद्रास्यतीर्थानि पुण्यतमानि॥

२१६० पुष्करमुर्वशी गया गयाशिरः कुरुक्षेत्रं प्रयाग इति क्षेत्राणि॥

२१६१ वाराणसी महाभैरवं देवदारुवनं केदारं मध्यमं रुद्रमहालयं त्रस्तावतरं छगलं विष्णुशिरं (रो) महाकालं कालञ्जरं जम्बूमार्गं चेत्यायतनानि॥

२१६२ हिमवान् सह्यो विन्ध्यो महेन्द्रो हरिश्चन्द्रः शतशृङ्गो देवपर्वतः विन्ध्यपर्वतश्चेति पर्वतानां नामानि॥

२१६३ एवमेतान्यन्यान्यपि क्षेत्राण्यायतनपर्वताश्रमतीर्थानि पुण्यतमानि॥
२१६४ तीर्थमभिगम्य व्रतोपवासनियमयुक्तस्त्र्यहमवगाहमानस्त्रिरात्रमुषित्वा
सर्वपापैः प्रमुच्यते स्वस्तिमांश्च भवति॥
२१६५ तत्र श्लोकौ —
अभिसङ्गम्य तीर्थानि पुण्यान्यायतनानि च।
नरः प्रमुच्यते पापाद् ब्राह्मणाश्च तपस्विनः॥
२१६६ सर्वाः समुद्रगाः पुण्याः सर्वे पुण्या नगोत्तमाः।
सर्वमायतनं पुण्यं सर्वे पुण्या वनाश्रमाः॥

२१६७ अरण्यं देवतास्थानं तीर्थान्यायतनानि च।
तस्मात्तेषु मृता लोके यान्ति लोकान् दिवौकसाम्॥

२१६८ श्रीशैलं काशिकाक्षेत्रं गयाक्षेत्रं महत्तरम्।
प्रयागं यमुनां सिन्धुं गङ्गासागरसङ्गमम्॥
२१६९ तथा सप्तनदीसङ्गं गौतमीं पापहारिणीम्।
कृष्णावेणीं तुङ्गभद्रां हेमकूटं त्रिलोचनम्॥
मार्कण्डेयं सिंहगिरिं तथा धर्मपुरीं स्वयम्॥
२१७० साक्षाद् रामजयावाटीं मल्लिकार्जुनमेव च।
अहोबलं नृसिंहं च तथैव भवनाशिनीम्॥
२१७१ पिनाकिनीं(नं) नदीं(दी)तीरे वैद्यनाथं हरं तथा।
वेङ्कटाद्रिं स्वर्णमुखीं कालहस्तीश्वरं तथा॥
२१७२ साक्षाद् वरदराजं च वरभूतं स्वयम्भुवम्।
एकाम्रं च तथा लिङ्गं सर्वतीर्थमहत्तरम्॥
२१७३ मध्यार्जुनेशं पापघ्नं कुम्भकोणं तदुद्भवम्।
श्रीरङ्गं वा महाक्षेत्रं जम्बूनाथमतः परम्॥

२१७४ कावेरीं पापशमनीं मधुराविषये शृणु।
सुन्दरेशं च तत्पत्नीं तथैवोघवतीं नदीम्॥
२१७५ तथाग्नेयदिशो भागे पर्वतो गन्धमादनः।
रामलिङ्गं धनुष्कोटिं सर्वतीर्थपुरस्कृताम्॥
२१७६ तथैव दर्भशयनं तत्रत्यं च महत्सरः।
ताम्रपर्णीमहाक्षेत्रं तत्रस्था विष्णुदेवता॥
२१७७ अनन्ताख्यं महाक्षेत्रं सुब्रह्मण्यं महत्तरम्।
एतानि पुण्यक्षेत्राणि द्रष्टुः पापहराणि च॥
२१७८ निरोगी (नीरोगो) मुखजो यस्तु एतेषामेकमेव च।
न स्नायाद् वा न पश्येद् वा कोऽन्यस्तस्मादचेतनः॥
२१७९ धर्महीनस्य मर्त्यस्य कर्महीनस्य पापिनः।
अजागलस्तनमिव तस्य जन्म निरर्थकम्॥
२१८० यो मर्त्यो जन्मदिवसात् षष्टिवर्षप्रवर्तनात्।
पुरा न पश्येत् श्रीशैलं तन्मध्ये स तु गर्दभः॥

## [तीर्थधर्माः]

२१८१ मुण्डनं चोपवासश्च सर्वतीर्थेष्वयं विधिः।
वर्जयित्वा कुरुक्षेत्रं विशालां विरजां गयाम्॥
२१८२ तीर्थश्राद्धं प्रकुर्वीत पाकान्नेन विशेषतः।
आमान्नेन हिरण्येन कन्दमूलफलैरपि॥
एषामभावे कुर्याच्च श्राद्धं यवजलेन वा॥
२१८३ व्युत्क्रमात् प्रेतश्राद्धानि यो नरो धर्ममोहितः।
ददाति नरकं याति पितृभिः सह शाश्वतम्॥

२१८४ अनेका मातरो यस्य तीर्थे चापरपा(प)क्षिके।
अन्नदानं पृथक् कुर्यात् पिण्डदानं तु निर्वपेत्॥
२१८५ तर्पणं पितृदेवानां श्राद्धदानं सदक्षिणम्।
तीर्थे तीर्थे च गोदानं नियतः प्राकृतो विधिः॥
२१८६ विशिष्टस्यातलिङ्गेषु वृषदानं विधीयते।
स्नानं विलेपनं पूजां देवतानां समाचरेत्॥
२१८७ संवत्सरं द्विमासोनं पुनस्तीर्थं व्रजेद् यदि।
मुण्डनं चोपवासं च ततो यत्नेन कारयेत्॥
२१८८ ब्राह्मणानां भूमिदानं देवपूजाकराय च।
सर्वत्र देवयात्रायां विधिरेष प्रवर्तते॥
२१८९ तथा पञ्चामृतस्नानं नमस्कारं प्रदक्षिणम्।
कुर्यात् सर्वेषु देवेषु यात्रायाः फलेप्सया॥
२१९० देवानां दर्शनं पुण्यं दर्शनात् स्पर्शनं वरम्।
स्पर्शनादर्चनं श्रेष्ठं घृतस्नानमतः परम्॥
२१९१ अष्टकृत्वो मन्त्रजपः सुप्रभूतसुगन्धिभिः।
प्राहुर्गङ्गाजलैः स्नानं घृतस्नानसमं बुधाः॥
२१९२ एकां चण्ड्या रवेः सप्त तिस्रो दद्याद् विनायके।
चतस्रो विष्णवे देया शिवस्यार्ध(र्धा)प्रदक्षिणा॥
२१९३ शिवं प्रदक्षिणं कुर्वन् सोमसूत्रं न लङ्घयेत्॥
२१९४ अग्रे पृष्ठे वामभागे समीपे गर्भमन्दिरे।
जपहोमनमस्कारान् न कुर्याद् देवतालये॥
२१९५ अग्रे मृत्युमवाप्नोति पृष्ठे त्वपचयः स्मृतः।
वामभागे भवेन्नाशो दक्षिणे सर्वकामदः॥
२१९६ यशः पशुपतेरग्रे दण्डवत् पततो भुवि।
पतन्ति पातकाः सर्वे नोत्तिष्ठन्ति तदा सह॥

२११७ यत्र स्थाने तु यत्तीर्थं नदी पुण्यतमाऽथ वा।
तां ध्यायेन्मनसा वापि अन्यत्रेच्छाविचिन्तनम्॥
२११८ अर्घ्यद्रव्यविशेषेण गङ्गातोयेन यः सकृत्।
मागधप्रस्थमात्रेण ताम्रपात्रस्थितेन च॥
२११९ भानवेऽर्घ्यं प्रदद्यात्तु स्वकीयपितृभिः सह।
पुत्रपौत्रैश्च संयुक्तः स्वर्गलोके महीयते॥

# ॥षष्ठं प्रकरणम्॥

# ॥निःश्रेयसम्॥

२२०० अथातो धर्मवर्जितत्वात् न तिर्यग्योन्यां पुरुषार्थोपदेशः॥
२२०१ देवमनुष्ययोर्द्विविधः पुरुषार्थः॥
२२०२ अभ्युदयो निःश्रेयसमिति॥
२२०३ तयोरभ्युदयः पूर्वोक्तः॥
२२०४ द्विविधं निःश्रेयसम्॥
२२०५ साङ्ख्ययोगाविति॥
२२०६ पञ्चविंशतितत्त्वज्ञानं साङ्ख्यम्॥
२२०७ विषयेभ्यो निवर्त्याभिप्रेतेऽर्थे मनसोऽवस्थापनं योगः॥
२२०८ उभयत्राऽपवर्गः फलम्॥
२२०९ जन्ममरणदुःखयोरत्यन्ताभावोऽपवर्गः॥
२२१० एतौ साङ्ख्ययोगौ आन्वीक्षिकत्वे यैर्युक्तितः समयतश्च पूर्वप्रणीतानि विशालानि
गम्भीराणि तन्त्राणीह सङ्क्षिप्योद्देशतो वक्ष्यन्ते॥
२२११ तत्र साङ्ख्यानामेव मूलप्रकृतिः॥
२२१२ सप्त प्रकृतिविकृतयः॥
२२१३ महदहङ्कारौ॥
२२१४ पञ्च तन्मात्राणि॥
२२१५ षोडश विकाराः॥

२२१६ पञ्चपञ्चेन्द्रियाणि॥
२२१७ अर्थाश्च पञ्चभूतविशेषाः॥
२२१८ त्रयोदश करणानि॥
२२१९ तेषाँ त्रीण्यन्तःकरणानि॥
२२२० दश बहिष्करणानि॥
२२२१ चतस्रश्च तस्रोः मातृजाः पितृजाश्च कोशाः॥
२२२२ पञ्च वायुविशेषाः॥
२२२३ त्रयो गुणाः॥
२२२४ त्रिविधो बन्धः॥
२२२५ त्रयो बन्धहेतवः॥
२२२६ द्वौ बन्धरागौ॥
२२२७ त्रीणि प्रमाणानि॥
२२२८ त्रिविधं दुःखम्॥
२२२९ चतुर्विधः प्रत्ययव(स)र्गः॥
२२३० तथा द्विविधः सर्गः॥
२२३१ तथा विपर्ययः पञ्चविधः॥
२२३२ अशक्तिरष्टाविंशतिविधा॥
२२३३ तुष्टिर्नवविधा॥
२२३४ सिद्धिरष्टविधा॥
२२३५ इति प्रत्ययभेदाः पञ्चाशत्॥
२२३६ अस्तित्वमेकत्वमथार्थवत्त्वं
परार्थमन्यत्वमथो निवृत्तिः।
योगो वियोगो बहवः पुमांसः
स्थितिः शरीरस्य च शेषवृत्तिः॥
२२३७ इति दश मूलिकार्थाः॥

२२३८ अथ मूलप्रकृतिरव्यक्तम्॥

२२३९ महानहङ्कारः पञ्च तन्मात्राणीति प्रकृतिविकृतयः॥

२२४० शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्रमिति तन्मात्राणि॥

२२४१ द्विविधानीन्द्रियाणि मनो भूतविशेषाश्च विकाराः॥

२२४२ चक्षुःश्रोत्रघ्राणजिह्वात्वचो बुद्धीन्द्रियाणि॥

२२४३ रूपशब्दगन्धरसस्पर्शास्तेषामर्थाः॥

२२४४ वाग्पाणिपादपायूपस्थाः कर्मेन्द्रियाणि॥

२२४५ भाषणं क्रिया गमनमुत्सर्ग आनन्द एषां कर्माणि॥

२२४६ वाय्वग्न्यबाकाशपृथिव्यो भूतविशेषाः॥

२२४७ दशेन्द्रियाणि बुद्ध्यहङ्कारमनांसि च करणानि॥

२२४८ तेषां मनोबुद्ध्यहङ्काराश्चान्तःकरणानि॥

२२४९ दश बाह्यकरणानीन्द्रियाणि च॥

२२५० गुणसाम्यलक्षणमव्यक्तं प्रधानं प्रकृतिर्विधानमित्यनर्थान्तरम्॥

२२५१ अध्यवसायलक्षणो महान् बुद्धिर्मतिरुपलब्धिरित्यनर्थान्तरम्॥

२२५२ अभिमानलक्षणोऽहङ्कारो वैकारिकोऽहङ्कारोऽभिमान इत्यनर्थान्तरम्॥

२२५३ सत्तामात्रलक्षणानि तन्मात्राणि॥

२२५४ स्वानुग्रहलक्षणानीन्द्रियाणि॥

२२५५ अक्षाणीन्द्रियाण्युच्यन्ते॥

२२५६ सङ्कल्पलक्षणं मनः॥

२२५७ इन्द्रियार्थलक्षणा विषयविशेषा भूतानीत्यनर्थान्तरम्॥

२२५८ सर्वपूर्विका प्रकृतिः॥

२२५९ प्रकृतेर्महानुत्पद्यते॥

२२६० महतोऽहङ्कारः॥

२२६१ अहङ्कारात् तन्मात्राणीन्द्रियाणि च॥

२२६२ तन्मात्रेभ्यो विशेषा इत्युत्पत्तिक्रमः॥

२२६३ यो यस्मादुत्पद्यते, स तस्मिंल्लीयत इति वा(चा)ऽप्ययं(य)क्रमः॥

२२६४ तेषां त्रिविधो मूर्तिविशेषः॥

२२६५ द्युमत्, सुगन्ध्यनिष्पाद्यमनाविलमनिमिषमस्वेदं, क्षुत्पिपासानिद्रालस्यवर्जितं,
यथेष्टाकृतिबलसञ्ज्ञहनमूर्जस्वि, निर्मलं, परमपुष्कलं(ल)सुकृतनिमित्तं,
देवताशरीरम्॥

२२६६ अनित्यमशुभं, सर्वरोगायतनं, दुःखभाजनमनेकबाधमस्थिसङ्घातशिरास्नायुनद्धं,
मांसावलिप्तं, त्वक्प्रतिच्छन्नम् - अन्नरसनानाशोणितमेदोमांसमज्जारेतःपित्ता-
-निलश्लेष्मान्त्रगुदवस्तियकृत्प्लीहक्लेदस्वेदमूत्रपुरीषकृमिपूर्णं, नवच्छिद्रं,
सन्तताश्रा(स्रा)वं, केशरोमनखपर्यन्तं, दुर्गन्धि, नित्यसंस्कार्यं,
जरामरणवशमिति मानुषशरीरम्॥

२२६७ सन्ततोद्विग्नमसंस्कारं, विधृतनिष्पदं(न्दं), क्षुत्पिपासावशं, मूढेन्द्रियगोचरं,
दुष्कृतायतनमज्ञानमकर्मण्यमिति तिर्यग्योनिशरीरम्॥

२२६८ इच्छा द्वेषः सुखं दुःखं क्षुत्तृष्णा चेष्टितं भयम्।
उत्पत्तिर्मरणं चेति सामान्यं सर्वदेहिनाम्॥

२२६९ अवश्यं प्राणिनः सर्वे रमन्ते स्वासु योनिषु।
असत्समाविशिष्टानां न जातिरिति निश्चयः॥

२२७० शय्या चङ्क्रमणं स्थानमासनं च यथाक्रमम्।
स्वजातिं न परित्यक्तुमिच्छन्ति प्राणिनः क्वचित्॥

२२७१ देही देहं परित्यज्य नेन्द्रस्थानमपीहते।
तस्मात् कीटोऽपि जन्तूनां स्वजात्या रमते भृशम्॥

२२७२ अमेध्यमतिदुर्गन्धि निःसारं दुःखभाजनम्।
अध्रुवं बहुदुःखं च शरीरं गर्भवासिनाम्॥

२२७३ विण्मूत्रकृमिसम्पूर्णं रोगायतनमातुरम्।
शरीरं यापयन्तीह सदा स्नानाशनादयः॥
२२७४ अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनम्।
चर्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः॥
२२७५ जराशोकसमाविष्टं रोगायतनमातुरम्।
रजस्वलमनित्यं च भूतावासमिमं त्यजेत्॥

२२७६ प्रकृतिबन्धो वैकारिकबन्धो दक्षिणाबन्ध इति बन्धत्रयी॥
२२७७ तत्राऽव्यक्तादिभिरष्टाभिर्बन्धः प्रकृतिबन्धः॥
२२७८ इन्द्रियैरिन्द्रियार्थेषु बन्धो वैकारिकबन्धः॥
२२७९ इष्टापूर्तादिभिर्बन्धो दक्षिणाबन्धः॥
२२८० तत्र प्रकृतिषु बन्धो देवतानाम्॥
२२८१ दक्षिणाभिराश्रमिणाम्॥
२२८२ वैकारैरन्येषाम्॥
२२८३ धर्मोऽज्ञाना[दी]नि च बन्धहेतवः॥

२२८४ अथातः पापदोषान् मनोवाक्शरीरजान् आख्यास्यामः॥
२२८५ तत्र मोहरागद्वेषमानलोभमदशोकममत्वाऽहङ्कारभयहर्षमोघाचिन्ताश्चेति
द्वादश मानसाः॥
२२८६ तेषां च त्रिविधो मोहः सम्भवः सर्वपाप्मनाम्।
अज्ञानं संशयज्ञानं मिथ्याज्ञानमिति त्रिकम्॥
२२८७ विज्ञानं सर्वविद्यानामर्थानां स्वयमूहनम्।
दोषैरधर्षणं चेति ज्ञानमज्ञानमन्यथा॥
२२८८ अश्रेयःश्रेयसोर्मध्ये भ्रमणं संशयो भवेत्।
मिथ्याज्ञानमिति प्राहुरहिते हितदर्शनम्॥

२२८९ भवत्यधर्मादज्ञानमविद्यातश्च संशयः।
उभाभ्यामन्यथाज्ञानं पापिष्ठमुपजायते॥

२२९० अज्ञानाद् दुःखसम्प्राप्तिः संशयाद् बध्यते पुनः।
मिथ्याज्ञानात् पतत्येव मूढस्तामिस्रयोनिषु॥

२२९१ आवृत्ता विषयाः सर्वेऽधर्मदोषैर्यथा तनुः(यथातनु)।
गुणतो हृदि तान् कृत्वा रागो रागस्य लक्षणम्॥

२२९२ असन्निकर्षादज्ञानात् सङ्कल्पादभिमानतः।
सुखाच्च जायते रागो विषयेषु शरीरिणाम्॥

२२९३ ज्ञानाद् द्वेषादसामर्थ्यात् क्लेशादन्यप्रसङ्गतः।
वियोगात् कामतः शोकाद् धर्माच्च विनिवर्तते॥

२२९४ निवर्तते चेद् रागोऽयं पुंसो द्वेषादिहेतुभिः।
भूयोऽप्युत्पद्यते सङ्गात् ज्ञानान्नश्यति केवलम्॥

२२९५ अतिप्रसक्तो भोगेषु रागो भवति दोषकृत्।
परस्त्रीषु परस्वेषु किञ्चित् प्रार्थनयापि वा॥

२२९६ रोषोऽमर्षोऽभ्यसूया च द्रोहो मिथ्यावितर्कितम्।
दुःसाहं चेति तत्त्वज्ञैर्द्वेषः षोढाऽभिधीयते॥

२२९७ य ऊष्मा हृदये जन्तोः समुत्तिष्ठति वैकृतः।
पराजिघृक्षचिकीर्षायां स रोष इति संज्ञितः॥

२२९८ पराभवसमुत्थेन दोषेणैवाभिचोदितः।
किञ्चिद् दृष्ट्वैव यो द्वेषस्तदमर्षस्य लक्षणम्॥

२२९९ परस्य शुद्धान् दृष्ट्वा तु स्वगुणाभ्यधिकान् गुणान्।
नाभिनन्दति यो द्वेषात् साऽभ्यसूयेत्युदाहृता॥

२३०० सुहृदामपि यो नित्यमर्थानुपजिघांसति।
असौहृद्यमतिः पापस्तदाहुर्द्रोहलक्षणम्॥

२३०१ यः साधून् अपदोषांश्च मन्यते दोषकारिणः।
मिथ्यावितर्कितं चेति तदाहुर्भावदोषजम्॥
२३०२ द्वेषात् लोभाच्च सङ्कल्पाच्चिन्तनं पापकर्मणाम्।
दुःखार्हमिति विज्ञेयं पूर्वदुष्कृतसम्भवम्॥
२३०३ दुःखान्मिथ्याभिलाषाच्च द्वेषोऽयं षड्विधो भवेत्।
ज्ञानात् कालात्ययात् धर्मात् प्रीतेश्च विनिवर्तते॥
२३०४ अतत्त्वग्रहणं तापो वेपथुर्ग्लानिसम्भवः।
स्वेदोऽक्षिरोगः पारुष्यं श्वासस्तु द्वेषदोषजाः॥
२३०५ सर्वत्रोत्कृष्टमात्मानं सर्वेभ्यो योऽभिमन्यते।
स मान इति विज्ञेयो यथेष्टस्पष्टवाक्क्रियः॥
२३०६ नरस्यात्माभिमानेन या उत्कृष्टिर्न शोभते।
उत्कृष्टिर्याचिता प्राहुरुत्कृष्टिः साऽवमानतः॥
२३०७ परार्थं परभोगांश्च परसामृद्ध्यमेव च।
दृष्ट्वा श्रुत्वा च या तृष्णा जायते लोभ एव सः॥
२३०८ अलोभात् मूलतर्काच्च पिपासापरिवर्धितः।
अनर्थेष्वेव संमोह्य लोभः पचति दुर्नरम्॥
२३०९ नास्ति तृष्णासमं दुःखं नास्ति त्यागसमं सुखम्।
तस्माच्च लोभसञ्जातां तृष्णां विद्वान् परित्यजेत्॥
२३१० प्राप्याऽपि मेदिनीं कृत्स्नां तृष्णा नैवोपशाम्यति।
विवर्धते हि भूयोऽपि हविषेव विभावसुः॥
२३११ दुःखादित्वाद् दुरन्तत्वाद् दुष्पूरत्वादतृप्तितः।
पश्चाच्छोकावहत्वाच्च न काचिच्छ्रेयसी तृषा॥
२३१२ कुलबुद्धिवपुर्विद्यावित्तैश्वर्यविभूतिभिः।
स्वैरेतैर्बाधते योऽन्यान् तन्मदस्येह लक्षणम्॥

२३१३ देवासुरमनुष्याणामुत्सिक्ता मदहेतवः।
मदेनैव विनेशुस्ते तस्मात् त्याज्यो मदो बुधैः॥
२३१४ हर्षोत्सेकावलेपाश्च दम्भो दर्पोऽथ गर्विता।
अन्येऽपि तद्विधा भावास्ते मदस्य विकल्पजाः॥
२३१५ अनिष्टयोगजाद् द्वेषात् स्नेहादिष्टवियोगजात्।
क्लेशाद् वा हृदि यद् दुःखं स शोक इति पठ्यते॥
२३१६ अनित्याः सर्वभावाश्चेत् शोकस्तत्र निरर्थकः।
अथवा यदि नित्याः स्युः कुतः शोकः प्रवर्तते॥
२३१७ नैव (वं) हि शोचेत् सत्त्वस्थस्तामसो वाऽपि केवलम्।
शोकाद् दुःखमवाप्नोति समासेनेह राजसः॥
२३१८ इदं ममेति यत् स्वाम्यमात्मनोऽर्थेषु मन्यते।
अजानंस्तदनित्यत्वं ममत्वमिति तद्विदुः॥
२३१९ अहमित्यभिमानेन यः क्रियासु प्रवर्तते।
कार्यकारणयुक्तासु तदहङ्कारलक्षणम्॥
२३२० अहङ्कारममत्वाभ्यां बध्यन्ते सर्वदेहिनः।
संसारविनियोगेषु ताभ्यां मुक्तस्तु मुच्यते॥
२३२१ आत्मबाधाकरं श्रुत्वा दृष्ट्वा वा प्रत्युपस्थितम्।
उद्वेगो जायते यस्तु हृदये तद्भयं स्मृतम्॥
२३२२ तावद् भयेन भेतव्यं यावद्भयमनागतम्।
आगतं तु भयं दृष्ट्वा प्रहर्तव्यमभीतवत्॥
२३२३ भवितव्यं भवत्येव नास्ति कर्मव्यतिक्रमः।
इत्येवं दृष्टतत्त्वानां न क्वचिज्जायते भयम्॥
२३२४ आत्मनोऽभ्युदयं दृष्ट्वा परस्य व्यसनानि वा।
आनन्दो मानसो जन्तोर्हर्ष इत्यभिधीयते॥

२३२५ सर्वद्रव्येष्वनित्येषु क्षणिकेषु सुखेषु च।
न हर्षस्याऽवकाशोऽस्ति विमृश्य यदि पश्यति॥
२३२६ माध्यस्थ्यमपि दोषाय परेषां व्यसनागमे।
किं पुनर्मूढभावेन प्रमोदः परविद्रवे॥
२३२७ यो वृथा चिन्तयेदर्थान् मनसा ह्यपरस्परान्।
मोघचिन्तेति तामाहुर्धर्मकर्मोपघातिनीम्॥
२३२८ भोगैश्वर्यधनादीनि लोभाद् यः संस्मरेद् वृथा।
स मोघचिन्तयात्मानं हन्ति बुद्धिं च कर्म च॥
२३२९ तस्माद् विदूरगां चिन्तां त्यक्त्वा शोकं च कर्मजम्।
आरभेत शुभं कर्म धियं प्राप्तुं च सर्वशः।
२३३० रागसङ्कल्पजान् ग्रन्थीन् हृदये सुदृढार्पितान्।
उच्छिद्य तांस्तु मेधावी तत्त्वज्ञानासिनाऽद्भुतम्॥
२३३१ आत्मदोषक्षयोपायमनित्यामेध्यतां तनोः।
हितं च सर्वभूतानां चिन्तयेन्मनसाऽसकृत्॥
२३३२ एते मनोभवा दोषा द्वादशाऽशिवहेतवः।
मोहादयः समाख्याता देवासुरनृमोहनाः॥
२३३३ सत्संयोगान्मनोगुप्तेर्ज्ञानधर्मप्रसङ्गतः।
त्यागाच्च व्यसनादीनां हानिं गच्छति मानसम्॥

---

२३३४ अप्रकाशकरो बुद्धिं तमसाऽऽवृत्य सर्वशः।
प्रथमं जायते मोहो देहिनां हृदि पाप्मजः॥
२३३५ मोहादुत्पद्यते रागो रागाद् द्वेषः प्रजायते।
त्रिभिरेतैर्भवत्येव पापं शारीरवाङ्मयम्॥
२३३६ तस्माद् गरीयः सर्वेषु मानसेष्वपि च त्रयम्।
सर्वान् दोषान् परित्यक्तुं त्रीनेतान् प्रथमं त्यजेत्॥

२३३७ ततः परुषवचनमपवादः पैशुन्यमनृतं वृथालापो निष्ठुरमिति वाङ्मयाः
षट्॥
२३३८ परेषां देशजातिकुलविद्याशिल्परूपवृत्ताचारपरिच्छदशरीरकर्माजीवानां
तत्प्रत्यक्षं दोषवचनं परुषम्॥
२३३९ यच्चान्यत् क्रोधसन्तापत्राससञ्जननं वचः।
परुषं तच्च विज्ञेयं तथान्यच्च तथाविधम्॥
२३४० चक्षुष्मानिति लुप्ताक्षं चाण्डालं ब्राह्मणेति च।
प्रशंसानिन्दनं द्वेषात् परुषात्तद् विशिष्यते॥
२३४१ वृषलं वृषलेत्युक्त्वा पतितं पतितेति च।
सत्येनापि च दोषः स्यात् मिथ्या द्विगुणभाग् भवेत्॥
२३४२ तेषामेव परुषवचनानां परोक्षमुदाहरणमपवादः॥
२३४३ गुरुनृपतिबन्धुभर्तृमित्रभृत्यसकाशेऽर्थोपघातार्थं दोषोपाख्यानं पैशुन्यम्॥
२३४४ अनृतं द्विविधम्॥
२३४५ असत्यं विसंवादश्चेति॥
२३४६ तत्र दृष्टश्रुतानुमितानामन्यथावचनमसत्यम्॥
२३४७ प्रागभ्युपगतानामसङ्कीर्तनं विसंवादः॥
२३४८ रागाद् द्वेषाद् भयाल्लोभाद् दाक्षिण्याच्छङ्कया ह्रिया।
दम्भात् प्रमादतश्चापि नरस्योत्पद्यतेऽनृतम्॥
२३४९ परप्राणोपघातार्थे परद्रव्यापहारतः।
विशिष्टोऽनृतवादस्तु न वृथा कथनादिषु॥
२३५० तस्मादनृतहेतूंस्तान्नात्मन्युत्पादयेत् क्वचित्।
उत्पन्नान् वा प्रशमयेत् कारणैस्तद्विघातिभिः॥
२३५१ विवाहे ब्राह्मणस्यार्थे प्राणिनां जीविताय वा।
आत्मनः प्राणहेतोर्वा न सीदेदनृतं वदन्॥

२३५२ देशराजप्रवादाच्च परार्थपरिकल्पनात्।
नर्महासप्रसङ्गाच्च विज्ञेयं व्यर्थभाषणम्॥
२३५३ गुह्याङ्गाङ्गमैथुनसंज्ञानां वचनं निष्ठुरं विदुः।
यदन्यद् वा वचो नीचं स्त्रीपुंसोर्मैथुनाश्रयम्॥
२३५४ इत्येवं षड्विकल्पस्य दुष्टवाक्यस्य भाषणम्।
इह चामुत्र च क्रूरमनर्थमधिगच्छति॥
२३५५ हिताहितं मनुष्याणां केवलं वचसि स्थितम्।
तस्माद् संयोजयेद् वाचमप्रमत्तः परीक्ष्य च॥
२३५६ दुश्चिकित्स्यतमं पश्चाद् दुरुक्तं हि वचो भवेत्।
क्षिप्रं विनिपतेच्चापि वचनं दोषसंहितम्॥

२३५७ ततो हिंसाऽपचारः स्तेयमर्थदूषणमिति चतुर्विधाः शरीरजाः॥
२३५८ तत्र दशविधा हिंसा॥
२३५९ उद्वेगजननं, सन्तापजननं, रुजाकरणं, शोणितोत्पादनं, पैशुन्यकरणं, सुखापहरणमतिक्रमः, संरोधो, हितप्रतिषेधो, वध इति॥
२३६० कायक्लेशं मनोदुःखं वधं वा प्राणिनां पुनः।
यत्र वर्धयति द्वेषात् सा हिंसेति समासतः॥
२३६१ अगम्यागमनमपचारः॥
२३६२ परभार्या वर्णोत्तमा स्वसा दुहिता सगोत्रा चण्डाली, पतिता प्रव्रजिता तिर्यग्योन्यश्चागम्याः॥
२३६३ गम्यानामपि कन्यानां दूषणं पापमुच्यते।
पुनस्तां यदि गृह्णाति गान्धर्वसमयो भवेत्॥
२३६४ ततः स्थूलमध्यक्षुद्राणां त्रिविधानां पदार्थानां प्रसह्य तूष्णीं वा प्रच्छन्नं वा हरणं स्तेयम्॥
२३६५ रत्नक्षेत्रवेश्महेमरूप्याभरणादीनि स्थूलानि॥

२३६६ चतुष्पदद्विपदधान्यवस्त्रलोहकार्षापणोपकरणादीनि मध्यानि॥
२३६७ दन्तशृङ्गदारुचर्मपाषाणमृण्मयादीनि क्षुद्राणि॥
२३६८ अस्तेयमग्नये काष्ठमस्तेयं पशवे तृणम्।
अस्तेयं फलमारण्यमस्तेयं पार्थिवं जलम्॥
२३६९ वेश्मक्षेत्रशस्यदहनं सेतुभेदनमाजीवोपघातनं कृतप्रणाशनम्॥
२३७० कृतप्रणाशनं द्रव्यापध्वंसजं-चार्थदूषणमित्येवम्॥
२३७१ कृत्वाव[नि]र्थजातानि आनुपूर्व्या स्वलक्षणैः।
आख्यातानि विशेषेण पापानि परिशेषतः॥

२३७२ शास्त्रार्थस्य(स्या)ज्ञानं, शास्त्रार्थे संशयः, अधर्मे धर्मबुद्धिरिति मोहलक्षणम्॥
२३७३ तस्य शास्त्रार्थज्ञानं निवर्तकम्॥
२३७४ तदुपायः शास्त्रावेक्षणम्॥
२३७५ रागद्वेषमोहाः कषाया उच्यन्ते॥
२३७६ तेषां यमनियमलक्षणेन तपसा पञ्चविधेन तत्त्वज्ञानेन चाऽपकर्षणं कषायपाचनम्॥
२३७७ यूकामशकदंशादीन् खादतश्चात्मनस्तनुम्।
पुत्रवत् परिरक्षन्ति ते नराः स्वर्गगामिनः॥
२३७८ अथ तपोविधिं व्याख्यास्यामः॥
२३७९ तद्यथा-व्रतोपवासनियमैः शरीरोत्तापनं तपः॥
२३८० तत्र ब्रह्मचर्यं सत्यवचनं मधुमांसवर्जनं मौनमयाचनमृतुकालाभिगमन-
मित्येवमादीनि व्रतानि॥
२३८१ अनशनमुपवासः॥
२३८२ स्वाध्यायशीलत्वम्॥
२३८३ मातापितृगोब्राह्मणशुश्रूषा॥
२३८४ पुण्यक्षेत्राभिगमनम्॥
२३८५ तीर्थावगाहनम्॥

२३८६ शीतोष्णवर्षातपावस्थायानामप्रतीकारः॥
२३८७ कण्टकशर्करादर्भदारुफलवल्कलजसिकताभूमिशयनम्॥
२३८८ हेमन्तशिशिरयोरार्द्रपटप्रावरणम्॥
२३८९ वर्षासु जलशय्या॥
२३९० ग्रीष्मवसन्तयोः पञ्चाग्निमध्याधिष्ठानेन दिवसावस्थानम्॥
२३९१ गुडलवणगोरसस्नेहधान्यादीनां स्वादूनामनुपभोजनम्॥
२३९२ फलमूलशाकपुष्पकपिण्याकभोजनम्॥
२३९३ इति नियमाः॥
२३९४ निजवर्णाश्रमविहितधर्मानुष्ठानं तपः॥
२३९५ त्रिविधः प्राणायामः॥
२३९६ कुम्भो रेचनं पूरणमिति॥
२३९७ निश्वासनिरोधः कुम्भः॥
२३९८ अजस्रनिश्वासो रेचनम्॥
२३९९ निश्वासाध्मानं पूरणमिति॥
२४०० स पुनरेकद्वित्रिभिरुद्वातैर्मृदुर्मन्दस्तीक्ष्णो वा भवति॥
२४०१ प्राणापानव्यानोदानसमानानां सकृदुद्गमनं मूर्धानमाहत्य निवृत्ति-
-श्चोद्वातः॥
२४०२ तत्र ऊर्ध्वं ~~नाभेर्~~गतो रेचनोच्छ्वासक्षरणोद्धारकर्मा प्राणः॥
२४०३ अधो नाभेरुत्सर्गानन्दकर्माऽपानः॥
२४०४ शाखासम्बन्धिस्कन्धाविष्टः प्रसारणाक्षेपणाकुञ्चनभ्रमणरेचनवान-
गमनकर्मा व्यानः॥
२४०५ बाहूरुग्रीवाचक्षुःपार्श्वगतः चेष्टाविक्रमबलाधानकर्मोदानः॥
२४०६ श्रोत्रहृदयनाभिगतः सर्वकर्मा स्यन्दनावबोधनानां समायतत इति
समानः॥

२४०७ ग्लानो विवित्सः(त्सुः) सुषुप्सुरुद्विग्नः क्षुधितो व्याधितः शीतोष्णार्दितः सम्प्राप्तवेगो वा प्राणायामं न युञ्जीत॥

२४०८ अणुत्वाच्चापल्याल्लाघवाद् बलवत्त्वाद् वा योगभ्रष्टस्य मनसः पुनः प्रत्यानीयाऽर्थे योजनं प्रत्याहारः॥

२४०९ शरीरेन्द्रियमनोबुद्ध्यात्मनां धारणाद् धारणा॥

२४१० देवतायतनं शून्यागारगिरिकन्दरनदीपुलिनगुहारण्यानामन्यतमे शुचौ निराबाधे विभक्ते समुपस्तीर्णमासनं (सनं) कृत्वा, तस्मिन् लब्धाहारो निरामयः शुचिः शिरोग्रीवापाणिपादौ च समास्थाप्य, शरीरमृजुं समाधाय, शिश्नवृषणावपीडयन्, यत् किञ्चिदपाश्रित्य, स्वस्तिकं भद्रकं मण्डलं वाऽधिष्ठाय, उदङ्मुखो प्राङ्मुखो वा, दन्तैर्दन्तानसंस्पृश्य, अक्षिभ्याम-व्यक्तमनुन्मील्य च, मुखनासिकाभ्यामैक्यायसन्नाग्रास्थितदृष्टिः, सर्वेन्द्रियाणि संहृत्योर्ध्वं प्राणानुदीर्य, मनसा तच्चिन्तनं ध्यानम्॥

२४११ [अनि]ष्टाभिभवो, निद्राबाधा, भयानकोत्पत्तिर्ज्ञानपीडा, भोगातिशयः, कोपनैपुण्यमैश्वर्यविशेषो, धर्ममहत्त्वं, विद्यास्थानानि, यशोदीप्तिरिति योगिनां दशोपसर्गाः॥

२४१२ अणिमा महिमा लघिमा प्राप्तिः प्राकाम्यमीशित्वं वशित्वं यत्रकामावसायित्वं चाऽष्टावैश्वर्यगुणाः॥

२४१३ तेषामणिमा महिमा लघिमानः (लघिमा) त्रयः शारीराः॥

२४१४ प्राप्त्यादयः पञ्चैन्द्रियाः॥

२४१५ तत्राणुशरीरत्वमणिमा॥

२४१६ अणुभावात् सूक्ष्माण्यप्याविशति॥

२४१७ शरीरमहत्त्वं महिमा॥

२४१८ महत्त्वात् सर्वशरीराण्यावृणोति॥

२४१९ शरीराशुगामित्वं लघिमा॥

२४२० तेनाऽतिदूरस्थानपि क्षणेनाऽऽसादयति॥

२४२१ विश्वविषयावाप्तिः प्राप्तिः॥
२४२२ प्राप्त्या सर्वप्रत्यक्षदर्शी भवति॥
२४२३ यथेष्टचारित्वं प्राकाम्यम्॥
२४२४ प्राकाम्येन सर्वभोगवशानाप्नोति॥
२४२५ अप्रतिहतैश्वर्यमीशित्वम्॥
२४२६ ईशित्वेन दैवतान्यप्यतिशेते॥
२४२७ आत्मवश्यता वशित्वम्॥
२४२८ वशित्वेनाऽपरिमितायुर्वश्यजन्मा च भवति॥
२४२९ यत्रकामावसायित्वं त्रिविधम्॥
२४३० छायावेशः, अवध्यानावेशः, अङ्गप्रवेश इति॥
२४३१ यत् परस्य छायाप्रवेशमात्रेण चित्तं वशीकरोति, स छायावेशः॥
२४३२ यद् दूरस्थानामप्यनुध्यानेन चित्ताधिष्ठानं, सोऽवध्यानावेशः॥
२४३३ यत् सजीवस्योभिस्ते(क्रान्त)जीवस्य वा शरीरानुप्रवेशनं सोऽङ्गप्रवेशः॥
२४३४ यत्रकामावसायित्वेन मूर्तद्रव्यं चाधितिष्ठतीति ऐश्वर्यविस्थानम्॥
२४३५ तच्च प्रकृतिपुरुषान्तरहेतोर्धर्मतेजोज्ञानविशेषात्॥
२४३६ सातिशयेन सम्भूतं चैश्वर्यं भवतीति॥
२४३७ एवमेतानैश्वर्यगुणानधिगम्योद्भूतकल्मषः छिन्नसंशयः प्रत्यक्षदर्शी धर्मपरावरज्ञः कूटस्थः सर्वमिदमसदनित्यमिति ज्ञात्वा स्वयमेव शान्तिमधिगच्छतीत्यैश्वर्यावाप्तिः॥
२४३८ यद् दुःखं म्रियमाणस्य यद् दुःखं मातुराशये।
नान्यत्र ह्युपमा लोके जीवतामन्तरे तयोः॥
२४३९ भुक्तानि यानि तान्येव भोक्तव्यानि पुनर्नृभिः।
इति दृष्टार्थतत्त्वस्य पुनरुक्तमिदं जगत्॥
२४४० अहं ममेति चात्मानं संसारे परिवर्तते।
नाऽहं कश्चिन्न मे कश्चिदिति पश्यन्न बध्यते॥

२४४१ स तथा निवृत्तो निर्गुणश्छिन्नबन्धो जन्मजरामरणादुःखविनिर्मुक्तः
सुप्तवत् मत्तवत् विषधूमपानवत् सत्त्वादिहीनः तन्मात्रावस्थितः
परमसुखमैकान्तिकमधिगच्छतीति साङ्ख्यम्॥
२४४२ सायुज्यं सालोक्यं प्रकृतिलयो मोक्षश्चेति चतुर्विधं प्रयोजनम्॥
२४४३ तेषामैश्वर्यावाप्तियुक्त्या हिरण्यगर्भनारायणशिवमहेन्द्रसोमसूर्यस्कन्द-
ज्येष्ठोमादेवीप्रभृतीनां देवतानामैकजन्मं सायुज्यम्॥
२४४४ तत्सालोक्यमभ्युदयविशेषत्वादनुपादिष्टम्॥
२४४५ पृथिव्यादिषु भूतेष्वधिदैवतत्वं तद्भावभावित्वं च प्रकृतिलयः॥
२४४६ वसुन्धराहुतवहवरुणमारुतसरस्वतीनां पृथिव्यग्न्यम्बुवाय्वाकाशेषु-
आधेयत्वमधिदैवतत्वं तद्भावभावित्वं च योगविशेषात् च भवति॥
२४४७ अपुनर्भवो मोक्षः॥

[अरिष्टानि।]

२४४८ अथाऽरिष्टं प्रवक्ष्यामि यथावद् योगकर्मणि॥
यथोक्तमृषिभिः पूर्वमायुर्विज्ञानमादितः॥
२४४९ अरुन्धतीं ध्रुवं चैव सोमच्छायां महापथम्।
यो न पश्येन्न जीवेत् स द्विज(जः) संवत्सरात् परम्॥
२४५० अरश्मिमन्तमादित्यं रश्मिमन्तं च पावकम्।
यो न पश्येन्न जीवेत् स मासमेकादशात् परम्॥
२४५१ रुक्मशाखान् द्रुमान् दृष्ट्वा गन्धर्वनगराणि च।
पश्येत् प्रेतान् पिशाचांश्च दश मासान् स जीवति॥
२४५२ सदा मूत्रं पुरीषं वा सुवर्णरजतप्रभम्।
प्रत्यक्षं यदि वा स्वप्ने नव मासान् स जीवति॥

२४५३ अकस्माद् वा भवेत् स्थूलो योऽकस्माद् वा भवेत् कृशः।
प्रकृते विकृतो यो वै सोऽष्ट मासांस्तु जीवति॥
२४५४ पांशुस्थं कर्दमे वाऽपि यस्य खण्डं पदं भवेत्।
अग्रतः पृष्ठतो वाऽपि सप्त मासान् स जीवति॥
२४५५ काकः कपोतो गृध्रो वा विलीनो यस्य मूर्धनि।
क्रव्यादाः पक्षिणश्चैव षण्मासान् स तु जीवति॥
२४५६ मृदिते(तो) वायुवर्षेण पांसुवर्षेण वा पुनः।
छायां वा विकृतां पश्येत् पञ्च मासान् स जीवति॥
२४५७ अमेघां विद्युतं पश्येत् दक्षिणां दिशमाश्रिताम्।
मासान् स चतुरो जीवेद् योगी तत्र न संशयः॥
२४५८ रक्तगन्धाम्बरः स्रग्वी गच्छेद् वा दक्षिणामुखः।
खरोष्ट्रमपि चाऽऽरोहेत् त्रीन्मासान्नाऽतिजीवति॥
२४५९ जले चेन्द्रधनुर्वापि यदि पश्येन्नरोऽहनि।
मासद्वयेन म्रियते नास्ति तत्र विचारणा॥
२४६० अप्सु वा यदि वाऽऽदर्शे छायां पश्यति नात्मजः।
छायां वा विकृतां पश्येन्मासमेकं स जीवति॥
२४६१ यस्य वै स्नातमात्रस्य ऊरू पादौ च शुष्यतः।
मस्तके वा भवेद् धूमोऽर्धमासं स तु जीवति॥
२४६२ शवगन्धं भवेद् गात्रं दन्तसादोऽपि यस्य च।
दृष्ट्वात्मानं मृतं स्वप्ने द्वादशाहं स जीवति॥
२४६३ यस्य कृष्णौ करौ जिह्वा पद्माभासं च वै मुखम्।
गण्डे च पिटका रक्ताः स जीवेच्चतुरो दिनान्॥
२४६४ मारुतो यस्य गात्रेषु परं मर्माणि कृन्तति।
जीवेत्त्र्यहं तु विप्रः सन्, सन्देहश्च ततो भवेत्॥
२४६५ अद्भिः स्पृष्टो न हृष्येत(ष्टः) सोऽहनी द्वे च जीवति॥

२४६६ घोषं न शृणुयात् कर्णे ज्योतिर्नेत्रे न पश्यति।
सद्योजीवः स वै विप्रः शुभकर्माणि कारयेत्॥
२४६७ रात्रौ चेन्द्रायुधं पश्येद्दिवा नक्षत्रमण्डलम्।
परनेत्रेषु चात्मानं न पश्येत् स न जीवति॥

[उत्क्रान्तिः]

२४६८ त्यक्त्वा भयं विषादं च शुचिर्भूत्वा समाहितः।
प्राचीं वा यदि वोदीचीं दिशं निष्क्रम्य वै द्विजः॥
२४६९ प्रागुदक्प्रवणे देशे समे निःस्थावरे शुचौ।
द्विजस्तेनैव विधिना सोपदेशो धुतप्लवः॥
२४७० शतमष्टशतं वापि धारणां मूर्ध्नि धारयेत्।
स्विन्नस्य धारणाभिस्तु वायुरूर्ध्वं ततो व्रजेत्॥
२४७१ त्यक्तोङ्कारमयो योगी अक्षरस्थ(स्थोऽ)क्षरी भवेत्॥
२४७२ एवं निर्वाणमाप्नोति योगी योगपरायणः।
दृष्टारिष्टो यतिश्रेष्ठो योगी ध्यानपरो भवेत्॥
२४७३ त्यक्त्वा कलेवरं ध्यायन् परं याति महेश्वरम्।
एकान्तासन्तकं साङ्ख्यं परं ब्रह्म सनातनम्॥
२४७४ जन्ममृत्युजराव्याधिभयसङ्गविवर्जितम्।
देवैर्मुनिगणैर्वाऽपि दुर्गमं दुरतिक्रमम्।
उपगच्छति तत्त्वज्ञो योगी तद्गतमानसः॥

२४७५ इति देवलेन कृतं धर्मशास्त्रं प्रकीर्तितम्॥

# ॥देवलोक्तं ज्योतिषम्॥

## ॥प्रथमं प्रकरणम्॥

### ॥संस्काराः॥

१. आदौ तावद् देशधर्मो विचिन्त्यो
देशे देशे या स्थितिः सैव कार्या।
लोकद्विष्टं पण्डिता वर्जयन्ति
दैवज्ञोऽतो लोकमार्गेण यायात्॥

२. कर्म कुर्यात् फलावाप्त्यै चन्द्रादिशोभने बुधः।
सुस्थकाले त्विदं सर्वं नार्तः कालमपेक्षते॥

3 चन्द्रे च शङ्खं लवणं च तारे
तिथावभद्रे सिततण्डुलांश्च।
धान्यं च दद्यात् करणर्क्षवारे
योगे तिलान् हेममणिं च लग्ने॥

४. अश्विनीमघमूलाद्याः पादगण्डाः प्रकीर्तिताः।
रेवतीसर्पणाक्रान्तपादा . . . . . . . . ॥

५ अश्विनीमघमूलानां तिस्रो गण्डाद्यनाडिकाः।
अन्ते पौष्णोरगेन्द्राणां पञ्चैव यवना जगुः॥

६ सन्ध्यारात्रिदिवाभागे गण्डयोगोद्भवः शिशुः।
आत्मानं मातरं तातं विनिहन्ति यथाक्रमम्॥
गण्डप्रसूतं पुरुषं शुभमाहुरपश्यताम्॥
७ अश्विन्यां षोडशाब्दानि पित्र्ये चाष्टौ च वत्सरान्।
मूलेऽब्दानि च चत्वारि ज्येष्ठे वर्षयुगं तथा॥
सार्पेऽब्दपञ्चकं चैव रेवत्यामब्दपञ्चकम्॥

८ बाले वृद्धे तथैवास्ते कुरुते (गुरौ वा) दैत्यमन्त्रिणि।
उद्वाहितायां कन्यायां दम्पत्योरेकनाशनम्॥
९ प्रागुद्गतः शिशुरहस्त्रितयं सितः स्यात्
पश्चाद् दशाहमिति पञ्चदिनानि वृद्धः।
प्राक्पक्षमेव कथितोऽत्र वसिष्ठगर्गैर्-
जीवस्तु पक्षमपि वृद्धशिशुर्विवर्ज्यः॥
१० आषाढे धनधान्यभोगरहिता नष्टप्रजा श्रावणे
वेश्या भाद्रपदे इषे च मरणं रोगान्विता कार्तिके।
पौषे प्रेतपतिर्वियोगबहुला चैत्रे महोन्मादिनी
अन्येष्वेन विवाहिता पतिरता नारी समृद्धा भवेत्॥
११ नष्टात्मजा धनवती विधवा कुशीला
पुत्रान्विता हतधवा सुभगा विपुत्रा।
स्वामिप्रिया विगतपुत्रधवा धनाढ्या
वन्ध्या भवेत् सुरगुरौ क्रमशोऽभिजन्म॥
१२ देवोत्सवे प्रवृत्ते तु न मनुष्योत्सवो मतः।
तस्मिन् ग्रामे न कुर्वीत कुर्याच्चेत् स विनश्यति॥
13 व्रतबन्धन(नं) प्रतिष्ठां विवाहमथ मन्दिरप्रवेशं च।
यात्रां च याम्यदेशे कुर्यादार्ये न सिंहांशे (सिंहस्थे)॥

१४ मकरस्थं गुरुं यत्नात् सिंहवत् परिवर्जयेत्।
देवारामतडागेषु पुरोद्यानगृहेषु च॥
१५ लग्नस्थे वरुणाशां हिबुकस्थे दक्षिणां रवौ यायात्।
सप्तमगे पूर्वाशां मेषूरणसंस्थिते सौम्याम्॥

# ॥द्वितीयं प्रकरणम्॥

## ॥कृषिः॥

१६ गुरुसोमसूर्यशुक्राः क्षेम्याः सम्पत्कराः शुभाः।
बुधार्किभूमिपुत्राश्च न भवन्ति फलप्रदाः॥
१७ हन्ति मेषः परान् सर्वान् स्वभावेनाथ वृश्चिकः।
कर्कटे न भवेत् सौख्यं तुलायां न प्ररोहति॥
१८ केशरी शस्यघाती स्यात् पार्थिवोपद्रवं धनुः।
मकरे चैव कुम्भे च भयमेव विनिर्दिशेत्॥
१९ गोस्त्रीमन्मथमीनेषु शस्यं सम्पद्यते महत्॥

२० प्रशस्ते चन्द्रतारे च शुचिः शुक्लेन वाससा।
स्नात्वा गन्धैश्च पुष्पैश्च पूजयित्वा विधानतः॥
२१ पृथ्वीं च ग्रहसंयुक्तां पूजयित्वा प्रजापतिम्।
अग्निं प्रदक्षिणीकृत्य दीयते भूरिदक्षिणा॥
२२ कृष्णौ वृषौ नियोक्तव्यौ नवनीतैर्घृतेन वा।
मुखपार्श्वं तयोर्लिप्या(म्पे)त् फालाग्रं कनकैः स्पृशेत्॥
२३ उत्तराभिमुखो भूत्वा क्षीरेणार्घ्यं प्रदापयेत्।
ततः शुभकरः श्रीमान् कृषिकर्म समाचरेत्॥

२४ वर्जयेद् भग्नशृङ्गं च क्षुरभग्नं च वर्जयेत्।
विकलं छिन्नलाङ्गूलं कपिलं वृषभं तथा॥
२५ हलप्रवाहनं कार्यं नीरुग्भिः कृषिकर्मकैः।
हलादिभिर्दृढैः क्षेमं कुदृढैर्न शुभं वदेत्॥
वृषभा यदि मुह्यन्ति तस्य विघ्नप्रदा भवेत्॥
२६ तस्मात् सर्वप्रयत्नेन निर्विघ्नं कारयेत् सदा।
एका जयकरी रेखा तृतीया चार्थदायिका॥
२७ पञ्चमी या भवेद् रेखा बहुशस्यफला हि सा।
अत ऊर्ध्वं न कर्तव्यं महादोषस्ततो भवेत्॥
२८ सम्पूज्याग्निं द्विजं देवं कुर्याद् हलप्रवर्तनम्।
हेमनिर्घृष्टफालाग्र(ग्रं)छिन्नरेखां न कारयेत्॥
२९ स्मर्तव्या वसवश्चेन्द्रः पृथू रामः सचन्द्रमाः।
पराशरो बलभद्रः सर्वविघ्नोपशान्तये॥
30 हले प्रवाह्यमाने तु कर्म उत्पद्यते यदि।
गृहिणी म्रियते तस्य ततोऽग्नेश्च भयं भवेत्॥
31 लाङ्गू(गा)लं भिद्यते चापि प्रभुस्तस्य विनश्यति।
ईशाभङ्गो यदा कर्तुः संशयो जीवितस्य च॥
32 सुतनाशो युगाभङ्गे समीने म्रियते सुतः।
योक्त(क्त्र)च्छेदे तु व्यासङ्गः शस्यहानिश्च जायते॥
33 हले प्रवाह्यमाने तु गौरेकः प्रपतेद् यदि।
प्रपतेन्मुक्तमात्रस्तु बन्धनं स प्रपद्यते॥
ज्वरातिसाररोगेण कृषिभङ्गं विनिर्दिशेत्॥
34 प्रवाहमात्रमुक्तस्तु ततो गौः प्रपतेद् यदि।
वत्सालीढेन नर्दन्ति ततो शस्यं चतुर्गुणम्॥

३५ हेमवारिविलिप्तस्य बीजस्योन्नयतः शुचिः।
इन्द्र(न्द्रं) चित्ते निधायाथ स्वयं मुष्टित्रयं वपेत्॥
३६ कृत्वा चान्योन्यप्रोत्साहं नर्तको हृष्टमानसः।
प्राङ्मुखः कलशं गृह्य इमं मन्त्रमुदीरयेत्॥
३७ त्वं वै वसुन्धरे सीते बहुपुष्पफलप्रदे।
नमस्ते, मे शुभं नित्यं कृषिं मेधां शुभे कुरु॥
३८ रोहन्तु सर्वशस्यानि काले देवः प्रवर्षतु।
कर्षकास्तु भवन्त्वग्रा धान्येन च धनेन च॥ स्वाहा॥

# ॥तृतीयं प्रकरणम्॥

## ॥ग्रहचारः॥

३९ दिनानि त्रिंशदुदितस्तिष्ठेद्यदि च सोमजः।
ऋज्वी गतिः सा विज्ञेया प्रजानां हितकारिणी॥
४० चतुर्विंशद्दिनान्येवं यदि तिष्ठेच्च सोमजः।
अतिवक्रा गतिर्ज्ञेया दुर्भिक्षभयलक्षणा॥
४१ अहानि द्वादश यदा बुधस्तिष्ठेद् तथोद्गतः।
वक्रा गतिः सा विज्ञेया शस्त्रसंभ्रमकारिणी॥
४२ षड्दिनानि यदा तिष्ठेदुद्गतः सोमनन्दनः।
विकला सा गतिर्ज्ञेया भयरोगविवर्धिनी॥
४३ एवमस्तमये सर्वं गतिजं सोमजस्य तु।
भावाभावाय लोकानां फलं वाच्यं शुभाशुभम्॥

४४ अश्विन्यादित्रिभाः सर्वा नागाद्या दहनान्तिकाः।
वीथयो भृगुपुत्रस्य नव प्रोक्ता मनीषिभिः॥

४५ मीने धनुषि कन्यायां मिथुने सगुरुः शनिः।
तिष्ठेद् यदा तदा घोरः प्रजानामनयो भवेत्॥

४६ अन्धकारमयो राहुर्मेघखण्ड इवोत्थितः।
आच्छादयति सोमार्कौ पर्वकाले ह्युपस्थिते॥

४७ कृत्तिका रोहिणी सौम्यं पृथिवीमध्यमुच्यते।
केतवो ह्यत्र दृश्यन्ते आग्नेया दश पञ्च च॥
४८ आग्नेयेषु च दृष्टेषु लोकानां च क्षयो ध्रुवम्।
निरोद्विग्नाश्च राजानो जनमा[रे]स्तदा भवेत्॥
४९ रौद्रं पुनर्वसुः पुष्यः पृथिव्याः पूर्वमुच्यते।
केतवो ह्यत्र दृश्यन्ते रौद्रास्तेऽप्येकविंशतिः॥
५० यदा रौद्राः प्रदृश्यन्ते दुर्भिक्षं निर्दिशेत् तदा।
घूर्णन्ते च प्रजाः सर्वा मृत्युक्षुद्रोगपीडिताः॥
५१ आश्लेषापित्र्यमाग्या(भागा)नि विन्द्या(द्यो)त् दक्षिणपूर्वतः।
केतवो ह्यत्र दृश्यन्ते उद्दालकिसुता दश॥
५२ केतवो ह्यत्र दृश्यन्ते शिखिनो मुनिसम्भवाः।
सुभिक्षं क्षेममारोग्यं सुवृष्टिः शस्यसम्पदः॥
५३ आर्यम्णादीनि च त्रीणि विन्द्या(द्यो)त् दक्षिणभागतः।
केतवो ह्यत्र दृश्यन्ते काश्यपेयाश्चतुर्दश॥
५४ अनावृष्टिभयं घोरं प्रजानामतिदारुणम्।
स्वाती विशाखा मैत्रं च भागो दक्षिणपश्चिमः॥
५५ केतवो ह्यत्र दृश्यन्ते चत्वारो मुनिसम्भवाः॥
भयं च विविधं विन्द्या(द्यो)त् गार्गस्य वचनं यथा॥
५६ दुर्भिक्षं मरकं घोरमनावृष्टिश्च दारुणा।
उपद्रवश्च भूतानां तदा भवति दारुणः॥
५७ ज्येष्ठामूलमघाषाढा भाग कृष्णां तु पश्चिमः।
केतवो अत्र दृश्यन्ते सुतास्ते सोमसम्भवाः॥

५८ सुभिक्षं च सुवृष्टिश्च मही यज्ञोत्सवाकुला।
उत्तरा श्रवणं चैव नक्षत्रं वसुदैवतम्॥
५९ केतवो अत्र दृश्यन्ते माहेयाः पञ्चविंशतिः।
माहेयेषु च दृष्टेषु लोकानां संक्षयो ध्रुवम्॥
तदा राजसहस्राणां मही पिबति शोणितम्॥
६० वारुणं चैव नक्षत्रं तथा भाद्रप[दा]द्वयम्।
केतवो अत्र दृश्यन्ते वारुणास्त्रय एव तु॥
६१ ऊर्मिकेतुः श्वेतकेतुर्धूमकेतुस्तृतीयकः।
ऊर्मिकेतुर्यदा दृश्यस्तदा क्षुदजं भयम्॥
६२ श्वेतकेतुर्यदा दृश्यः श्वेतास्थिं कुरुते महीम्।
तदा मानुषमांसानि भक्षयन्तीह मानुषाः॥
६३ न माता मन्यते पुत्रं पुत्रो वा मातरं तथा।
न पिता पुत्रसम्भूतं स्नेहं सम्प्रतिपद्यते॥
६४ न पतिर्मन्यते नारीं न बन्धुर्बान्धवं तथा।
क्षुद्भयार्तं जगत् कृत्स्नं चक्रवद् भ्रमते तदा॥
६५ धूमकेतुर्यदा दृश्यस्तस्य वक्ष्यामि लक्षणम्।
स हन्ति तारया योधान् राजानं मन्त्रिणं तथा॥
६६ स हन्ति शिखया देशान् सराष्ट्रजनकाननान्।
रेवत्याश्वयुजं चैव नक्षत्रं यमदैवतम्॥
६७ केतवो अत्र दृश्यन्ते यमपुत्रास्त्रयोदश।
यमपुत्रेषु दृष्टेषु लोकानां संक्षयो ध्रुवम्॥
६८ स्थावरा मानुषाः सर्वे पशवः पक्षिणस्तथा।
चतुर्विधानां भूतानां संक्षयो जायते ध्रुवम्॥

६९ सन्ध्या तु योजनं याति विद्युद्भासा षडेव हि।
मेघशब्दस्तु पञ्चानां योजनानां फलप्रदः॥
उल्का सर्वत्र फलदा शुभा वाऽप्यशुभापि वा॥

७० प्रवर्षणे यदा वृष्टं दशयोजनमण्डलम्।
वर्षाकालं समासाद्य वासवो बहु वर्षति॥
७१ प्रवर्षणे यदा वृष्टो वर्षमाणः शतक्रतुः।
वर्षाकालं समासाद्य वर्षते दशयोजनम्॥

७२ बली वर्षपतिः पुष्टं फलं यच्छति शोभनम्।
विबलश्च तथानिष्टं वर्षमासदिनात्मकम्॥

# ॥चतुर्थं प्रकरणम्॥

## ॥अरिष्टानि॥

७३ कृष्णैश्च विकटैश्चैव पुरुषैश्चोद्यतायुधैः।
पाषाणैस्ताड्यते स्वप्ने षण्मासान् न स जीवति॥
७४ भस्माङ्गारांश्च केशांश्च नदीं शुष्कां भुजङ्गमान्।
पश्येद् यो दशरात्रं च न जीवेत् तादृशः पुमान्॥
७५ क्षुद्रवानरयुक्तेन रथेनाशां तु दक्षिणाम्।
गायन्नथ व्रजेत् स्वप्ने विद्यान्मृत्युमुपस्थितम्॥
७६ कृष्णाम्बरधरा श्यामा गायन्ती वाऽप्यथाङ्गना।
यं नयेद् दक्षिणामाशां स्वप्ने सोऽपि न जीवति॥
७७ दीपगन्धं च नापैति विद्यान्मृत्युमुपस्थितम्॥
७८ नासा च वक्रा भवति स ज्ञेयो गतजीवितः॥
७९ गण्डयोः पिटके रक्ते तस्य मृत्युरुपस्थितः॥
८० यस्य वै भुक्तमात्रस्य हृदयं पीड्यते क्षुधा।
जायते दन्तहर्षश्च तं गतायुषमादिशेत्॥
८१ सूर्योदये प्रत्युषसि प्रत्यक्षं यस्य वै शिवा।
क्रोशन्त्यभिमुखाऽभ्येति स गतायुर्भवेन्नरः॥